[इति विरचितशत-न्याय-ग्रन्थ-न्याय-आचार्य श्रीमद् यशोविजयवाचकानाम् ।]

| | | | | | |
|---|---|---|---|---|---|
| इन्द्रवज्रा | तगणः | तगणः | जगणः | गु, | गु. |
| छन्दः | कल्पद्रु | मस्तस्य | गृहेऽव | ती | र्ण- |
| | ऽऽ। | ऽऽ। | ।ऽ। | ऽ | ऽ |

उदाहरणं यथा मम–

**आशास्यते सुन्दरनाममाला-**
**शालेव धर्मस्य मम प्रिया स्यात् ।**
**शब्दानुसन्धानप्रदानकाले ,**
**मालेव वा मोदकरी भवित्री ।।**

(२) 'उपेन्द्रवज्रावृत्तं कथ्यते ।

**तल्लक्षणमाह**–"'उपेन्द्रवज्रा जतजास्ततो गौ ।" अथवा–"**उपेन्द्रवज्रा प्रथमे लघौ सा ।**"

सा इन्द्रवज्रा एव प्रथमे लघुवर्णे सति **'उपेन्द्रवज्रा'** स्यात् । यत्र प्रथमः जगणः द्वितीयः तगणः तृतीयः जगणश्च दशमैकादशवर्णौ गुरवः ।

तस्योदाहरणं यथा–

**सुवर्णवर्णो हरिणा सवर्णो,**
**मनो वनं मे सुमतिर्बलीयान् ।**
**गतस्ततो दुष्टकुदृष्टिराग-**
**द्विपेन्द्र ! नैव स्थितिरत्र कार्या ।। १ ।।**

[इति वाचकश्रीक्षमाकल्याणगणिविरचित श्रीचैत्य-वन्दनचतुर्विंशतिकायाम्] ।

| उपेन्द्रवज्रा छन्दः | तगणः | तगणः | जगणः | गु, | गु, |
|---|---|---|---|---|---|
| | सुवर्ण | वर्णो ह | रिणा स | व | र्णो |
| | ।ऽ। | ऽऽ। | ।ऽ। | ऽ | ऽ |

तथैवोदाहरणं यथा मम—

**सर्वज्ञदेवो जिनवर्द्धमानः ,**
**पुरीमपापां निकषा सुरम्ये ।**
**महत्यरण्ये महसेननाम्नि ,**
**तीर्थप्रवृत्यै कृतवान् विहारम् ।। १ ।।**

[इति श्रीगणधरवादकाव्ये प्रोक्तमिदम्] ।

(३) **'उपजातिः वृत्तं'** कथ्यते ।

तल्लक्षणमाह—

**अनन्तरोदीरितलक्ष्मभाजौ ,**
**पादौ यदीयावुपजातयस्ताः ।**
**इत्थं किलान्यास्वपि मिश्रितासु,**
**वदन्ति जातिष्विदमेव नाम ।।**

अव्यवहितोक्तेन्द्रवज्रोपेन्द्रवज्रालक्षणसहितौ पादौ यत् सम्बन्धिनौ । "इन्द्रवज्रोपेन्द्रवज्रयोः मिलितौ पादौ यस्याँ सा उपजातिः" ।

उदाहरणं यथा—

**जितो जगत्येष भवभ्रमस्तैः ,**
**गुरूपदेशेन प्रभुं स्मरन्ति ।**
**उपास्यमानं कमलासनाद्यै-**
**रुपेन्द्रवज्रायुध - वारिनाथैः ।।**

| उपजातिः | प्रथमे लघुः | तगणः | जगणः | गु, | गु, |
|---|---|---|---|---|---|
| छन्दः | जितो ज | गत्येष | भवभ्र | मस् | तैः |
| | ।ऽ। | ऽऽ। | ।ऽ। | ऽ | ऽ |

तथैवोदाहरणं यथा–

**अथ प्रजानामधिपः प्रभाते ,**
**जायाप्रतिग्राहितगन्धमाल्याम् ।**
**वनाय पीतप्रतिबद्धवत्सां ,**
**यशोधनो धेनुमृषेर्मुमोच ॥ १ ॥**

(इति कविश्रीकालिदासविरचितश्रीरघुवंशकाव्ये प्रोक्तम्)

अत्रेदं समानजातिकयोरेव द्वयोः वृत्तयोः सङ्करे उपजातित्वम्, न विषमजातिकयोः। किञ्च मेलनमपि वृत्तद्वयस्य कविजनसमाचरितस्य श्रुतिसुखकरस्य च। यत्र च चरणद्वयस्य जातिर्भिन्नाः, अपरद्वयस्य च जातिर्भिन्ना तत्राभावोपजातेः, किन्तु अर्द्धसमत्वं वर्त्तते। समजातिकयोरपि किञ्चिद् वैशिष्टयं विहाय सर्वेष्वंशेषु यत्र साम्यं सम्भवति तत्रैव मेलनमादि। यथा–इन्द्रवज्रोपेन्द्रवज्रयोः स्वागतारथोद्वृत्तयोः इन्द्रवंशावंशस्थयोरित्यादि। स्वागतारथोद्धतावंशस्थेन्द्रवंशादिभ्योऽपि तथैव भवन्त्युपजातयः।

सर्वेषूपजातिषु चतुर्दशभेदाः । तत्र च इन्द्रवज्रोपेन्द्रवज्रयोर्भेदा नामतो यथा—१. कीर्त्तिः, २. वाणी, ३. माला, ४. शाला, ५. हंसी, ६. माया, ७. जाया, ८. बाला, ९. आर्द्रा, १०. भद्रा, ११. प्रेमा, १२. रामा, १३. ऋद्धिः १४. बुद्धिश्चेति ।

(१) उपजातिभेदेषु प्रथमभेदोदाहरणं यथा—

**'कीर्त्तिः' नामोपजातिछन्दः (उ इ इ इ)**

**तदीय पट्टाधिकृतो गुणाना-**
**माधिक्यतः शासनदक्षसूरिः ।**
**साधुप्रधानश्च सहोदरश्च ,**
**तच्छिष्यनामानुगुणः सुशीलः ॥**

(२) द्वितीयभेदोदाहरणं यथा—

**'वाणी' नामोपजातिछन्दः (इ उ इ इ)**

**देवाधिदेवादि - गुणानुरागाः ,**
**षडत्र ये सन्ति प्रदत्तभागाः ।**
**भवन्ति प्रायः जगतां प्रसिद्धाः ,**
**'सुशील' दृष्टानि मनोहराणि ॥**

(३) तृतीयभेदोदाहरणं यथा–

**'माला' नामोपजातिच्छन्दः (उ उ इ इ)**

**आलम्बते तत्क्षणमम्भसीव ,**
**विस्तारमन्यत्र न तैलबिन्दुः ।**
**विना न साहित्यविदाऽपरत्र ,**
**गुणः कथञ्चित् प्रथते कवीनाम् ॥**

(४) चतुर्थभेदोदाहरणं यथा–

**'शाला' नामोपजातिच्छन्दः (इ इ उ इ)**

**वैयाघ्रपद्यं द्विपदीय बुद्धिः ,**
**क्रियां स तीर्थे द्विपदाभमित्रः ।**
**गीरा स्फुरन्नासिकया न्यकार्षी-**
**त्रसीतदृष्टि द्विपदी सृजन्ता ॥**

(५) पञ्चमभेदोदाहरणं यथा–

**'हंसी' नामोपजातिच्छन्दः (उ इ उ इ)**

**दुग्धास्निगद्गूढमनः स्निडेव्या ,**
**स्नुग्धामृतस्नूढवचाः श्रुतिश्रुक् ।**
**स्नीढैर्द्विजैः स्निग्धतनुः सुमन्त्रः ,**
**प्रभात - सन्ध्योचितमन्त्रजापम् ॥**

[इति कलिकालसर्वज्ञ-श्रीहेमचन्द्राचार्य-विरचितद्व्या-श्रयमहाकाव्ये प्रोक्तम् ।]

(६) षष्ठभेदोदाहरणं यथा–

**'माया' नामोपजातिछन्दः (उ इ इ उ)**

**मुद्वानरोही वतिकामुनीवत् ,**
**यृषीवतीवाः शुचिवाग् बभाषे ।**
**नृपेण तृष्णीवति जेहुलो लक्ष्–**
**मीवान् यशस्वान्नयवत्सु धीमान् ।।**

[श्रीद्व्याश्रय महाकाव्ये प्रोक्तम्]

(७) सप्तमभेदोदाहरणं यथा–

**'जाया' नामोपजातिछन्दः (उ उ उ इ)**

**राजन्वती या हरिणा सुराष्टा ,**
**तादाम्भिमानूर्मिमदब्धिभीमः ।**
**शौर्येष्मकण्ड्वा कृमिमानिवाद्य ,**
**स भूमिमान् राजवतीं व्यधत्तः ।।**

[श्रीद्व्याश्रयमहाकाव्ये प्रोक्तम्]

(८) अष्टमभेदोदाहरणं यथा–

**'बाला' नामोपजाति-छन्दः (इ इ इ उ)**

**वन्द्यः स पुंसां त्रिदशाऽभिनन्द्यः ,**
**कारुण्य - पुण्योपचय - क्रियाभिः ।**
**संसारसारत्वमुपैति यस्य ,**
**परोपकाराऽऽभरणं शरीरम् ।।**

[सुभाषितावलौ प्रोक्तम्]

(९) नवमभेदोदाहरणं यथा–

**'आर्द्रा' नामोपजातिछन्दः (उ इ इ उ)**

**गुणा गुणज्ञेषु गुणी भवन्ति,**
**ते निर्गुणं प्राप्य भवन्ति दोषाः ।**
**सुस्वादुतोयाप्रभवा हि नद्यः,**
**समुद्रमासाद्य भवन्त्यपेयाः ।।**

[सुभाषिते प्रोक्तम्]

(१०) दशमोदाहरणं यथा–

**'भद्रा' नामोपजातिछन्दः (इ उ इ उ)**

**अस्त्रं नवं मानसिजं वरेण,**
**क्षरेजयहुं क्षरजाति - तेजः ।**
**इन्द्राण्युरोजोचितमद्रिजोर–**
**सिजोचितं ढौकयति स्म कीरः ।।**

[श्रीद्व्याश्रयमहाकाव्ये प्रोक्तम्]

(११) एकादशोदाहरणं यथा–

**'प्रेमा' नामोपजातिछन्दः (उ उ इ इ)**

**वितीर्ण शिक्षा इव हृत्पदस्थं,**
**सरस्वती - वाहनराजहंसैः ।**
**ये क्षीरनीरप्रविभागदक्षा,**
**विवेकिनस्ते कवयो जपन्ति ।।**

(१२) द्वादशोदाहरणं यथा–

**'रामा' नामोपजातिछन्दः ( इ इ उ उ)**

**ईदृग्गजो भर्त्तृगृहेस्थिदन्तो ,**
**हन्यात् पितुः शिष्यं पितुस्तनूजान् ।**
**पितुः स्वसारं स्वसृपत्यपत्यं ,**
**स्वसुः पतिं नाम पितृष्वसृणाम् ।।**

[श्रीद्व्याश्रयमहाकाव्ये प्रोक्तम्]

(१३) त्रयोदशोदाहरणं यथा–

**'ऋद्धिः' नामोपजातिछन्दः (उ इ उ उ)**

**प्रियोदसम्तूदकभारजन्तू–**
**व्यग्रा वणीग्रोदकसम्तु शुभ्रा ।**
**रणोदगाहाद्रुधिरोदभाराः ,**
**क्षणेन केप्योदकगाहमीयुः ।।**

[श्रीद्व्याश्रयमहाकाव्ये प्रोक्तम्]

(१४) चतुर्दशोदाहरणं यथा–

**'बुद्धिः' नामोपजातिछन्दः (इ उ उ उ)**

**दीपाः स्थितं वस्तुविभावयन्ति ,**
**कुलप्रदीपास्तु भवन्ति केचित् ।**
**चिरव्यतीतान्यपि पूर्वजान्ये ,**
**प्रकाशयन्ति स्वगुणप्रकर्षात् ।।**

[श्रीअमृतवर्द्धनस्य]

एते चतुर्दशोपजातिभेदाः इन्द्रवज्रोपेन्द्रवज्रासम्भवा प्रदर्शिता, उपरि उपजातिभेदानामाद्यं यत् उदाहरण-मुल्लिखितं तत्र एकैकलघुह्रासक्रमः बहुषु ग्रन्थेषु अयमेव क्रमः समादृतः। अतः तेनैव क्रमेण उपजातिभेदाः अत्राऽपि प्रदर्शिताः।

किञ्च मूलकृतः 'अनन्तरोदीरित' इत्युदाहरणप्रदर्शनेन पादे सर्वगुरावाद्या लघुं न्यस्य इति प्रस्तारपथप्रदर्शनेन प्रदर्शितः क्रमः एव सामञ्जस्यमावहति।

अत्र पूर्वोक्तलक्षणेन पादद्वयेन यथायोगमेकद्विवारा-वृत्या निष्पत्तिर्विवक्षिता। न तु द्वाभ्यां एव वृत्तपूर्तिः पादद्वयमात्रघटितस्य वृत्तस्याभावात्। द्विवचनं लक्षण-द्वयेन लक्षणया नेयम्। ताश्च तुरक्षरप्रस्तारवत् प्रस्तरे सत्याद्यन्तभेदयोः केवलेन्द्रवज्रोपेन्द्रवज्रा त्यागे चतुर्दश भवन्ति। यथा—

| | | | |
|---|---|---|---|
| १ | उ इ इ इ | ८ | इ इ इ उ |
| २ | इ उ इ इ | ९ | उ इ इ उ |
| ३ | उ उ इ इ | १० | इ उ इ उ |
| ४ | इ इ उ इ | ११ | उ उ इ उ |
| ५ | उ इ उ इ | १२ | इ इ उ उ |
| ६ | इ उ उ इ | १३ | उ इ उ उ |
| ७ | उ उ उ इ | १४ | इ उ उ उ, इति। |

तथा च अन्यच्च–

**एकत्र पादे चरणद्वये वा,**
**पादत्रये वान्यतरः स्थितश्चेत् ।**
**तयोरिहान्यत्र तदोहनीया–**
**चतुर्दशोक्ता उपजातिभेदाः ।।**

एवं भेदेषु उदाहरणानि विवेचनीयानि ।
**इत्थं किलान्यास्यपि मिश्रितासु ।**
**स्मरन्ति जातिष्विदमेव नाम ।।**

केषाञ्चित्–इन्द्रवज्रोपेन्द्रवज्रयोर्मेलनेन इन्द्र**वंशावंशस्थ**-योर्वामिलनेन यथा उपजातयः सम्मधन्ते तथा इन्द्रवज्रा-वंशस्थयोः इव अन्यान्यविषमाक्षरजातिद्वयमेलनेन अपि उपजातयः भवन्तीति वदन्ति ।

**'शालिनी' छन्दः** कथ्यते ।

**तल्लक्षणमाह–**

**'शालिन्युक्ता, म्तौ तगौ गोऽब्धिलोकैः ।'** यस्यां मगणः तगणद्वयं गुरुद्वयं स्यात् चतुर्भिः सप्तभिश्च विरामः **'शालिनी'** छन्दः ।

तस्योदाहरणं यथा–

**अन्तर्वाणि मन्यमानः कवीनां,**
**पौरोभाग्यं युक्तिषूक्तासु दत्ते।**
**सर्वानिन्द्येऽप्यङ्कके कामिनीना-**
**मीमांमार्गं शोधते भर्भ (बम्भ) राली ॥ १ ॥**

मत्कृतिः –

**नृणां श्रद्धा-शालिनी देवपूजा,**
**श्रेयस्कारी धर्मवृद्धि विधत्ते।**
**कामं दत्ते श्रीसमूहं प्रदत्ते,**
**मोक्षं धत्ते कर्मविनाशिनी वै ॥**

| शालिनी छन्दः | मगणः | तगणः | तगणः | गु, | गु, |
|---|---|---|---|---|---|
| | नृणां श्र | द्धा शालि | नी देव | पू | जा |
| | SSS | SSI | SSI | S | S |

(३) 'रथोद्धता' छन्दः कथ्यते—

तल्लक्षणमाह–

**"रात्परैर्नरलगै रथोद्धता।"** यत्र रगणः, नगणः रगणः लघुः गुरुश्च स्यात् सा **'रथोद्धता'** छन्दः।

तस्योदाहरणं यथा–

**पूजया भवति राज्यमूर्जितं,**
**पूजया भवति निर्मला मतिः ।**

**पूजया भवति निर्वृतिः क्रमात् ॥**

मत्कृतिः –

**आदिनाथवदनाम्बुजाद् वरा–**
**न्निसृतामृतरसागमेदुरम् ।**
**अद्वितीयवरमद्भुतं चिरं,**
**स्तौम्यहं जगति जैनशासनम् ॥ १ ॥**

| रथोद्धता छन्दः | रगणः | नगणः | रगणः | ल, | गु, |
|---|---|---|---|---|---|
| | आदिना | थवद | नाम्बुजाद् | व | राद् |
| | SIS | III | SIS | I | S |

(१) **'दोधकवृत्तम्'** कथ्यते—

तल्लक्षणमाह–

**दोधकवृत्तमिदं भभभाद्गौ ।** यत्र भगणत्रयाद् गुरुद्वयं चेद् दोधकं नाम । भ भ भादिति समाहारद्वन्द्वैकवद्भावः । दोधकनामनि भत्रयतो गौ पादान्ते यतिः ।

तस्योदाहरणं यथा मत्कृतिः—

**लुब्धकस्वार्थपरायणमित्रं ,**
**कामकलाचपलं हि कुवीरम् ।**
**शाठ्यवरं मतिहीनकुमित्रं ,**
**मुञ्चति यो सुजनः सः सुशीलः ॥**

| | | | | | |
|---|---|---|---|---|---|
| दोधक-वृत्तम् | भगणः | भगणः | भगणः | गु, | गु, |
| | लुब्धक | स्वार्थ प | रायण | मि | त्रम् |
| | ऽ।। | ऽ।। | ऽ।। | ऽ | ऽ |

(२) **'स्वागता'** छन्दः कथ्यते—

तल्लक्षणमाह—

"**स्वागतेति रनभाद् गुरुयुग्मम् ।**" यस्यां रगणः नगणः भगणः गुरुद्वयं च स्यात् सा **'स्वागता'** छन्दः ।

तस्योदाहरणं यथा—

**रत्नभङ्गविमलैर्गुणतुङ्गै –**
**र्थिनामभिमतार्पणशक्तैः ।**
**स्वागताभिमुखनम्रशिरस्कै–**
**र्जीव्यते जगति साधुभिरेव ॥**

| स्वागता छन्दः | रगणः | नगणः | भगणः | गु, | गु. |
|---|---|---|---|---|---|
| | रतनभ | ङ्गविम | लैगुंण | तु | ङ्गः |
| | SIS | III | SII | S | S |

## अथ द्वादशाक्षरवृत्तानि

(१) 'वंशस्थवृत्तं' कथ्यते—

तल्लक्षणमाह—

**सुशीलवंशस्थविलं जतौ जरौ ।**
**जतौ तु वंशस्थमुदीरितं जरौ ।**

यत्र जगण-तगणौ जगण-रगणौ च भवेतां तद् **'वंशस्थवृत्तं'** कथ्यते । 'ज-त-ज-रैर्वंशस्थम्' । पादे यति ।

तस्योदाहरणं यथा मत् कृतिः —

**जिनेश्वरस्याऽऽगमशासने स्थिता ,**
**जयन्ति सन्तः सततं समुन्नताः ।**
**विशालवंशस्थतया गुणोऽचिता ,**
**'सुशील' छत्र प्रतिभा विभान्ति मे ।।**

| | | | | |
|---|---|---|---|---|
| वंशस्थ- | जगण: | तगण: | जगण: | रगण: |
| वृत्तम् | जिनेश्व | रस्याग | मशास | ने स्थिता |
| | ।ऽ। | ऽऽ। | ।ऽ। | ऽ।ऽ |

नैषधीयकाव्येऽपि प्रोक्तं यत्–

**निपीय यस्य क्षितिरक्षिणः कथा–**
**स्तथाद्रियन्ते न बुधाः सुधामपि ।**
**नलः सितच्छत्रितकीर्त्तिमण्डलः**
**स राशिरासीन् महसां महोज्ज्वलः ॥**

(२) 'इन्द्रवंशा' छन्दः कथ्यते—

तल्लक्षणमाह–

**'स्यादिन्द्रवंशा ततजै रसं युतैः ।** "त-त-जै रसं युतैः रगणसहितैरिन्द्रवंशा" पादे यति ।

तस्योदाहरणं यथा–

**करोति यो देव-गुरोऽवमानना ,**
**सुशीलचारित्र्य न यस्य जीवने ।**
**तस्येन्द्रवंशेऽपि गृहीतजन्मनः ,**
**सञ्जायते श्रीः प्रतिकूलवर्तिनी ॥**

| इन्द्रवंशा छन्दः | तगणः | तगणः | जगणः | रगणः |
|---|---|---|---|---|
| | करोति | यो देव | गुरोऽव | मानना |
| | SSI | SSI | ISI | SII |

वंशस्थेन्द्रवंशासम्भूतानामुपजातिभेदाः ।

यथा–

१ वैरालिकी (वं इ इ इ) ।
२ रताख्यानकी (इ वं इ इ) ।
३ इन्दुमा (वं वं इ इ) ।
४ पुष्टिदा (इ इ वं इ) ।
५ उपमेया (वं इ वं इ) ।
६ सौरमेयी (इ वं वं इ) ।
७ शीलातुरा (वं वं वं इ) ।
८ वासन्तिका (इ इ इ वं) ।
९ मन्दहासा (वं इ इ वं) ।
१० शिशिरा (इ वं इ वं) ।
११ वैधात्री (वं वं इ वं) ।
१२ शङ्खचूडा (इ इ वं वं) ।
१३ रमणा (वं इ वं वं) ।
१४ कुमारी (इ वं वं वं) ।

३. 'इन्दुमा' नाम्नः तृतीयभेदस्योदाहरणं कुमार-सम्भवे पञ्चदशसर्गे प्रोक्तं यत्–

वं चमूप्रभुं मन्मथमर्दनात्मजं,
वं विजित्वरीभिर्विजयश्रियाऽऽश्रितम् ।
इ श्रुत्वा सुराणां पृतनाभिरागतं,
इ चित्ते चिरं चुक्षुभिरे महासुराः ।।

६. 'सौरमेयी' नाम्नः षष्ठभेदस्योदाहरणं यथा–

इ सङ्गेन वो तपस्विनः पशुः
वं वराक एषोऽन्तमवाप्स्यति ध्रुवम् ।
वं अतस्कर-तस्कर-सङ्गमे यथा,
इ तद् वो निहन्मि प्रथमं तसोऽप्यमुम् ।।

७. 'शीलातुरा' नाम्नः सप्तभेदस्योदाहरणं यथा–

वं ततः क्रुधा विस्फुरिताऽधराधरा,
वं सहारको दर्पित दोर्बलोद्धतान् ।
वं युधे त्रिलोकी जयकेलिलालसः,
इ सेनापतीन्सन्नहनार्थमादिशत् ।।

९. 'मन्दहासा' नाम्नः नवमभेदस्योदाहरणं यथा–

वं स जामदग्न्यः क्षयकालरात्रिकृत् ,
इ स क्षत्रियाणां समराय वल्गति ।
इ येन त्रिलोकी सुभटेन तेन ते ,
वं कुतोऽवकाशः सह विग्रहग्रहे ॥

१०. 'शिशिरा' नाम्नः दशमभेदस्योदाहरणं यथा–

इ साऽवज्ञमुन्मील्य विलोचने सकृत् ,
व क्षणं मृगेन्द्रेण सुषुप्सुना पुनः ।
इ सैन्यान्न यातः समयाऽपि विव्यथे ,
व कथं सुराजम्भव मन्यथाऽथवा ॥

११. 'वैधात्री' नाम्नः एकादशभेदस्योदाहरणं यथा–

व प्रयान्ति मन्त्रैः प्रशमं भुजङ्गमाः ,
व न मन्मसाध्यास्तु भवन्ति धातवः ।
इ केचिच्च काञ्चिच्च दशान्ति पन्नगाः ,
इ सदा च सर्वञ्च तुदन्ति धातवः ॥

१२. 'शङ्खचूडा' नाम्नो द्वादशभेदस्योदाहरणं यथा–

इ श्रुत्वेति वाचं वियतो गरीयसी ,
इ क्रोधादहङ्कारपरो महासुरः ।
वं प्रकम्पिताशेष जगत्त्रयोऽपि सन्–
वं न कम्पतोच्चैर्दिवमभ्यधाच्च सः ॥

१३. 'रमणा' नाम्नो त्रयोदशभेदस्योदाहरणं यथा–

वं बलीबलारातिबलाऽतिशासनं ,
इ दिग्दन्तिनादद्रवनाशनस्वनम् ।
वं महीधराम्भोधि न वारितक्रमं ,
वं ययौ रणं घोरमथाऽधिरुह्य सः ॥

१४. 'कुमारी' नाम्नश्चतुर्दशभेदस्योदाहरणं यथा–

इ दासीकृताऽशेषजगत्त्रयं न मां ,
वं जिगाय युद्धे कतिशः शचीपतिः ।
वं गिरीशपुत्रस्य बलेन साम्प्रतं ,
वं ध्रुवं विजेतेति स का कुतोऽहसत् ॥

अन्यान्युदाहरणान्यपि स्थाने स्थाने काव्येषु दृश्यन्ते ।

**'प्रमिताक्षरा'** वृत्तं कथ्यते—

तल्लक्षणमाह–

**"प्रमिताक्षरा सजससैरुदिता"** । यत्र सगण-जगणौ सगणौ च सा प्रमिताक्षरा वृत्तमिति ।

तस्योदाहरणं यथा मम–

**परिशुद्धबोधवचनातिशयैः ,**
**प्रमिताऽक्षराऽपि जिनभावयुता ।**
**परिषिञ्चती श्रवणयोरमृतं ,**
**जिनभारती हरति मे हृदयम् ॥**

| प्रमितपाक्षरा वृत्तम् | सगण: | जगण: | सगण: | सगण: |
|---|---|---|---|---|
| | परि शु | द्ध बोध | वचना | तिशयै: |
| | IIS | ISI | IIS | IIS |

(३) 'द्रुतविलम्बितं' वृत्तं कथ्यते—

तल्लक्षणमाह—

द्रुतविलम्बितमाह नभौभरौ। न-भ-भ-रैर्द्रुतविलम्बित-माह। यत्र छन्दसि नगण-भगणौ भगण-रगणौ च तद् द्रुतविलम्बितं वृत्तं ज्ञेयम्। पादे यतिः।

तस्योदाहरणं यथा मम—

**द्रुतविलम्बितचारुविकालकं ,**
**जिनवराम्बुपदार्चनपूजनम् ।**
**भवभवान्तरजन्मविदारणं ,**
**जिनवरार्चनमङ्गलमङ्गलम् ॥**

| द्रुतविलम्बित वृत्तम् | नगण: | भगण: | भगण: | रगण: |
|---|---|---|---|---|
| | द्रुतवि | लम्बित | चारुवि | कालकम् |
| | III | SII | SII | SIS |

(४) 'तोटकं' वृत्तं कथ्यते—

तल्लक्षणमाह–

**"इह तोटकमम्बुधिसैः प्रथितम्"** । अम्बुधिसैश्चतुर्भिः सगणैः। पादे यतिः । सगणचतुष्कं यत्र तत् तोटकम् ।

तस्योदाहरणं यथा मत् कृतिः –

**त्यज कांचनकामिनिसङ्ग सदा ,**
**भज पार्श्वप्रभुं नितमोक्षकरम् ।**
**जिननायक-शान्तिकरं सुभगं ,**
**भवभञ्जनशीलसुशीलवरम् ॥**

| | | | | |
|---|---|---|---|---|
| तोटक-वृत्तम् | सगणः | सगणः | सगणः | सगणः |
| | त्यज कां | चन का | मिनिसं | ग सदा |
| | IIS | IIS | IIS | IIS |

अन्योदाहरणमपि यथा–

**मणिना वलयं वलयेन मणि-**
**र्मणिना वलयेन विभाति करः ।**
**पयसा कमलं कमलेन पयः ,**
**पयसा कमलेन विभाति सरः ॥**

(५) 'कुसुमविचित्रा' छन्दः कथ्यते—

तल्लक्षणमाह–

**"न-य सहितौ न्यौ कुसुमविचित्रा"** । द्वयोरपि पादे यतिः ।

तस्योदाहरणं यथा–

**विगलितपापा जिनपतिमुद्रा ,**
**विगलिततापा कुसुमसनाथा ।**
**सचरणपूता मुदमयमोहा ,**
**कथयति मुद्रा कुसुमविचित्रा ॥**

| कुसुम-विचित्रा छन्दः | नगणः | यगणः | नगणः | यगणः |
|---|---|---|---|---|
| | विगलि | त पापा | जिनप | ति मुद्रा |
| | ।।। | ।SS | ।।। | ।SS |

(६) 'जलोद्गतिः' छन्दः कथ्यते—

तल्लक्षणमाह–

**"रसै जंस जसा जलोद्गतिः"** । रसाश्च रसाश्चेत्येक-शेषे षड्भिश्च यतिः ।

तस्योदाहरणं यथा–

**यदीय हलतो विलोक्य विपदं ,**
**कलिन्दतनया - जलोदृतगतिः ।**
**विलास विपिनं विवेश सहसा ,**
**करोतु कुशलं हली स जगताम् ।।**

| जलोद्गति छन्दः | जगणः | सगणः | जगणः | सगणः |
|---|---|---|---|---|
| | यदीय | हलतो | विलोक्य | विपदं |
| | ।ऽ। | ।।ऽ | ।ऽ। | ।।ऽ |

(७) 'भुजङ्गप्रयातं' वृत्तं कथ्यते ।

तल्लक्षणमाह–

**"भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः"** । यगणचतुष्कं यत्र तद् भुजङ्गप्रयातम् ।

तस्योदाहरणं यथा मम–

**नमो वर्द्धमानाय तीर्थंकराय ,**
**सुदेवाधिदेवाय देवार्चनाय ।**
**तथा योगिनाथाय विश्वेश्वराय ,**
**जिनेन्द्राय सर्वज्ञ-मोक्षप्रदाय ।।**

| | | | | |
|---|---|---|---|---|
| भुजङ्ग प्रयातं वृत्तम् | यगणः | यगणः | यगणः | यगणः |
| | नमो व | र्द्ध माना | य तीर्थं | क राय |
| | ISS | ISS | ISS | ISS |

**त्रयोदशाक्षरवृत्तं प्रहर्षिणी** नाम कथ्यते—

तल्लक्षणमाह—

**"त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् ।"** यत्र मगण-नगण-जगण-रगणाः गुरुवर्णश्च त्रिभिर्दशभिश्च विरामः सा **'प्रहर्षिणी'** वृत्तं ज्ञेयमिति ।

अन्यच्च **"म्नौ ज्रौ गस्त्रिदशयति प्रहर्षिणीयम् ।"** यस्या पादे त्रिभिर्दशभिश्च यतिः विद्यते । अन्यच्च 'प्रहर्षिणी म्नौ ज् रौ ग् त्रिक् दशकौ ।'

तस्योदाहरणं यथा पण्डितश्रीजगन्नाथेन प्रोक्तं यत्—

**स्वच्छन्दं दलदरविन्द ! ते मरन्दं ,**
**विदन्तो विदधतु गुञ्जितं मिलिन्दाः ।**
**आमोदनथ हरिदन्तराणि नेतुं ,**
***नैवान्यो जगति समीरणात् प्रवीणः ॥ १ ॥***

| प्रहर्षिणी वृत्तम् | मगणः | नगणः | जगणः | रगणः | गु, |
|---|---|---|---|---|---|
| | स्वच्छन्दं | दलद | रविन्द | ते मर | न्दं |
| | SSS | III | ISI | SIS | S |

**मत्तमयूरवृत्तं** कथ्यते—

तल्लक्षणमाह—

**"वेदैरन्ध्रैर्म्तौ यसगा मत्तमयूरम् ।"** यत्र मगण-तगण-यगण-सगणाः गुरुवर्णश्च चतुर्भिः नौभिश्च विरामः स्यात्, तद् '**मत्तमयूरवृत्तं**' भवति ।

तस्योदाहरणं यथा—

**पुष्टस्कन्धो प्रांसुलहस्तायतनेत्रः,**
**कम्बूग्रीवः पीनशरीरस्तनु लेमा ।**
**व्यूढोरस्कः केसरीसिंहानतमध्यः,**
**भुङ्क्ते राज्यं मत्तमयूराऽऽकृतिनेत्रः ।।**

| मत्तमयूर वृत्तम् | मगणः | तगणः | यगणः | सगणः | गु, |
|---|---|---|---|---|---|
| | पुष्टस्क | न्धो प्रांसु | लहस्ता | यतने | त्रः |
| | SSS | SSI | ISS | SSI | S |

**चतुर्दशाक्षरवृत्तं वसन्ततिलका** नाम कथ्यते--

तल्लक्षणं यथा-

**"ज्ञेया वसन्ततिलका तभजा जगौ गः ।"** यत्र तगण-भगण-जगण-जगणाः, गुरुद्वयं च सा **'वसन्ततिलका'** वृत्तं भवति ।

तस्योदाहरणं यथा-

**तुभ्यं नमस्त्रिभुवनार्त्तिहराय नाथ !,**
**तुभ्यं नमः क्षितितलामलभूषणाय ।**
**तुभ्यं नमस्त्रिजगतः परमेश्वराय ,**
**तुभ्यं नमो जिन ! भवोदधि-शोषणाय ।।**

[इति श्रीमदाचार्यमानतुङ्गसूरीश्वरविरचिते श्रीभक्तामरस्तोत्रे श्लोके २६ तमे प्रोक्तम् ।]

| वसन्त-तिलका वृत्तम् | तगणः | भगणः | जगणः | जगणः | गु, | गु, |
|---|---|---|---|---|---|---|
| | तुभ्यं न | मस्त्रिभु | वनार्त्ति | हराय | ना | थ |
| | ऽऽ। | ऽ।। | ।ऽ। | ।ऽ। | ऽ | ऽ |

**यथा मत्कृतिः-**

**लावण्यसूरिपमणेर्बुधदक्षशिष्य-**
**तस्यान्तिषत्क मुनिराजसुशीलदृब्धम् ।**
**रम्यं किलाष्टकमिदं विबुधार्थजात-**
**मा पुष्पदन्तमनिशं पठतां शिवः स्यात् ।।**

**पञ्चदशाक्षरवृत्तं 'मालिनी'** नाम कथ्यते--

तल्लक्षणमाह–

**"ननमयययुतेयं 'मालिनी' भोगिलोकैः ।"** यत्र नगण-नगण-मगण-यगण-यगणाः अष्टभिः सप्तभिश्च विरामः स्यात् सा **'मालिनी'** वृत्तं भवति ।

तस्योदाहरणं यथा–

**मनुज भुवि सुधेयं शब्दमाधुर्ययुक्ता ,**
**सकलकविजनानां हर्षदा नाममाला ।**
**गुरुपदकजयुग्मे यार्ऽपिता भक्तिभावा-**
**ज्जगति विजयते सा विस्तृता कोशरूपा ।।**

[इति सुशीलनाममालायां प्रोक्तम् ।]

**षोडशाक्षरवृत्तं 'पञ्चचामरं'** नाम कथ्यते ।

तल्लक्षणमाह–

**"प्रमाणिका पदद्वयं वदन्ति पञ्चचामरम् ।"** अथवा **"लघुर्गुरुर्लघुर्गुरुरित्येवं षोडशाक्षरपर्यन्तं स्यात् तत् पञ्च-चामरम्"** इति ।

तस्योदाहरणं यथा–

**नमामि नेमितीर्थपं सदा सुशीलशालिनं ,**
**समस्तसूरिचक्रचक्रवर्त्तिताविराजिनम् ।**
**प्रदीप्रदीपमालिकाधिकप्रकाशशालिकां ,**
**विधाय विश्वनालिकां दधानमात्मसम्भवम् ।। १ ।।**

[इत्यस्मत्प्रगुरुदेवाचार्यप्रवरश्रीमद्विजयलावण्यसूरीश्वर-विरचितश्रीदेवगुर्वष्टके प्रोक्तमिदम् ।]

| पञ्चचा-मर वृत्तम् | जगणः | रगणः | ल, | गु, | जगणः | रगणः | ल, | गु, |
|---|---|---|---|---|---|---|---|---|
| | नमामि | नेमिती | र्थ | पं. | सदा सु | शीलशा | लि | नम् |
| | ISI | SIS | I | S | ISI | SIS | I | S |

तथैव मत्कृतिरपि यथा–

**जिनेश्वरं नमाम्यहं जिनेश्वरं नमाम्यहं ,**
**जिनोत्तमं नमाम्यहं जिनोत्तमं नमाम्यहम् ।**
**जिनाधिपं नमाम्यहं जिनाधिपं नमाम्यहं ,**
**जिनप्रभुं नमाम्यहं जिनप्रभुं नमाम्यहम् ।।**

## अथ सप्तदशाक्षरवृत्तानि

तत्र (१) 'शिखरिणी' वृत्तं कथ्यते ।

तल्लक्षणं यथा–

"**रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी ।**" यत्र यगण-मगण-नगण-सगण-भगणाः लघुवर्णः गुरुवर्णश्च षड्भिः एकादशभिश्च विरामः स्यात् सा '**शिखरिणी**' वृत्तं भवति । रसैः षड्भीरुद्रैरेकादशभिच्छिन्ना यतिमती ।

तस्योदाहरणं यथा मम–

**सदा क्रीडन्तं सच्चरणजलधौ नौ वरगुणैः,**
**सुशीलालङ्कारो-ल्लसिततनुवल्ली सुललितम् ।**
**सुविद्वद्वृन्दालि-स्तुतविबुधतं सद्गुणयुतः,**
**स्तुवे तं सूरीशं प्रगुरुवरलावण्यमुनिपम् ।। १ ।।**

[इति प्रगुरुदेवाचार्यश्रीमद्विजयलावण्यसूरीश्वराष्टके प्रोक्तमिदम् ।]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| शिखरिणी वृत्तम् | यगणः | मगणः | नगणः | सगणः | भगणः | ल, | गु, |
| | सदा क्री | डन्तं स | च्चरण | जलधौ | नौ वर | गु | णैः, |
| | ISS | SSS | III | IIS | SII | I | S |

(२) 'पृथ्वी' वृत्तं कथ्यते—

तल्लक्षणमाह–

**"जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।"** यस्मिन् वृत्ते जगण-सगण-जगण-सगण-यगणाः लघुवर्णः गुरुवर्णश्च अष्टभिर्नवभिश्च विश्रामः, तत्र **पृथ्वीनामवृत्तं** भवति ।

तस्योदाहरणं यथा–

**वरं विभववन्ध्यता सुजनभावभाजां नृणा-**
**मसाधुचरितार्जिता न पुनरूर्जिता सम्पदः ।**
**कृशत्वमपि शोभते सहजमायतौ सुन्दरं ,**
**विपाकविरसा न तु श्वयथुसम्भवा स्थूलता ।। १ ।।**

[इति श्रीसोमप्रभाचार्यविरचित-सूक्तिमुक्तावल्यां प्रोक्त-मिदम् ।]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| पृथ्वी वृत्तम् | जगणः | सगणः | जगणः | सगणः | यगणः | ल, | गु, |
| | वरं वि | भवव | न्ध्यतासु | जनभा | वभाजां | नृ | णाम् |
| | ।ऽ। | ।।ऽ | ।ऽ। | ।।ऽ | ।ऽऽ | । | ऽ |

(३) 'मन्दाक्रान्ता' वृत्तं कथ्यते—

तल्लक्षणमाह—

"**मन्दाक्रान्ता-म्बुधिरसनगै-र्मोभनौगौय युग्मम्**" । यस्यां मगण-भगण-नगणाः गुरुद्वयं ततश्च यगणद्वयं चतुर्भिः षड्भिः सप्तभिश्च विश्रान्तिः स्यात् सा मन्दाक्रान्ता वृत्तं भवति ।

तस्योदाहरणं यथा—

**भो भो भव्या ! शृणुत वचनं प्रस्तुतं सर्वमेतद् ,**
**ये यात्रायां त्रिभुवन-गुरो-रार्हता भक्तिभाजः ।**
**तेषां शान्तिर्भवतुभवता - मर्हदादि - प्रभावा- ,**
**दारोग्यश्री-धृतिमति-करी क्लेश-विध्वंसहेतुः ।। १ ।।**

[इति श्रीबृहच्छान्तिनाम नवमस्मरणे प्रोक्तमिदम् ।]

| मन्दा-क्रान्ता वृत्तम् | मगणः | भगणः | नगणः | गु. | गु, | यगणः | यगणः |
|---|---|---|---|---|---|---|---|
| | भो भो भ | व्या शृ | त वच | नं | प्र | स्तुतं स | र्वं मेतद् |
| | SSS | SII | III | S | S | ISS | ISS |

मत्कृतिरपि यथा–

**रोमव्याप्तं पुलकिततमं प्रोन्नमय्यात्मदेहम् ।**
**आङ्गीशोभा रचयति तरां भावमागन्तुकाग्रे ।।**
**दर्शं दर्शं चकिततनयनै-रातिथेयं शरीरम् ।**
**स्नेहं सर्वं वितरति च ते नौमिपादौ सदा हि ।।**

[सुशीलसूरे : रचनामुक्तिकायामिति ।]

(४) 'हरिणी' वृत्तं कथ्यते––

तल्लक्षणमाह–

**"रसयुगहयैन्सौम्रौस्लौगो यदा हरिणी तदा ।"** यस्मिन् वृत्ते नगण-सगण-मगण-रगण-सगणाः लघुगुरू च षड्भिः चतुर्भिः सप्तभिश्च विरामः स्यात् तत्र हरिणीवृत्तं ज्ञेयमिति ।

तस्योदाहरणं यथा–

**हरति कुमतिं भिन्ते मोहं करोति विवेकितां ।**
**वितरति रतिं सूते नीतिं तनोति गुणावलिम् ।।**
**प्रथयति यशो धत्ते धर्मं व्यपोहति दुर्गतिं ।**
**जनयति नृणां किं नाभीष्टं गुणोत्तमसङ्गमः ।।**

[इति श्रीसोमप्रभाचार्यविरचित - सिन्दूरप्रकरणे प्रोक्तमिदम् ।]

| हरिणी वृत्तम् | नगणः | सगणः | मगणः | रगणः | सगणः | ल, | गु, |
|---|---|---|---|---|---|---|---|
| | हरति | कुमतिं | भिन्ते मो | हं करो | ति विवे | कि | ताम्, |
| | ।।। | ।।ऽ | ऽऽऽ | ऽ।ऽ | ।।ऽ | । | ऽ |

मत्कृतिरपि यथा–

**नयति सुमतिं भिन्ते पापं तनोति विनीततां ।**
**वितरति रतिं सूते कीर्त्ति करोति विवेकिताम् ।।**
**कुरुत सुकृतं धत्ते धर्मं व्यपोहति दुर्नयं ।**
**जनयति नृणां शीलस्य श्रीजिनोत्तमसङ्गमः ।।**

(१) अष्टादशाक्षरवृत्तं '**चित्रलेखा**' कथ्यते––

तल्लक्षणं यथा–

**"मन्दाक्रान्ता नयुगलजठरा कीर्त्तिता चित्रलेखा ।"**

**"वर्णाश्वैर्मनननततमकैः कीर्तिता चित्रलेखा ।"**
मन्दाक्रान्तासमानमिदं वृत्तं चित्रलेखा, किन्तु अयमेव विशेषः अस्मिन् वृत्ते, मध्ये नगणद्वयम् अर्थात् मन्दाक्रान्तायां मध्ये पञ्चलघवो वर्णा भवन्ति, अस्यां तु षट् इति ।

तस्योदाहरणं यथा–

**शङ्केऽमुष्मिञ्जगति मृगदृशां साररूपं यदासी-**
**दाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि ।।**
**नैतादृक् चेत् कथमुदधिसुता-मन्तरेणाच्युतस्य ।**
**प्रीतं तस्यां नयनयुगलं चित्रलेखाद्भुतायाम् ।।**

| चित्र-लेखा वृत्तम् | मगणः | गु, | नगणः | नगणः | गु, | गु, | यगणः | यगणः |
|---|---|---|---|---|---|---|---|---|
| | शङ्केऽमु | ष्मि | ञ्जगति | मृगदृ | शां | सा | ररूपं | यदासी |
| | SSS | S | ।।। | ।।। | S | S | ।SS | ।SS |

(१) एकोनविंशत्यक्षरं **'शार्दूलविक्रीडितं'** वृत्तं कथ्यते—

तल्लक्षणमाह–

**"सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।"** यस्मिन् छन्दसि मगण-सगण-जगण-सगण-तगण-तगणाः गुरुवर्णश्च द्वादशभिः सप्तभिश्च विरामः स्यात् तत्र **'शार्दूलविक्रीडितं'** वृत्तम् ।

तस्योदाहरणं यथा–

**वीरः सर्वसुरासुरेन्द्रमहितो वीरं बुधाः संश्रिताः ।**
**वीरेणाभिहतः स्वकर्मनिचयो वीराय नित्यं नमः ॥**
**वीरात् तीर्थमिदं प्रवृत्तमतुलं वीरस्य घोरं तपो ।**
**वीरे श्रीधृतिकीर्त्तिकान्तिनिचयः श्रीवीर भद्रं दिशः ॥**

[इति श्रीसकलार्हत्स्तोत्रे कथितमिदम् ।]

| शार्दूल विक्रीडित वृत्तम् | मगणः | सगणः | जगणः | सगणः | तगणः | तगणः | गु, |
|---|---|---|---|---|---|---|---|
| | वीरःस | र्वसुरा | सुरेन्द्र | महितो | वीरं बु | धाः संश्रि | ताः |
| | SSS | IIS | ISI | IIS | SSI | SSI | S |

मत्कृतिरपि यथा–

**यत् साक्षात्कृतिगोचरत्वनियतं वस्तुत्वमन्यादृशं ।**
**यत् साक्षात्कृतिगोचरत्ववियुतं नेकान्तमेकान्तगम् ॥**
**तं वीरं भवहेतुलेशवियुतं भुक्त्येनालिङ्गितं ।**
**वन्दे पूज्यतमं विपक्षविफलं मान्यागमं सर्वदा ॥**

[इति मया सुशीलसूरिणा विरचिते 'श्रीषड्दर्शन-दर्पणम्' नामग्रन्थे प्रोक्तमिदम् ।]

(१) एकविंशत्यक्षरवृत्तं '**स्रग्धरा**' नाम कथ्यते—

तल्लक्षणमाह–

**"म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम् ।"** अस्यां छन्दसि एकविंशति-अक्षराः भवन्ति । अत्र मगण - रगण - भगण - नगण - यगण-यगण-यगणाः सप्तभिः सप्तभिः सप्तभिः वर्णैः विरामः स्यात् सा '**स्रग्धरा**' भवति ।

तस्योदाहरणं यथा–

**"संतोषस्थूलमूलः प्रशमपरिकरः स्कन्धबन्धप्रपञ्च ।**
**पञ्चाक्षीरोधशाखः स्फुरदभयदलः शीलसम्पत्प्रवालः ।।**
**श्रद्धाम्भः पूरसेकाद् विपुलकुलबलैश्वर्यसौन्दर्यभोगः ।**
**स्वर्गादिप्राप्तिपुष्पः शिवपदफलदः स्यात् तपः पादपोऽयम् ।।**

[इति श्रीसिन्दूरप्रकरणे श्लोक-८४ प्रोक्तमिदम् ।]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| स्रग्धरा वृत्तम् | मगणः | रगणः | भगणः | नगणः | यगणः | यगणः | यगणः |
| | संतोष | स्थूल मू | लः प्रश | मपरि | करः स्क | न्धबन्ध | प्रपञ्च |
| | SSS | SIS | SII | III | ISS | ISS | ISS |

मत्कृतिरपि यथा—

**नानाविद्याब्धिदेवाचलविमलधिया मुक्तिसौभाग्यभाजां ।**
**श्रीमल्लावण्यसूरीश्वरप्रगुरुसतां दक्षनाम्नो गुरोश्च ।।**
**आसाद्यानुग्रहं चाऽष्टकमिदममलं श्रीसुशीलेन दृब्धं ।**
**नित्यं भव्यात्मनां वै श्रुतिपठनकृतां मोददानाय भूयात् ।।**

[इति श्रीधातुरत्नाकरग्रन्थस्य पञ्चमविभागादुद्धृतमिदम् ।]

## ❀ अथ विषमच्छन्दांसि ❀

(१) **'पुष्पिताग्रा'** वृत्तं कथ्यते ।

तल्लक्षणमाह—

**"अयुजि नयुगरेफतो यकारो, युजि तु नजौ जरगाश्च पुष्पिताग्रा ।"** विषमे नयुगरेफतो यकाराः युजि समे न-ज-न-र-गुरवस्तद् 'पुष्पिताग्रा' नाम । इयमप्यौपच्छन्दसिकान्तभूतैव विशेषसंज्ञार्थमिहोक्ता । अत्र च विषमे प्रथमे तृतीये पादे नगणद्वयं रगण-यगणौ च, युजि तु अर्थात् द्वितीये चतुर्थे पादे तु नगण-जगण-जगण-रगणाः गुरुवर्णश्च स्यात्, सा **'पुष्पिताग्रा'** भवति ।

तस्योदाहरणं यथा—

**कमलिनि ! मलिनी करोषि चेतः ।**
**किमिति बकैरवहेलितानभिज्ञैः ।।**
**परिणतमकरन्दमार्मिकास्ते ।**
**जगति जयन्ति चिरायुषो मिलिन्दाः ।।**

[इति श्रीपण्डितजगन्नाथविरचित - भामिनीविलास-ग्रन्थे प्रोक्तमिदम् ।]

॥ प्रथम–तृतीयपादयोः 卐 द्वितीय–चतुर्थपादयोः ॥

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| पुष्पिताग्रा वृत्तम् | नगणः | नगणः | रगणः | यगणः | नगणः | जगणः | जगणः | रगणः | गु, |
| | कमलि | नि ! मलि | नीकरो | षि चेतः | किमिति | बकैर | वहेलि | तानभि | ज्ञैः |
| | ।।। | ।।। | ऽ।ऽ | ।ऽऽ | ।।। | ।ऽ। | ।ऽ। | ऽ।ऽ | ऽ |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| सुन्दरी वृत्तम् | सगणः | सगणः | जगणः | गु, | सगणः | भगणः | रगणः | ल | गु, |
| | विहितां | प्रियया | मनः प्रि | या, | मथ नि | श्रित्य गि | रं गरी | य | सीम् |
| | ।।ऽ | ।।ऽ | ।ऽ। | ऽ | ।।ऽ | ऽ।। | ऽ।ऽ | । | ऽ |

(२) 'सुन्दरी' वृत्तं कथ्यते—

तल्लक्षणमाह–

**"अयुजोर्यदि सौ जगौ युजोः, सभराल्लगौ यदि सुन्दरी तदा ।।"** यस्मिन् छन्दसि अयुग्मे प्रथम-तृतीयपादयोः सगण-सगण-जगणाः गुरुवर्णश्च युग्मे द्वितीय-चतुर्थपादयोः सगण-भगण-रगणाः लघुवर्णः गुरुवर्णश्च स्यात्, सा 'सुन्दरी' भवति । तथैव वियोगिनी, वैतालियादिः, अस्या एव नामान्तरं ज्ञेयमिति ।

तस्योदाहरणं यथा–

**विहितां प्रियया मनः प्रिया-**
**मथ निश्चित्य गिरं गरीयसीम् ।**
**उपपत्तिमदूर्जिताशयं ,**
**नृपमूचे वचनं वृकोदरः ।।**

[इति श्रीभारविकविना प्रोक्तं किरातार्जुनीये ।]

(३) 'उद्गता' वृत्तं कथ्यते—

तल्लक्षणमाह–

**प्रथमे सजौ यदि सलौ च ।**
**न सजगुरुकाण्यनन्तरम् ।।**

**यद्यथ भनजलगाः स्युरथो ।**
**सजसा जगौ च भवतीयमुद्गता ॥**

अस्मिन् वृत्ते प्रथमपादे सगण-जगण-सगणाः लघु-वर्णश्च, तदनन्तरं द्वितीयपादे नगण-सगण-जगणाः गुरु-वर्णश्च, तदनुतृतीयपादे भगण-नगण-जगणाः लघुवर्णः गुरुवर्णश्च, तदनन्तरं चतुर्थपादे सगण-जगण-सगण-जगणाः गुरुवर्णश्च स्यात्, सा उद्गतानाम छन्दो भवति ।

तस्योदाहरणं यथा–

**अथ वासवस्य वचनेन ,**
**रुचिरवदनस्त्रिलोचनम् ।**
**क्लान्तिरहितमभिराधयितुं ,**
**विधिवत् तपांसि विदधे धनञ्जयः ॥**

[इति श्रीकिरातार्जुनीयकाव्ये कथितमिदम् ।]

१ **अथ द्वाविंशत्यक्षरवृत्तं 'भद्रकं'** कथ्यते—

तल्लक्षणमाह–

**"भ्रौ नरनारनावथगुर्दिगर्कविरतं हि भद्रकमिदम् ।"**

यस्मिन् वृत्ते भगण-रगणौ नगण रगण नगणा रगण-

उद्गता वृत्तम्

प्रथमपादस्य 卐 द्वितीयपादस्य

| सगण: | जगण: | सगण: | ल, | नगण: | सगण: | जगण: | गु, |
|---|---|---|---|---|---|---|---|
| अथ वा | सवस्य | वचने | न, | रुचिर | वदन | स्त्रिलोच | नम् |
| IIS | ISI | IIS | I | III | IIS | ISI | S |

तृतीयपादस्य 卐 चतुर्थपादस्य

| भगण: | नगण: | जगण: | ल, | गु, | सगण: | जगण: | सगण: | जगण: | गु, |
|---|---|---|---|---|---|---|---|---|---|
| क्लान्तिर | हितम | मिराध | यि | तुं, | विधिवत् | तपांसि | विदधे | धनञ्ज | य: |
| SII | III | ISI | I | S | IIS | ISI | IIS | ISI | S |

नगणौ गुरुश्चैकः स्युः तथा दशभिः द्वादशभिश्चाक्षरैः विरामो भवेत् तत्र 'भद्रकं' नाम वृत्तं भवति ।

तस्योदाहरणं यथा–

**भद्रकगीतिभिः सकृदपि स्तुवन्ति भव ये भवन्तमनघं,**
**भक्तिपरावनम्रशिरसः प्रणम्य तव पादयोः सुकृतिनः ।**
**ते परमेश्वरस्य पदवीमवाप्य सुखमाप्नुवन्ति विपुलम्,**
**मर्त्यं भुवं स्पृशन्ति न पुनर्मनोहरमुराङ्गनावृत्ताः ।। १ ।।**

अथवा मत्कृतिः–

**श्रीजिनशासने जयति शाश्वतः प्रखरभानुसद्गुणनिधिः,**
**आगमशास्त्रसारसरिताप्रवाहपूतमानसो विजयताम् ।**
**शान्त-पवित्र-चरित्रयुक्तः सदा सकलशिष्यवन्दितपादौ,**
**सद्ज्ञानसागरोऽयं गुरुवर्यश्रीविजयनेमिसूरि जयताम् ।।१।।**

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| भद्रक वृत्तम् | भगणः | रगणः | नगणः | रगणः | नगणः | रगणः | नगणः | गु, |
| | SII | SIS | III | SIS | III | SIS | III | S |
| | श्रीजिन | शासने | जयति | शाश्वतः | प्रखर | भानुसद् | गुणनि | धिः |

२ त्रयो विंशत्यक्षरवृत्तं 'अश्वललितं' कथ्यते--

तल्लक्षणमाह–

**"विकृतौ न्जौ भ्जौ भ्जौ भजभलगास्तदश्वललित-हरार्कयति तत् ।"** यत्र प्रतिपादं क्रमशो नगण-जगण-भगण-जगण-भगण-जगण-भगणानां वर्णास्ततो लघुरेको गुरुश्चैकस्तस्याश्वललितं नाम प्रख्यातं भवति । दशभिर-क्षरैर्यतिश्च कर्त्तव्या । अर्थात्–यदिह शास्त्रे नगण-जगणौ भगण-जगण-भगण-जगण-भगण-लघुगुरवश्च स्युस्तत् अश्वललितं नाम छन्दः । किंभूतं तत् हरार्कयति हरैरेकादशभिरर्कै द्वादशभिर्यतिर्विरामो यत्र तत् ।

तस्योदाहरणं यथा–

**तिरय महान्धकूपमसमान्धकार - भरदुर्विलोकमतुलं ,**
**निपतित - गाढमोहपटलान्धजन्तुविविधप्रलापतुमुलम् ।**
**प्रवचनचक्षुषे क्षत इमं चिराय तनुभृत् तथापि बलव-**
**चपलतरेन्द्रियाश्वललितैर्विकृष्ट इह तत् क्षणान् निवजति ।।**

[अस्मिन् वृत्ते दशमो भगणोऽस्माभिर्न्यस्तः । अत्र सप्तमभगणस्थानेऽपि यतिर्भवति । तत् स्थाने केचिज्जगणमिच्छन्तीति ज्ञेयम् ।]

| अश्व ललितं छन्दः | नगणः | जगणः | भगणः | जगणः | भगणः | जगणः | भगणः | ल, | गु, |
|---|---|---|---|---|---|---|---|---|---|
| | तिरय | महान्ध | कूपम | समान्ध | कारभ | रदुर्दि | लोकम | तु | लं |
| | ।।। | ।ऽ। | ऽ।। | ।ऽ। | ऽ।। | ।ऽ। | ऽ।। | । | ऽ |

३ '**मत्ताक्रीडम्**' वृत्तं कथ्यते—

तस्य लक्षणमाह—

**"मत्ताक्रीडं वस्विष्वाशायतिमयुगगयुगमनुलघुगुरुभिः।"** भगणद्वयेन गुरुद्वयेन मनुलघुभिः चतुर्दशभिः लघुवर्णैः एकेन गुरुणा च यस्य चरणो निबन्धो भवेत् तत् मत्ताक्रीडं नाम वृत्तं भवति। अत्र वसुभिः अष्टाभिः इषुभिः पञ्चभिः आशाभिः दशभिरिति बोध्यम्। अन्यच्च पञ्चभिरक्षरैः पञ्चदशभिरक्षरैः यतिर्भवतीति विज्ञेयम्।

तस्योदाहरणं यथा—

**मुग्धोन्मीलन्मत्ताक्रीडं मधुसमयसुलभमधुरमधुरसाद्,**
**गाने याने किञ्चित्स्पन्दत् पदमरुणनयनयुगलसरसिजम्।**
**रासोल्लास - क्रीडत्कम्रव्रजयुवतिवलयविहित - भुजरसं,**
**सान्द्रानन्दं वृन्दारण्ये स्मरत हरिमनघचरणपरिचयम्॥**

| मत्त- क्रीडा छन्दः | भगणः | भगणः | गु. गु, | ल. ल. लं. लं. ल. ल. ल. ल. ल. ल. ल. ल. ल. ल. | गु. |
|---|---|---|---|---|---|
| | मुग्धोन्मी | लन्मत्ता | क्रीड | मधुसमयसुलभमधुरमधुर | साद् |
| | SSS | SSS | SS | I I I I I I I I I I I I I I | S |

'तन्वी' वृत्तं कथ्यते——चतुर्विंशत्यक्षरं वृत्तमिदम्——

तल्लक्षणमाह–

**"भूतमुनिनैर्यतिरिह्भतनास्भौ भनवाश्च यदि भवति तन्वी ।"**

अथवा–

**"संकृतौ भ्तौ न्सौ भौ न्यौ तन्वी ठैः ।"** यदि छन्दसि भगण-तगणनगणाश्च सगण-भगणौ च भगण-तगण-यगणाश्च स्युः तत्र **'तन्वी'** नाम छन्दो भवति । अस्मिन् वृत्ते भूतैः पञ्चभिः मुनिभिः सप्तभिः इनैः सूर्यैः द्वादशैश्च यतिर्ज्ञातव्येति ।

तस्योदाहरणं यथा छन्दोमञ्जर्याम्–

**माधवमुग्धैर्मधुकरविदितैः कोकिलकूजितमलयसमीरैः,**
**कम्पमुपेताः मलयजसलिलैः प्लवनतोऽप्यविगततनुदाहा ।**
**पद्मपलाशैः विरचितशयना देहज सज्वरभरपरिदूनै-**
**र्निश्वसती सा मुहुरतिपरुषं ध्यानलये तव निवसति तन्वी ।।**

| तन्वी नाम छन्दः | भगणः | तगणः | नगणः | सगणः | भगणः | भगणः | नगणः | यगणः |
|---|---|---|---|---|---|---|---|---|
| | माधव | मुग्धैर्म | धुकर | विदितैः | कोकिल | कूजित | मलय | समीरैः |
| | SII | SSI | II | IIS | SII | SII | III | ISS |

'पञ्चविंशत्यक्षरायाभिकृतिजाति' वर्ण्यते--

क्रौञ्चपदा वृत्तं लक्षणमाह–

**"अभिकृतौ भ्म स्भ नी गाः क्रौञ्चपदा ङ ङ जैः ।"**

अथवा–**"क्रौञ्चपदा भ्मौ स्भौ नननान्गा विषु शरवसु-मुनिविरतिरिह भवेत् ।"**

अथवा–**"क्रौञ्चपदा स्याद् भो भसभाश्चेदिषु शरवसु-मुनिर्यतिरिनलघुगैः ।"** यस्मिन् छन्दसि यदि भगणो भगण-सगण-भगणाश्च स्युः इनैः सूर्यैः द्वादशभिः लघुभिः तत् एकेन गुरुणा च योगः स्यात्, तर्हि तच्छन्दसः क्रौञ्चपदानां स्यात् । यस्मिन् वृत्ते इषुभिः पञ्चभिः शरैः पञ्चभिरष्टभिः मुनिभिः सप्तभिश्च यतिर्भवति ।

तस्योदाहरणं यथा–

**प्रोजम्म्यपुरारित्वद्भययोगान् नृपवर भवदरिरतिशयविधुरो,**
**दूरमरण्यं प्राप्य कलत्रैः सह समजनि गतिरयवशतृषितः ।**
**सारसनादात् सस्वयमादौ प्रसरति कियदपि भुवनमथ सहसा,**
***प्रेक्ष्य चकार क्रौञ्चपदाङ्कां ध्रुवमिहमरिदितिनिगदतिदयिता ।।***

अथवा–

**क्रौञ्चपदाली चित्रिततीरा मदकलरवगकुलखगकुलकलकल-**
**रुचिरा ,**
**फुल्लसरोजश्रेणिविलासा मधुमुदितमधुपखरभसकरी ।**
**फेनविलास प्रोज्ज्वलहासा ललितलहरीभरपुलकित सुतनुः ,**
**पश्य हरेऽसौ कस्य न चेतो हरति तरलगतिरहिमकिरणजा ॥**

| क्रौञ्च | भगणः | मगणः | रगणः | भगणः | नगण | नगणः | नगणः | नगणः | गु, |
|---|---|---|---|---|---|---|---|---|---|
| पदा | प्रोज्म्म्यपु | रारित्वद् | भययो | गान्नृप | वरभ | वदरि | रतिश | यविधु | रो |
| छन्दः | SII | SSS | IIS | SII | III | III | III | III | S |

**अथ षड्विंशत्यक्षरामुत्कृतिजातिवर्णनम्––**

षड्विंशत्यक्षरं '**भुजङ्गविजृम्भित**' वृत्तं कथ्यते—

तल्लक्षणमाह–

**"उत्कृतौ मौ तो निरसल्गा भुजङ्गविजृम्भितं जट्टैः ।"**

अथवा–

**"वस्वीशाश्वच्छेदोपेतं ममतनयुगनरसलगैर्भुजङ्गविजृम्भितम् ।"** यस्मिन् छन्दसि मगण मगण तगण नगण नगण रगण सगणाश्च लघु गुरु स्यात् तर्हि तच्छन्दः

भुजङ्गविजृम्भितनाम स्यात् । अस्मिन् छन्दसि वसुभिरष्टभिः एकादशभिः अश्वैः सप्तभिः छेदेन यत्याः विधानं भवति ।

तस्योदाहरणं यथा—

**क्वापि स्वैरं क्रूर-क्रीडन् ,**
**महिषशतमचकितरतं कुरङ्गकुलं क्वचित् ,**
**क्वापि क्रीडा-व्यग्र-क्रोडं ,**
**क्वचिदपि मदजडविहरन् मतङ्गजसंकुलम् ।**
**सिंह-क्ष्वेडा-रौद्रं क्वापि ,**
**क्वचिदपि विषविषममहाभुजङ्गविजृम्भितं ,**
**श्री - चौलुक्य - क्षोणीनाथ ,**
**स्फुटमजनि भवदरि महीभुजामधुना पुरम् ॥**

अथवा—

**हे लोदञ्चन्न्यञ्चत्पादप्रकटविकट**
**नटनभरो रणत्करतालक-**
**श्चारुप्रेङ्खच्चूडाबर्हः श्रुतितटलनव**
**किसलयस्तरङ्गितहारधृक् ।**
**त्रस्यन्नागस्त्रीभिर्भक्त्या मुकुलितकट**
**कमलयुगं कृतस्तुतिरच्युतः ,**
**पायन्नाशिछन्दन् कालिन्दी हृदकृत**
**निजवसति बृहद् भुजङ्गविजृम्भितम् ॥**

| भुजङ्ग विजृम्भितं | मगण: | मगण: | तगण: | नगण: | नगण: | रगण: | सगण: | ल, | गु, |
|---|---|---|---|---|---|---|---|---|---|
| | क्वापि स्वै | रंक्र र | क्रीडन्म | हिषश: | कितर | तंकुरं | गकुलं | क्व | चित् |
| छन्द: | SSS | SSS | IIS | III | III | SIS | IIS | I | S |

## ❀ सप्तविंशत्यक्षरमारभ्य नानाविधानि दण्डकवृत्तानि सन्ति ❀

**अथ चण्डवृष्टयादिकदण्डकानाह—**

(१) तल्लक्षणमाह—

**"यदिह नयुगलं ततः सप्तरेफास्तदा चण्डवृष्टिप्रपातो भवेद् दण्डकः ।"** यदा इह दण्डकजातौ न युगलं नगणद्वयं ततः सप्तरेफाः सप्तरगणाः स्युः तदा चण्डवृत्ति प्रपातो नाम दण्डको भवति ।

तस्योदाहरणं यथा मम्—

**त्रिभुवनजनमानसाम्भोज - लीलाविधौ हंसकल्पं**
**समूलव्यपास्ताखिलद् ।**
**चरणकरणधारिणं छिन्नदुर्मोहजालं कषायोज्झितं**
**वादिचूडामणिम् ।।**
**तिमिरमदघटामहामोहमेघावली चण्डवृष्टि प्रपाता-**
**कुलेन्द्रं सूर्यम् ।**
**परममहिममन्दिरं शुद्धचारित्रयुक्तं कलानां गृहं**
**वन्दे नेमिसूरिम् ।। १ ।।**

(२) "प्रतिचरणविवृद्धरेफाः स्युरर्णाऽर्णवव्याल-जीमूत-लीलाकरोद्दाम शङ्खादयः ।"

**जपक्षय गतकामतापा जिनेशादि-शान्ति-**
**जिननेमि-पार्श्व-श्रीवीरजिना सौख्यदा ।**
**त्रिदशगणगुरो ! जिनेशो कर्मध्वंसचित्तो !**
**महाज्ञानपूर्णेश्वर ! पातु मां सर्वदा ॥**
**निखिलजनसुपूज्यप्रभो ! सच्छ्रेयस्तरुवर्द्ध-**
**नसुधाधरोऽम्बर ! रक्ष मां सर्वदा ।**
**चरमजिन ! श्रीवीर प्रभो ? भवाम्भोधिघो-**
**रार्णवे वं निम्मज्जन्तमभ्युद्धरोपेत्य नाम् ॥ १ ॥**

चरणे चरणे इति प्रतिचरणं प्रतिपादमित्यर्थः । विवृद्धो रेफो रगणो यत्र ते दण्डकाः अर्णोऽर्णवादयः स्युः । सर्वेषु दण्डकेषु आदौ नगणद्वयमावश्यकं भवति । ततः परं सप्तसु रेफेषु चण्डवृष्टिप्रयातो नाम दण्डकः । एक-रेफ विवृद्धौ अर्थात् नगणद्वयानन्तरमष्टसु रेफेसु **अर्णोनाम दण्डकोऽयम्** ।

एवं नगणद्वयानन्तरं नवसु रेफेषु **अर्णवः**, दशसु **व्यालः**, एकादशसु **जीमूतः**, द्वादशसु **लीलाकरः**, त्रयोदशसु **उद्दामः**, चतुर्दशसु **शङ्खः** दण्डको भवति; आदिपदेन आराम-सङ्ग्रमादयो दण्डका ज्ञेयाः ।

जिनसमूहस्य स्तुतिः–

**समवसरणमत्र यस्याः स्फुरत्केतुचक्रानकानेक-**
**पद्मेन्दुरुक्चामरोत्सर्पिसालत्रयी-**
**सदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्र**
**प्रभागुर्वराराट् परेहितारोचितम् ।।**
**प्रवितरतु समीहितं साऽर्हतां संहतिर्भक्तिभाजां**
**भवाम्भोधिसम्भ्रान्तभव्यालीसेविता- ।**
**ऽसदवनमदशोकपृथ्वीक्षणप्रायशोभातपत्र**
**प्रभागुर्वराराट् परेहितारोचितम् ।। ६४ ।।**

[स्तुतिचतुर्विंशतिकायां प्रोक्तमिति]

**प्रचितकदण्डकस्य** लक्षणमाह–

**"प्रचितकसमभिधो धीरधीभिः स्मृतो दण्डकोनद्वयादुत्तरैः सप्तभिर्यैः ।"** नगणद्वयात् परिवर्तिभिः सप्तभिः यगणैः रचितः धीरधीभिः छन्दोविद्भिः प्रचितकसमभिधः तन्नामा दण्डकः स्मृतः कथितः ।

तस्योदाहरणं यथा–

**गतमद ! रविकुलाम्भोधिचन्द्र ! प्रभो !**
**त्रिशलापुत्ररत्न ! त्रिलोकैकनाथ ! ।**
**प्रचितकपटमघादिमदोद्दामदन्तावलस्तोमविद्रावणे**
**केसरीन्द्र ! ।।**
**चरणप्रखरसुधांशुच्छटोन्मेषनिःशोषितध्यापि चेतो**
**विनष्टान्धकार ।**
**सकलजनपरितापोग्रदावानलोच्छेद मेघ !**
**प्रसीद वीरो जिनदेवः ।। १ ।।**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| प्रचितक दण्डकः | नगणः | नगणः | यगणः | यगणः | यगणः | यगणः | यगणः | यगणः | यगणः |
| | ।।। | ।।। | ।SS | ।SS | ।SS | ।SS | ।SS | ।SS | ।SS |
| | प्रचित | कसम | भिधोधी | रधीभिः | स्मृतोद | ण्डकोन | द्वयादु | त्तरैः स | प्तभिर्यैः |
| कुसुम स्तबकं वृत्तम् | सगणः | सगणः | सगणः | सगणः | सगणः | सगणः | सगणः | सगणः | सगणः |
| | विमलै | श्चरितै | र्भरितै | रखिलै | र्विभवैः | प्रभुता | न्वितया | सुविभा | तितराम् |
| | ।।S | ।।S | ।।S | ।।S | ।।S | ।।S | ।।S | ।।S | ।।S |

**कुसुमस्तबकदण्डकस्य** लक्षणमाह–

"**सगणः सकलः खलु यत्र भवेत् तमिह प्रवदन्ति बुधाः कुसुमस्तबकम् ।**" यत्र यस्मिन् वृत्तौ छन्दसि वा सकलः समस्तसगणः एव भवेत् अर्थात् प्रतिपादे नव सगणाः भवेयुः यस्य च सप्तविंशति-अक्षरधरितपादस्य दण्डकस्य सर्वेऽपि पादाः सगणेनैव रचितः स्यात् तं **कुसुमस्तबकं** नाम दण्डकं प्रवदन्ति ।

तस्योदाहरणं यथा–

**विमलैश्चरितैर्भरितैरखिलैर्विभवैः प्रभुतान्वितया सततं,**
**सफलैः सजलैः सुगुणैः सकला वसुधा निजदेशगता**
**सुविभातितराम् ।**
**सुमतिः कुमतिं परिशोधनके निरता विरता न कदापि**
**भवेदमिता,**
**मनसा वचसा क्रियया सुलभा सुगतिः कुगतिं**
**जयतात् सहजैरमला ॥ १ ॥**

**मत्तमातङ्गलीलाकरदण्डकस्य** लक्षणमाह–

"**यत्र रेफः परं स्वेच्छया गुम्फितः स स्मृतो दण्डको मत्तमातङ्गलीलाकरः ।**" यत्र दण्डके प्रतिचरणं स्वेच्छया परं केवलं रेफः रगणः गुम्फितः निबद्धः स्यात् स मत्तमातङ्ग-लीलाकरो नाम दण्डकः भवेत् ।

तस्योदाहरणं यथा–

**हेमगौरि वशानोंऽशुकं शक्रनीलासिते वर्ष्मणि**
**स्पष्ट दिव्यानुलेपाङ्किते ।**
**तार हारांशुवक्षो नभश्चित्रमालाञ्चितो**
**भव्यभूषोज्ज्वलाङ्गः समंसीरिणा ॥**
**अञ्जनाभाम्बरेणेन्दुकुन्दाभदेहेन लीला-**
**परिहास हासोर्मिकौतूहलैः ।**
**कंसरङ्गाद्रिगः पातु नश्चक्रपाणिर्गति**
**क्रीडया मत्तमातङ्गलीलाकरः ॥ १ ॥**

अनङ्गशेखरदण्डकस्य लक्षणमाह–

**"यत्र दृश्यते गुरो परो लघुः क्रमात् स उच्यते बुधैरनङ्गशेखरदण्डकः ।"** यस्मिन् दण्डके क्रमाद् गुरोः परो लघुवर्णो दृश्यते सः बुधैः छन्दोविद्भिः अनङ्गशेखर-नाम दण्डकः कथ्यते ।

तस्योदाहरणं यथा–

**मूर्ध्नि चारुचम्पकस्रजा सलीलवेष्टनं**
**लसल्लवङ्गचारुचन्द्रिकाकचेषु ।**
**कर्णयोरशोकपुष्पमञ्जरीवतंसको गले**
**च क्रान्तकेसरोपक्लृप्तदाम ॥**
**फुल्लनागकेसरादिपुष्परेणुरूषणं**
**तनौ विचित्रं इत्युपात्त वेश एष ।**
**केशवः पुनातु नः सुपुष्पभूषितः सुमूर्त्ति-**
**मानिवागतो मधुर्विहर्तुमत्र ॥ १ ॥**

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| मत्तमातङ्ग-लीलाकर दण्डक: | रगण: | रगण: | रगण: | रगण: | रगण: | रगण: | रगण: | रगण: | रगण: |
| | SIS | SIS | SIS | SIS | SIS | SIS | SIS | SIS | SIS |
| | यत्ररे | फ: परं | स्वेच्छया | गुम्फित: | सस्मृतो | दण्डको | मत्तमा | तङ्गली | लाकर: |

| | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अनङ्ग-शेखर दण्डक: | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु | गुरु-लघु |
| | SI | SI | SI | SI | SI | SI | SI | SI | SI | SI | SI | SI | SI | SI |

**सिंहविक्रान्तदण्डकस्य** लक्षणमाह–

**"यकारैः कवीच्छानुरोधान्निबन्धैः प्रसिद्धो विशुद्धोऽपरो-दण्डकः सिंहविक्रान्तनामा ।"** कवेः इच्छानुसारं स्थापितैः गणैः सिंहविक्रान्तनामकोऽन्योविख्यातः शुद्धो दण्डको भवति ।

तस्योदाहरणं यथा–

**यदीयं यशः सुप्रसिद्धं विशुद्धं सदागाररूपं सुधर्मादि-**
**सेव्यं मुनीनां समाजे ।**
**सदा वीतरागं विशालं प्रकामं गणिगौतमादि**
**प्रदिष्टं निकामं निरीहम् ।।**
**बुधैः शंसितं संश्रितं साधुभिश्च प्रभक्तैः सुरक्तैः**
**सुशीलैः सुबुद्धैः सदा पूजितं वै ।**
**गुणातीतरूपं सदानन्दशीलं सुधीरं सुवीरं सुतीर्था-**
**धिनाथं जिनेन्द्रं नमामि ।। १ ।।**

**अशोकमञ्जरी** नाम्नो दण्डकस्य लक्षणमाह–

**"स्वेच्छया रजौ क्रमेण सन्निवेशपत्युदारधीः कविः सदण्डकः स्मृतो जगत्यशोकमञ्जरी ।"** उदारबुद्धिः कविर्यदि यदृच्छया यथाक्रमं रगण-जगणौ छन्दे स्थापयति तत्र अशोकमञ्जरी नाम दण्डकः भवति ।

| सिंह-विक्रान्त दण्डकम् | यगण: | यगण: | यगण: | यगण: | यगण: | यगण: | यगण: | यगण: | यगण: | यगण: |
|---|---|---|---|---|---|---|---|---|---|---|
| | ISS | ISS | ISS | ISS | ISS | ISS | ISS | ISS | ISS | ISS |
| | यदीयं | यश: सु | प्रसिद्धं | विशुद्धं | सदागा | ररूपं | सुधर्मा | दिसेव्यं | मुनीनां | समाजे |

| अशोकमञ्जरी दण्डक: | रगण: | जगण: | रगण: | जगण: | रगण: | जगण: | रगण: | जगण: | रगण: | जगण: | रगण: |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | SIS | ISI | SIS | ISI | SIS | ISI | SIS | ISI | SIS | ISI | SIS |
| | स्वेच्छया | रजौक | मेणस | न्निवेश | पत्युदा | रधी:क | वि:सद | ण्डक:स्मृ | तोजग | त्यशोक | मञ्जरी |

तस्योदाहरणं यथा–

अथ च साहित्यविषयकग्रन्थादौ कविना प्रायः शुभफलदत्वात् संयोज्यः शुभगणः। नाऽन्यो विपरीतत्वात्। तथा च तत् स्वरूपनिदर्शकः श्लोकोऽत्र कथ्यते। तथाहि–

**मो भूमिस्त्रिगुरुः श्रियं दिशति यो वृद्धिं जलं चादिलो।**
**रोऽग्निर्मध्यलघुर्विनाशमनिलो देशाटनं सोऽन्त्यगः॥**
**तो व्योमान्तलघुर्धनापहरणं जोऽर्कोरुजं मध्यगो।**
**भश्चन्द्रो यश उज्ज्वलं मुखगुरु-र्नो नाक आयुस्त्रिलः॥ १॥**

इदं च फलं ग्रन्थनेतुः कर्तुः अथवा पठितुः, तेषां यथायोग्यं भवत्येव।

'**वर्णानाश्रित्याऽपि**' फलश्रुतिः कथ्यते—

तस्य श्लोकमाह–

**अवर्णात् सम्पत्तिर्भवति मुदि वर्णाद्धनशता-**
**न्युवर्णादख्यातिः सरभसमृवर्णाद्धरहितात्।**
**तथा ह्यचः सौख्यं ङञणरहितादक्षरगणात्,**
**पदादौ विन्यासाद्भरबहलहाहाविरहितात्॥ १॥**

## ❀ गणदेवतादीनां यन्त्रम् ❀

| गणनाम | मगणः | यगणः | रगणः | सगणः | तगणः | जगणः | भगणः | नगणः |
|---|---|---|---|---|---|---|---|---|
| स्वरूपम् | SSS | ISS | SIS | IIS | SSI | ISI | SII | III |
| देवता | पृथ्वी | जलम् | अग्निः | वायुः | आकाशः | सूर्यः | चन्द्रः | नाकः |
| फलम् | श्रीः | वृद्धिः | विनाशः | भ्रमणम् | धननाशः | रोगः | सुयशः | आयुः |

'अपवादोऽपि' अत्र कथ्यते—

तथाहि—

देवतावाचकाः शब्दाः, ये च भद्रादिवाचकाः ।
ते सर्वे नैव निन्द्याः स्यु-र्लिपितो गणतोऽपि वा ॥ १ ॥

## ❀ द्वितीयपरिच्छेदस्य सारांशः ❀

अद्वितीये द्वितीयेऽस्मिन्, परिच्छेदे मया मुदा ।
वर्णिता च कवेः शिक्षा, छन्दोज्ञानपुरस्सरा ॥ १ ॥

छन्दः शास्त्रार्णवे प्रोक्तं, छन्दसां कौशलं परम् ।
मात्राक्षरविभेदेन, द्विधा छन्दो बुधैर्मतम् ॥ २ ॥

कविता वनिता हासे, प्रकाशे परमेऽद्भुते ।
विषमान्यपि वृत्तानि, विकसन्ति विलसन्त्यपि ॥ ३ ॥

विषमेष्वपि वृत्तेषु, स्यात् प्रवेशोऽल्पमेधसाम् ।
द्वितीयेऽस्मिन् परिच्छेदे, दिङ्मात्रमिह दर्शितम् ॥ ४ ॥

कविना विदुषा भाव्यं, सुगणायोजकेन च ।
फलदः सुगणः प्रोक्तो, नेतरो विपरीततः ॥ ५ ॥

शुभाऽक्षराणां योगोऽपि, फलवान् गुणवान् मतः ।
अतः काव्य-कलापूर्णैः, पूरणीयाः सदक्षराः ॥ ६ ॥

एकः शब्दः सुविज्ञातः, सम्यग्योगमुपागतः ।
करोति कीर्त्ति *प्रीतिञ्च, सत्साहित्यसंयुतः ॥ ७ ॥*

**देवता वाचकाः प्रोक्ताः, ये शब्दा भद्रसूचकाः ।**
**तेषां योगे न दोषोऽस्ति, वर्णतो गणतोऽपि वा ॥ ८ ॥**

**सोदाहरणसङ्केतैः, सज्जितः सार्थकस्सदा ।**
**सुवर्णितः सुशीलेन, सूरिणा सुगमाय च ॥ ६ ॥**

इति श्रीशासनसम्राट्-सूरिचक्रचक्रवर्त्ति-तपोगच्छाधिपति-भारतीयभव्यविभूति - महाप्रभावशालि-अखण्डब्रह्मतेजोमूर्त्ति-श्रीकदम्बगिरिप्रमुखानेकप्राचीनतीर्थोद्धारक-श्रीवलभीपुरनरेशाद्यनेकनृपप्रतिबोधक - चिरन्तनयुगप्रधानकल्प-वचनसिद्ध-सर्वतन्त्रस्वतन्त्र-प्रातःस्मरणीय-परमोपकारि-परमपूज्याचार्यमहाराजाधिराज **श्रीमद्विजयनेमिसूरीश्वराणां** दिव्यपट्टालंकार-साहित्यसम्राट्-व्याकरणवाचस्पति-शास्त्रविशारद-कविरत्न - साधिकसप्तलक्षाधिकश्लोकप्रमाणनूतनसंस्कृत - साहित्यसर्जक-परमशासनप्रभावक-बालब्रह्मचारि-परमपूज्याचार्यप्रवर **श्रीमद्विजयलावण्यसूरीश्वराणां** प्रधानपट्टधर-धर्मप्रभावक-शास्त्रविशारद - कविदिवाकर - स्याद्यन्तरत्नाकराद्यनेकग्रन्थकारक - बालब्रह्मचारि - परमपूज्याचार्यवर्य **श्रीमद्विजयदक्षसूरिवराणां** पट्टधर-जैनधर्मदिवाकर-शास्त्रविशारद - साहित्यरत्न - कविभूषण - बालब्रह्मचारि-**श्रीमद्विजयसुशीलसूरि** संदृब्धायां **साहित्यरत्नमञ्जूषायां द्वितीयः परिच्छेदः ॥** □

३

## ॥ अथ तृतीयः परिच्छेदः ॥

**'कथं कवित्वसंप्राप्तिः ?'** इत्यस्य निरूपणं प्रथमपरिच्छेदे कृतम् । तदनन्तरं **'कवेः शिक्षा च कीदृशी ?'** इत्यस्य निरूपणमपि द्वितीयपरिच्छेदे कथितं च । अत्र **'कश्च काव्ये चमत्कारः ?'** इत्यस्य निरूपणं क्रियते ।

### रसस्वरूपम्

अभिधामूलो विवक्षितान्यपरवाच्यो नाम ध्वनिकाव्ये चमत्कारः । तत्र चमत्कारो नाम आह्लादकत्वम् । तदाह्लादकत्वं ध्वनेः चामत्कारित्वं काव्ये । केषांचित् मतं **'वाक्यं रसात्मकं काव्यम् ।'** रसात्मकता ध्वनेः अनिर्वचनीयता आस्वाद्यन्ते रसज्ञैः ।

प्रोक्तं ध्वनिः प्रथमतो द्विविधः असंलक्ष्यक्रमव्यङ्गेन संलक्ष्यक्रमव्यङ्गेन । यथा असंलक्ष्यक्रमोद्योतः क्रमेण द्योतितः परः विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः ।

प्रथमश्च रसादि रस-रसाभास भाव-भावाभास-भावोदय-भावप्रशम-भावसन्धि, भावशबलता। तत्र रसस्योदाहरणम्—

किमपि मन्दं मन्दं मन्दमासत्तियोगादविरलितकपोलं जल्पतोरक्रमेण। आशिथिलपरिरम्भव्यापृतैकैकदोष्णोरविदित गतयामा रात्रिरेव व्यरंसीत्। रसे कोऽपि विलक्षणः सहृदयानां लोकोत्तरचमत्कारजनकः सम्भोग-शृङ्गाररसास्वादः वाच्यप्रतीत्य व्यवहितोत्तरकालावच्छेदे नैव सम्पद्यते। अत एवोत्पलशतपत्रव्यक्तिभेदवत् तदुभयो प्रतीत्योः क्रमस्य सहृदयैरलक्ष्यमाणतया असंलक्ष्यक्रमव्यङ्गो नाम रसध्वनिरिहावसेयः।

**चमत्कारो नाम-आह्लादकत्वं, स शब्दगतः अर्थगत-श्चेति द्विविधः। शब्दश्रवणमात्रेण विलक्षण-चित्ताह्लादो भवेत्, स शब्दगतः। यथा—**

**शारदा शारदाम्भोज - वदना वदनाम्बुजे।**
**सर्वदा सर्वदाऽस्माकं सन्निधिं सन्निधिं क्रियाम्॥ १॥**

**अर्थगतोऽपि द्विविधः। वाच्यार्थगतः, व्यङ्ग्यार्थ-गतश्चेति।** यत्र च व्यङ्ग्यार्थापेक्षया वाच्यार्थस्यातिशायित्वं, तत्र वाच्यार्थगतः। यथा—

**ये तप्यन्ते तत्तपस्तेपि रे वा तान्पातस्ते कारि तीव्रं तपो हि ।**
**कारिष्यन्ते सिद्धयोथ क्रियन्ते पाचि श्रेयः पच्यते पक्ष्यते वा ।।**

[इति श्रीकलिकालसर्वज्ञश्रीमद्हेमचन्द्राचार्यविरचित श्रीद्वयाश्रयमहाकाव्ये अष्टमसर्गे श्लोक १६ तमे प्रोक्तमिदम् ।]

अन्यमपि–

**एकातपत्रं जगतः प्रभुत्वं,**
**नवं वयः कान्तमिदं वपुश्च ।**
**अल्पस्य हेतोर्बहुहातुमिच्छन्,**
**विचारमूढः प्रतिभासि मे त्वम् ।।**

[इति श्रीकविकालिदासविरचित श्रीरघुवंशकाव्ये प्रोक्तमिदम् ।]

व्यङ्ग्यार्थश्च क्वचिद् रसरूपः, क्वचिद् भावरूपः, क्वचिच्चालङ्कारादिरूपः ।

रसो नाम "विभावानुभावव्यभिचारिभि व्यक्तः" रस-परिपाकः स्थायीभावो रसः ।

विभावादिसमूहालम्बनात्मकावरणभङ्गावच्छिन्नचिदा-नन्द रूपाः रसाः शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भुत-शान्तेति नवप्रभेदाः भावाः रसभूयता-सम्पादकविभावादिसम्पर्करहिताः । स च नवधा शृङ्गारादि-भेदात् तथाहि–

**रतिर्हासश्च शोकश्च, क्रोधोत्साहौ भयं तथा ।**
**जुगुप्सा विस्मयश्चेत्थ-मष्टौ प्रोक्ताः शमोऽपि च ।। १ ।।**

एते आस्वादाङ्कुरमूलभूताः स्थिरतया वर्त्तमानाः स्थायिभावा नव । निर्वेदादयस्त्रयस्त्रिंशद् व्यभिचारिभावाश्च भावपदवाच्या । तदुक्तम्–

**संचारिण प्रधानानि, देवादिविषया रतिः ।**
**उद्बुद्धमात्र स्थायी च, भाव इत्यभिधीयते ।।**

**विभावाः**–'रत्यादिस्थायिभावोद्बोधका विभावाः ।' ते च द्विप्रकाराः आलम्बनोद्दीपनभेदाभ्याम् । यं आलंब्य रसोद्गमः भवति स '**आलम्बनविभावः**' । ये च रसमुद्दीपयन्ति ते '**उद्दीपनविभावाः**' ।

**अनुभावाः**–तत् तत् कारणैरुद्बुद्धं स्थायिभावं ये बहिः प्रकाशयन्ति तेऽनुभावाः ।

**व्यभिचारिभावाः**–'रत्यादिस्थायिभावे ये प्रधानतया प्रभवन्ति वा प्रचलन्ति ते **व्यभिचारिभावाः**' ।

अनौचित्येन प्रवृत्तेर्दुष्टा रसा रसाभासा दुष्टाभावा भावाभासाश्च । तत् प्रशान्ति भावस्य शान्तिः प्रशम्यदवस्था । एवमादिपदेन भावस्योक्तरूपस्योदयः । उद्गमा-

वस्था भावसन्धिः, शमकक्षयोर्युगपदास्वादः। भाव-शबलता-निरवच्छिन्नतया तेषां पूर्व पूर्वोपमर्दिनाम् परेषां आस्वादः। एतादृशो रसादि-अक्रमः। असंलक्ष्यक्रमः अङ्गित्वेन प्रधानतया भासमान सहृदयहृदयाह्लादकतया चर्वणाविषयी भवन् ध्वनेः विवक्षितान्य परवाच्यरूपस्य आत्मा स्वरूपं व्यवस्थितः। श्रीसाहित्यदर्पणग्रन्थेऽपि उच्यते–

**विभावेनाऽनुभावेन, व्यक्तः संचारिणा तथा।**
**रसतामेति रत्यादि स्थायीभावः सचेतसाम्॥**

सात्विकाश्चानुभावरूपत्वान्नपृथगुक्ता। रसवस्थः पटं भावः स्थापितां प्रतिपद्यते। प्रोक्तश्च–

**रसे सारश्चमत्कारः, सर्वत्राप्यनुभूयते।**
**तच्चमत्कारसारत्वे, सर्वत्राऽप्यद्भुतो रसः॥**

अतः साहित्ये काव्ये वा रसस्य चमत्कारित्वं सर्वत्रैव सहृदयैः अनुभूयन्ते। यदुक्तम्–

**"पुण्यवन्त प्रमिण्वान्ति योगिवद् रससन्ततिम्।"** यद्यपि स्वादः काव्यार्थसंमादादात्मनः आनन्दसमुद्भवः, इत्युक्तदिशा रसस्यास्वादनातिरिक्तत्वम्। तथापि **'रसः स्वाद्यन्ते'** इति काल्पनिकं भेदं स्वीकृत्य स्वीकृतं रसः यत् प्रधानोऽयं

अद्यस्ताद् भावेदितः शब्द इति किञ्चिद् विस्तारेण विवेच्यन्ते ।

विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः । अलङ्कारवादिभिस्तु विभावानुभावव्यभिचारिणां संयोगात् समुदायः रसनिष्पत्तिः। रसपदव्यवहारेति सूत्राशयं मन्वानाः विभावादयः त्रयः समुदिता रस इति रसस्वरूपं निरूपयन्ति । श्री**काव्यप्रकाश**ग्रन्थे निराकर्तुं कथितं–"न खलु विभावानुभावव्यभिचारिण एव रसः, अपि तु रसस्तै इत्याह अस्ति क्रमः स तु लाघवान्न लक्ष्यते" इति मम्मटः ।

बहवस्तु विभावादीनां संयोगात् सम्यग्योगात् चमत्कारात् रसनिष्पत्तिः, इति सूत्रार्थवर्णयन्तो विभावादिषु यः प्रधानतया चमत्कारी, स एव रस इति वर्णयन्ति । केचित्तु–"**भाव्यमानो विभावः एव रसः**" इति मन्यन्ते । अन्ये केचित्–"**भाव्यमानोऽनुभावस्तथा**" इति वर्णयन्ति । केचित्तु–"**सञ्चारी एव तादृशः तथा परिणतिः**" इति वर्णयन्ति ।

रसस्य क्व ध्वनित्वम् ? कश्चालङ्कारित्वम् ? इत्युपपद्याद्य तयोरुदाहरणे प्रकाशमपि अत्र अवश्यं विधेयम् । उक्तं वाच्यवाचकचारुत्वहेतूनां विवधात्मनाम् । रसादि-

परता यत्र स ध्वनेः विषयो मतः । ध्वनौ रसस्य महत्त्वं पूर्वमेवोक्तम् । अत्र च विषदीकृत्य वर्णयामः–

यत्र काव्ये रसादयो व्यञ्जनया प्रतीयमानाः प्रधानतया वाक्यार्थीभूता सन्तः विच्छित्तिविशेषाधायकाः भवन्ति । वाच्यं वाचकं तच्चारुत्वहेतवोऽलङ्कारा गुणाश्च प्रधानीभूत-व्यङ्ग्यं च रसाद्युपस्कारा एव सन्ति ।

तत्र रसस्य रसध्वनित्वं भवति, किन्तु प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः । काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः, अर्थात् यत्र काव्ये व्यङ्ग्यरसाद्यपेक्षया वाच्यार्थबोध-विषयीभूतो रसादयस्तु नाति चमत्का-रितयाऽङ्गभूता एव भवन्ति । तत्र रसवदादिः अलङ्कारो भवतीति भावः । तत्र च शृङ्गारे रसध्वनेः उदाहरणम्–

**निद्राकैतविनः प्रियस्य वदने विन्यस्त-वक्त्रं वधूः,**
**बोध-त्रास-निरुद्ध-चुम्बनरस प्याभोग लोलं स्थिता ।**
**वैलस्याद् विमुखी भवेदिति पुनः तस्याप्यनारम्भिणः,**
**साकाक्षप्रतियत्तिनायहृदयं यातं हु पारं रतेः ।।**

रसवदादिस्तु अलङ्कारो द्विविधः । शुद्धः संकीर्णश्च । तत्र शुद्धस्योदाहरणं कलिकालसर्वज्ञश्रीमद्हेमचन्द्राचार्यकृत-श्री **द्वयाश्रयमहाकाव्ये** प्रोक्तं यत्–

नाभिमुखास्तुङ्गनासिका कानासिक्वो लम्बोष्ठ्यः
उन्नतोष्ठाः ।
लम्बोदर्यः कृषोदरा कागड्डा पृथुजङ्घ्चोन्वपुः पिशाच्यः ।।

अन्यच्च–

**सम्थ्नायुः पथिखेतृणां रिपु नृपा अक्षणासमोत्क्रान्तरं ।**
**दघ्नोस्थ्योश्च न जानते स्म मधुनोम्बूनां च पर्याकुलाः ।।**
**अश्वीयानि सुवल्ग्य वल्गिसुमहां स्यत्पूज्ज्यंनूंजि क्षणात् ।**
**तेषां दन्ति कुलानि चालममवन्नाऽस्मिन् रणारम्भिणि ।।**

पुनः संक्षेपेण रसस्य निरूपणम्–रत्यादेरित्यादिपदेन हासोत्साहादयो गृह्यन्ते। लौकिके उत्साहादीनां वक्ष्यमाणानां स्थायिभावानां यानि कारणानि उत्पादकरूपाणि नायकप्रतिनायकादीनि, उद्दीपनरूपाणि, नायकप्रतिनायकचेष्टादीनि यानि कार्याणि, विपक्षाभिमुखगमनादीनि, यानि च सहकारिणि, सहायभूतानि, धृतिगर्वादीनि, तानि नाट्ये काव्ये च चेन्निबोधे परन् क्रमेण विभावाः अनुभावाः व्यभिचारिणश्च कथ्यन्ते। तैर्विभावादिर्व्यक्तः–स्फुटीकृतः विलक्षणप्रतीतिविषयीकृतः इति यावत् स्थायिभावः रसः कथितः।

## ❀ रसभेदाः ❀

शृङ्गारादिभेदात् नवधा रसभेदाः । तथाहि–

**शृंगारहास्यकरुणा-रौद्रवीरभयानकाः ।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ काव्ये रसा स्मृताः ।। १ ।।**

नवमोऽपि शान्तरसः स्वीकृतः । विस्तरेणायं भावः नायिकादिभिः आलम्बनकारणैः चन्द्रचन्द्रिकादिभिः उद्दीपन-कारणैः अनुरागजन्यहावभावादिभिः कार्यैः चिन्तादिभिश्च सहकारिभिः स्थायीभावभूतस्यानुरागविशेषरतेः परिशील-मवरोधसामाजिकानां अन्तःकरणे वासनारूपतया स्थितः लोकोत्तर-चमत्कारी रसो जायते ।

यद्यप्यत्र शब्दश्रवणसमानान्तरमेवार्थबोधः । ततो विभावादिप्रतीतिः अनन्तरं सहृदयैः भावनया विभावादि-संवलितचिदानन्दात्मकः आस्वाद्यमानो रत्यादिः स्थिरो-भावः रसतामाप्नोतीति । क्रमो नूनमस्ति तथापि कार्याणा-मियत्तां कमलशतपत्रभेदवत् सहसा सम्पन्नतया नैव क्रमः प्रतीतिरनुभूयते ।

प्रतिरसं विभावादयो विद्यन्ते यथा शृङ्गाररसस्य स्थायिभावादयः ।

यथा–

**परोढां वर्जयित्वा तु, वै नृपा चानुरागिणीम् ।**
**आलम्बनं नायिका स्युः, दक्षिणाद्याश्च नायकाः ।**
**चन्द्रचन्दनरोलाम्ब-ताद्युद्दीपनं स्मृतम् ।**
**भ्रू विक्षेप-कटाक्षादि-रनुभावः प्रकीर्तितः ।**
**व्रीडा - चपलताहर्षधृत्याद्या व्यभिचारिणः ।**

सामान्यतो रसस्य लक्षणमुक्त्वा तद् भेदं प्रतिपादयन्ति कलिकालसर्वज्ञश्रीमद्हेमचन्द्राचार्यः, तथा श्रीमम्मट-आनन्द-वर्द्धनादयः ।

'शृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः तथा अद्भुतः' इति भेदैः काव्येऽष्टौ-अष्टसंख्यकाः रसाः स्मृताः । अधुना शान्तः नवमो रसोऽपि स्वीकृतः ।

शृङ्गारः प्रकृतिपुरुषयोः सनातनसम्बन्धतया नायक-नायिकावलम्बितः । तद्गत-सौन्दर्य-चन्द्रवसन्तकोकि-लाद्युद्दीपितः तच्चेष्टितकटाक्षभुजक्षेपाद्यनुभावितः, लज्जा-हासादिसञ्चारितः सामाजिकानां सहृदयानां वा चेतसि आस्वादपदवीमारूढः रत्याख्यः स्थायिभावः शृंगाररसतां आपद्यते । तेषां शृङ्गारादीनां नवरसानां क्रमशः

उदाहरणानि प्रदर्श्यन्ते । तत्र प्रथमस्य शृङ्गाररसस्योदाहरणम्–

## (१) शृङ्गारः[१]

रतिस्थायिभावकः, रागवन्नायक - नायिकालम्बनकः, चन्द्र-चन्दनरोलम्बाद्युद्दीपनकः, भ्रूविक्षेप-कटाक्षाद्यनुभावकः, **शृङ्गार नामा रसः** । स च सम्भोग-विप्रलम्भभेदेन द्विविधो भवति ।

यत्र दर्शन-स्पर्श-रोमाञ्चादि-विलासिनौ परस्परमनुरागिणौ विदधतः, तत्र **'सम्भोगशृङ्गारः'** भवति ।

यथा–

**शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-**
**र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ॥**
**विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं ।**
**लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥ १ ॥**

अत्रोक्तस्वरूपः–पतिः उक्तस्वरूपा बाला च आलम्बनविभावौ शून्यं वासगृहं उद्दीपनविभावः चुम्बनं अनुभावः

---

१. श्यामवर्णकः, विष्णुदैवतः, करुण-वीर-बीभत्स-रौद्र-भयानकरसैः सह विरोधी एव ।

लज्जाहासौ व्यभिचारिणौ, एतैः अभिव्यक्तः सहृदयविषयो रतिभावः शृङ्गाररसरूपतां भजते। तद् भेदश्च विप्रलम्भः। विप्रलम्भोऽथ संभोगः इत्येव द्विविधो मतः। **यत्र तु प्रकृष्टा रतिः अभीष्टं न उपैति स विप्रलम्भशृङ्गारः।**

यथा अभिलाषस्योदाहरणम्—

**कथमीक्षे कुरङ्गाक्षीं, साक्षात् लक्ष्मीं मनोभुवः।**
**इति चिन्ताकुलः कान्तो, निद्रां नौति निशीथिनीम्॥**

प्रलापस्योदाहरणम्—

**पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः।**
**आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः॥**

व्याधि—

**भिसिणीअलसअणीए निहिअं सव्वं सुणिच्चलं अंगं।**
**दीहो णीसा सहरो एसो साहेइ जीअ इति परं॥**

रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते।

**जातप्रायं तु तद् वाच्यं, चेतसा काङ्क्षितं तथा।**
**वर्ण्यतेऽपि यदि प्रत्यु-ज्जीवनं स्याददूरतः॥**

यथा–

**तां जानीथाः परिमितकथां जीवितं मे द्वितीयं ।**
**दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।।**
**गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां ।**
**जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम् ।। १ ।।**

## (२) हास्यः[१]

**विकृतानवाक्चेष्टं, यमालोक्य हसेज्जनः ।**
**तत्रालम्बनं प्राहुः, तच्चेष्टोद्दीपनं स्मृतम् ।।**
**अनुभावोऽसि संकोचः, वचनस्मेरतादयः ।**
**निद्रालस्यवहित्थाद्या, अत्र स्युर्व्यभिचारिणः ।।**

हासस्थायिभावकः, विकृताकारवाक्चेष्टावज्जनालम्बनकः, तदीयचेष्टोद्दीपनकः, अक्षिसंकोचनवदनविकाशानुभावकः, निद्रालस्यादिसंचारिभावकश्चेति हास्यरसः । हास्यस्य षड्भेदाः–

ज्येष्ठानां स्मितहसिते, मध्यमानां विहसितावहसिते, नीचानां तु अपहसितं तथा अतिहसितं भवति । अतः

---

१. श्वेतवर्णः, प्रमथ (शिवगणविशेष) दैवतः, करुणभयानकाभ्यां विरोधोऽस्य ।

एभिः हसनक्रियाभेदैः हास्यस्य षड्भेदाः भवन्ति । यत्र ईषद्विकासि नयनं स्यात् स्पन्दिता घटं स्यात् स्मितं भवति । हास्यं भवति । स्मितं हास्यं च ज्येष्ठानां भवतः । मध्यमानां तु विहसितं अवहसितं च भवतः, नीचानां अपहसितं अतिहसितं भवतः । विहसने मधुर-शब्दानां प्रयोगः भवति सो सशिरःकम्पनं अवहसिते भवतः, सास्राक्षं विक्षिप्ताङ्गं च अपहसने भवतः ।

*तस्योदाहरणं यथा–*

**गुरोर्गिरः पञ्चदिनान्यधीत्य,**
**वेदान्तशास्त्राणि दिनत्रयं च ।**
**अमी समाघ्राय च तर्कवादान्,**
**समागताः कुक्कुटमिश्रपादाः ।। १ ।।**

अन्यच्च–

**श्रीतातपादैर्विहिते निबन्धे,**
**निरूपिता नूतनयुक्तिरेषा ।**
**अङ्गं गवां पूर्वमहो पवित्रं,**
**नवा कथं रासभधर्मपत्न्याः ।। १ ।।**

## (३) करुणः[१]

**स्वेष्टनाशादनिष्टाप्तेः, करुणाख्यो रसो भवेत् ।**
**धीरैः कपोतवर्णोऽयं, कथितो यमदैवतः ।।**
**शोकोऽत्र स्थायिभावः स्यात्, शौच्यमालम्बनं मतम् ।**
**तस्य दाहादिकावस्था, भवेदुद्दीपनं पुनः ।।**
**अनुभावा दैवनिन्दा, भूपातनंदितादयः ।**
**वैवर्ण्योच्छ्वासिनः श्वासस्तम्भप्रलपनानि च ।।**
**निर्वेदमोहाऽपस्मार, व्याधि ग्लानि स्मृति क्षमाः ।**
**विषाद जडतोन्मादः, चिन्ताद्या व्यभिचारिणः ।।**

स्वेष्टनाशादनिष्टसम्बन्धात् शोकस्थायिभावका, शोच्यजनावलम्बनः, तदीयदाहाद्युद्दीपनः, दैवनिन्दाद्यनुभावकः, विषादजडतादिव्यभिचारिभावकः करुणरसः ।

यथोदाहरणम्–

**विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः ।**
**अनयोर्घटनाविधेः स्फुटं ननु खड्गेन शिरीषकर्तनम् ।। १ ।।**

अत्र हि श्रीरामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा एवं बन्धुवियोगविभवनाशादावप्युदाहार्यमिति ।

---

१. कपोतवर्णः, यमदैवतः, हास्य-शृङ्गाराभ्यां विरोधोऽस्य ।

## (४) रौद्रः[१]

**रौद्रः क्रोधस्थायीभावो, रक्तो रुद्राधिदैवतः ।**
**आलम्बनमरिस्तत्र, तच्चेष्टोद्दीपनं मतम् ॥**
**मुष्टिप्रहारपातन-विकृतच्छेदावदारणैश्चैव ।**
**संग्राम-संभ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा ॥**
**भ्रू विभङ्गौष्ठनिर्देश, बाहुस्फोटन तर्जनाः ।**
**आत्मावदान कथन-मायुधोत्क्षेपणानि च ॥**
**उग्रतावेगरोमाञ्च, स्वेद-वेपथवो मदः ।**
**अनुभावास्तथाक्षेप, क्रूर-संदर्शनादयः ।**
**मोहामर्षादयस्तत्र, भावा स्युः व्यभिचारिणः ॥**

क्रोधस्थायिभावः, शत्रुरालम्बनः, तच्चेष्टोद्दीपनः, भ्रू भङ्गबाहुस्फोटनोग्रतायुधग्रहणादयः अनुभावाः, मोहामर्षादयो व्यभिचारिणः, यत्र तत्र रौद्ररसः । रौद्ररसस्य स्थायीभावः क्रोधो भवति । तथाऽस्य वर्णः रक्तः, रुद्रदैवतः, शृङ्गार-हास्य-भयानकैः सह विरोधः । अस्मिन् रसे आलम्बनः शत्रुः भवति । तच्चेष्टोद्दीपनः मुष्टिप्रहारपातन-विकृतच्छेदावदारणं युद्धोत्साहादिप्रदीप्तिः, भ्रू भङ्गोष्ठानि-दर्शनबाहुपादानां स्फोटनं हुँकृतिश्चोग्रतावेगरोमाञ्चादयः

---

१. **रक्तवर्णः, रुद्रदैवतः, शृङ्गारहास्यभयानकैः सह विरोधी ।**

अनुभावाः, आक्षेप-मोहामर्षादयः व्यभिचारी भावाः भवन्ति रौद्रे ।

तस्योदाहरणं यथा—

**चंचद्भुजभ्रमितचण्डगदाभिघात-**
**संचूर्णितोरुयुगलस्य सुयोधनस्य ।**
**स्त्यानावनद्धघनशोणितशोणपाणि-**
**रुत्तंसयिष्यति कचाँस्तव देवि ! भीमः ॥ १ ॥**

## (५) वीरः[१]

**उत्तमप्रकृतिर्वीरः, उत्साहस्थायीभावकः ।**
**महेन्द्रदैवतो हेम,-वर्णोऽयं समुदाहृतः ।**
**आलम्बन-विभावस्तु, विजेतव्यादयो मताः ।**
**विजेतादि-चेष्टाया, तस्योद्दीपनरूपिणः ।**
**अनुभावस्तु तत्र स्युः, सहायान्वेषणादयः ।**
**संचारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः ।**

स च दान-धर्म-युद्धैर्दयया च समन्वितश्चतुर्धा स्यात् ।

---

१. सुवर्णवर्णः, महेन्द्रदैवतः, भयानक-शान्तरसाभ्यां सह विरोधी ।

तस्योदाहरणं क्रमेण यथा–

## १. दानवीरः

दानेषु वीरः दानवीरः, कर्णादयः । यथा–

कियदिदमधिकं मे यद्विजयार्थयित्रे ।
कवचमरमणीयं कुण्डले चार्थयामि ।।
अकरुणमवकृत्य द्राक् कृपाणेन निर्य-
द्बहलरुधिरधारं मौलिमावेदयामि ।। १ ।।

## २. धर्मवीरः

धर्मेषु वीरः धर्मवीरः ऋषभादयः । यथा–

राज्यं च वसु देहं च, भार्या भ्रातृसुताश्च ये ।
यच्च लोके ममायत्तं तद् धर्माय सदोद्यताम् ।। २ ।।
आदिमं पृथवीनाथ-मादिमं निष्परिग्रहम् ।
आदिमं तीर्थनाथं च, ऋषभस्वामिनं स्तुमः ।। ३ ।।
[इति सकलार्हत्स्तोत्रे प्रोक्तमिदम्]

## ३. युद्धवीरः

युद्धेषु वीरः युद्धवीरः, श्रीरामचन्द्रादयः । यथा–

भो लङ्केश्वर ! दीयतां जनकजा रामः स्वयं याचते ।
कोऽयं ते मतिविभ्रमः स्मर नयं नाद्यापि किञ्चिद्गतम् ।।
नैवं चेत् खरदूषणत्रिशिरसां कण्ठासृजापङ्किलः ।
पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः ।। १ ।।

## ४. दयावीरः

दयासु वीरः दयावीरः, श्रीमेघरथोनृपः दिलीपनृपादयश्चेति । यथा–

**शिरामुखैः स्यन्दतः एव रक्त-**
**मद्यापि देहे मम मांसमस्ति ।**
**तृप्तिं न पश्यामि तवापि तावत्,**
**किं भक्षणात्त्वं विरतो गरुत्मन् ।। १ ।।**

## (६) भयानकः[1]

**शृंगारादिविरोधी यो, स्थायीभावो भयस्तथा ।**
**कालदैवत-कृष्णश्च, वर्णो भयानको रसः ।।**

यत्र भयस्थायिभावः, यस्माद् भयमुत्पद्यते स आलम्बनविभावः, विकृतस्वरश्रवणाद्युद्दीपनः वैवर्ण्यगद्गद्भाषणमनुभावः, स्वेदरोमाञ्चादयो व्यभिचारिभावाः, स **भयानकरसः** । यथा–

**नष्टं वर्षवरैर्मनुष्यगणना-भावादपास्य त्रपा-**
**मन्तः कंचुकिकंचुकस्य विशति त्रासादयं वामनः ।।**
**पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं,**
**कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ।। १ ।।**

---

१. कृष्णवर्ण, कालदैवतः, शृङ्गार, वीर, रौद्र, हास्य शान्तैर्विरोधीः ।

## (७) बीभत्सः[1]

यत्र जुगुप्सा स्थायिभावः, दुर्गन्धमांसरुधिरादीन्यालम्बनानि, तत्र कृमिपाताद्युद्दीपनानि, निष्ठीवनवदनविकारनयनसंकोचादयोऽनुभावाः, मोहापस्मारावेगव्याध्यादयः संचारिभावः, सो **बीभत्सो रसः** । यथा–

**उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छ्रोफभूयांसि मांसा-**
**न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ।**
**आत्तस्नाय्वन्त्रनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-**
**दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ।। १ ।।**

## (८) अद्भुतः[2]

यत्र विस्मयस्थायिभावः, विस्मयजनककार्यकर्त्ताऽऽलम्बनः, विस्मयावहकर्म उद्दीपनम्, चकिताद्यनुभावः, हर्षादिसंचारिभावः, तत्र **अद्भुतरसः** । यथा–

**श्रीमतेर्वीरनाथाय, सनाथायाद्भुतश्रिया ।**
**महानंदसरोराज - मरालायाऽर्हते नमः ।।**

१. नीलवर्णः, महाकालदैवतः, शृङ्गारेण सार्द्धं विरोधी ।
२. पीतवर्णः, गन्धर्वदैवतः ।

## (९) शान्तः[१]

शमस्थायिभावः, संसारानित्यता परमात्मस्वरूपं वाऽऽलम्बनम्, पुण्यतीर्थसाधुसङ्गनिर्मलारण्यादि उद्दीपनम्, रोमाञ्चाद्यनुभावः, निर्वेदहर्षस्मरणादयो व्यभिचारिणः, यत्र स **शान्तो रसः**। यथा–

**प्रशमरसनिमग्नं दृष्टियुग्मं प्रसन्नं,**
**वदनकमलमङ्कः कामिनीसङ्गशून्यम्।**
**करयुगमपियत्ते शस्त्रसम्बन्धवन्ध्यं,**
**तदसि जगति देव वीतरागस्त्वमेवम्॥ १॥**

काव्यशास्त्रे यदुक्तं "**व्यङ्ग्यार्थः भावरूपः।**" तत्र को भावः? कथ्यतेऽत्र–

यत्र संचारिभावस्य प्राधान्यं, देव-गुरु-नृपविषया च रतिः, किञ्चिद् उद्बुद्धमात्र स्थायिभावः, तत्र रसः पुष्टितामलभमानो भावः इत्यभिधीयते। स च रसस्वरूप एव। प्रोक्तं यत्–

**न भावहीनोऽस्ति रसो,**
**न भावो रसर्वाजतः॥**
**परस्परकृता सिद्धिः**
**अनयोः रसभावयोः॥ १॥**

---

१. धवलवर्णः, नारायणदैवतः, शृङ्गारहास्यरौद्रवीरभयानकैः सह विरोधी।

संचारिभावस्य प्राधान्यम्, यथा–

**एवं वादिनि देवर्षौ ,**
**पार्श्वे पितुरधोमुखी ।।**
**लीलाकमलपत्राणि ,**
**गणयामास पार्वती ।। १ ।।**

अत्र अवहित्था [आकारगुप्तिः] रूपस्य संचारिभावस्य प्रधानता प्रवर्तते ।

(१) देवविषया रतिः, यथा–

**श्रीशत्रुञ्जयमुख्यतीर्थतिलकं श्रीनाभिराजाङ्गजं ,**
**वन्दे रैवतशैल-मौलिमुकुटं श्रीनेमिनाथं यथा ।**
**तारङ्गेऽप्यजितं जिनं भृगपुरे श्रीसुव्रतं स्तम्भने ,**
**श्रीपार्श्वं प्रणमामि सत्यनगरे श्रीवर्द्धमानं त्रिधा ।। १ ।।**

**भवबीजाङ्कुरजनना ,**
**रागाद्या क्षयमुपगता यस्य ।**
**ब्रह्मा वा विष्णु र्वा ,**
**हरो वा जिनो वा नमस्तस्मै ।। २ ।।**

अत्र देवविषया रतिः ज्ञेया ।

**श्रीमद्वीरजिनस्य पद्महृदतो निर्गम्यतं गौतमं ,**
**गङ्गावर्तनमेत्यया प्रविभिदे मिथ्यात्ववैताढ्यकम् ।**
**उत्पत्तिस्थितिसंहृति-त्रिपथगा ज्ञानाम्बुदा वृद्धिगा ,**
**सा मे कर्ममलं हरत्वविकलं श्रीद्वादशाङ्गी नदी ।। १ ।।**

दिवि वा भुवि वा ममाऽस्तु वासो ,
नरके वा नरकान्तक ! प्रकामम् ।
अवधीरितशारदारविन्दौ ,
चरणौ ते मरणेऽपि चिन्तयामि ॥ २ ॥

अत्र देवीविषया रतिः ज्ञेया ।

(२) गुरुविषया रतिः, यथा–

अज्ञानतिमिरान्धानां ,
ज्ञानाञ्जनशलाकया ।
नेत्रमुन्मीलितं येन ,
तस्मै श्रीगुरवे नमः ॥ १ ॥

अत्र गुरुविषया रतिः ज्ञेया ।

मुनिविषया रतिः, यथा–

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः ,
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद् वा तदिदमविपर्यासितरसं ,
रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

अत्र मुनिविषया रतिः ज्ञेया ।

(३) नृपविषया रतिः, यथा–

**त्वद् वाजिराजिनिर्धूत–**
**धूलीपटलपङ्किलाम् ।**
**न धत्ते शिरसा गङ्गां,**
**भूरिभारभिया हरः ॥ १ ॥**

अत्र राजविषया रतिः ज्ञेया ।

किञ्चिदुद्बुद्धस्थायिभावः, यथा–

**हरस्तु किञ्चित् परिवृत्तधैर्य-**
**श्चन्द्रोदयारम्भ इवाम्बुराशिः ।**
**उमामुखे बिम्बफलाधरोष्ठे,**
**व्यापारयामास विलोचनानि ॥ १ ॥**

अस्मिन् श्लोके किञ्चिद् उद्बुद्धस्थायिभावो वर्त्तते ।

अत्र प्रसङ्गवशात् किञ्चिद् रसाभासस्वरूपं भावाभासस्वरूपं च कथ्यते । यत्र रसाभावादीनां अनौचित्यप्रवृत्तिर्भवति तत्र रसाभासः, भावाभासश्च प्रवर्तते ।

यथा रसाभासः–

**जघनस्थलनद्धपत्रवल्ली,**
**गिरिमल्लीकुसुमानि काऽपि भिल्ली ।**
**अवचित्य गिरौ पुरो निषण्णा,**
**स्वकचानुत्कचयाञ्चकार भर्त्रा ॥ १ ॥**

श्लोकेऽस्मिन् अधमपात्रगता रतिर्वर्ण्यते इति **शृङ्गाररसाभासः ।**

भावाभासो यथा–

> **राकासुधाकरमुखी तरलायताक्षी ,**
> **सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी ।**
> **तत् किं करोमि विदधे कथमत्र मैत्रीं ,**
> **तत् स्वीकृतिव्यतिकरे क इवाभ्युपायः ।। १ ।।**

अस्मिन् श्लोके चिन्तारूपसंचारिभावस्याननुकूल-नायकविषयतया आभासत्वम्, इति **भावाभासः** । एवं यत्र गुरुविषयकक्रोधो वर्त्तते तत्र **रौद्ररसाभासो** ज्ञेयः । सत्पात्रे भयस्तदा भयानकाभासो ज्ञेयः । अन्यत्राऽपि तथैव यथायोग्यमवसेयम् । यदुक्तं "**क्वचिच्चालङ्कारादिरूपः**" । अत्र आदिपदात् वस्तुरूपव्यङ्ग्यार्थोऽपि ज्ञेयः ।

## ❀ अथ व्यङ्ग्यार्थरूपध्वनिकाव्यभेदाः निरूप्यन्ते ❀

**ध्वनिकाव्यं नाम**–यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थ-स्याधिकचमत्कारित्वं वर्त्तते । तदेव '**कविभिः उत्तमं काव्यं कथ्यते, इति ।**'

**तत्र ध्वनिः**–द्विविधो वर्तते ।

**लक्षणामूलः अभिधामूलश्चेति ।**

लक्षणामूलो ध्वनिः नाम–

**"यत्र वाच्यार्थस्याविवक्षा लक्षणया अर्थोऽवसीयते, व्यज्यते च कश्चिदर्थविशेषः सः लक्षणामूलो ध्वनिः।"**

तस्य भेदौ द्विविधौ भवतः। तद्यथा–**अर्थान्तर-संक्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्यश्चेति।**

१. यत्र व्यर्थीभूतो वाच्यार्थः स्वमर्थमपरित्यज्या-जहत्स्वार्थलक्षणया स्वविशेषरूपेऽर्थान्तरे संक्रामति तत्र **अर्थान्तरसंक्रमितवाच्यः लक्षणामूलो ध्वनिः**, यथा–

**कदली कदली करभः करभः,**
**करिराजकरः करिराजकरः।**
**भुवनत्रितयेऽपि बिभर्ति तुला–**
**मिदमूरुयुगं न चमूकदृशः ॥ १ ॥**

अस्मिन् श्लोके कदलीत्यादिशब्दाः पुनरुक्तत्वाद् दोषदूषिता अभिधया कदल्यादिरूपमुख्यार्थं न कथयन्ति, किन्तु लक्षणया जाड्यादिगुणविशिष्टान्तरे संक्रमितत्वात् अर्थान्तर-संक्रमितवाच्य एव। तथा जाड्यातिशयोऽपि व्यङ्ग्यः।

२. यत्र अनुपयुज्यमानो वाच्यार्थः स्वमुख्यार्थं सर्वथैव

विहाय जहल्लक्षणयाऽर्थान्तरे परिणमति, तत्र **अत्यन्त-तिरस्कृतवाच्यः लक्षणामूलो ध्वनिः।** अत्र वाच्यार्थ-स्यात्यन्ततिरस्कृतत्वाद् अत्यन्ततिरस्कृतवाच्यत्वमिति।

यथा–

**रविसंक्रान्तसौभाग्य-**
**स्तुषारावृतमण्डलः ॥**
**निश्वासान्ध इवादर्श-**
**श्चन्द्रमा न प्रकाशते ॥ १ ॥**

श्लोकेऽस्मिन् अन्धत्वं सचेतने एव सम्भवतीति। तदर्थं परित्यज्य सर्वथैव अन्धशब्दो लक्षणया अप्रकाशरूपं अर्थं बोधयति। तथा अप्रकाशातिशयोऽपि व्यङ्ग्यः।

**अभिधा मूलत्वं नाम–**

यत्र वाच्यार्थस्य मुख्यार्थत्वं भवति तत्रैव अभिधामूलो ध्वनिर्नाम। स च द्वौ भेदौ। असंलक्ष्यक्रमवाच्यः, संलक्ष्यक्रमवाच्यश्चेति।

तत्र असंलक्ष्यक्रमवाच्यो रसभावादिरूपः रसभावा-दिव्यङ्ग्यप्रतीतेः क्रमिकत्वेऽपि क्रमस्य दुर्बोध्यत्वात्, असंलक्ष्यक्रमत्वमिति असंलक्ष्यक्रमवाच्यः।

एतन्मूलकत्वेनैव पूर्वमुक्तं यत् व्यङ्ग्यार्थः क्वचिद् रसरूप इत्यादयः। तथा संलक्ष्यक्रमवाच्यस्योऽपि त्रयो भेदाः सन्ति। तथाहि–शब्दशक्त्युत्थः, अर्थशक्त्युत्थः, शब्दार्थोभयशक्त्युत्थश्चेति।

तत्र शब्दशक्त्युत्थो द्विविधः। वस्तुरूपव्यङ्ग्यः, अलङ्काररूपव्यङ्ग्यश्चेति।

अलङ्कारस्य भिन्नाभिहितत्वात् अत्र वस्तु-शब्देन अलङ्कारस्य भिन्नं सर्वं ग्राह्यमिति। शब्दशक्त्यैव वस्तु-व्यञ्जनं यत्र भवति तत्र वस्तुरूपशब्दशक्त्युत्थः, अलङ्कार-व्यञ्जनं भवति, तत्र अलङ्काररूपशब्दशक्त्युत्थस्यानु-क्रमेणोदाहरणं यथा–

**पथिक ! नाऽत्र संस्तरमस्ति ,**
**मनाक् प्रस्तरस्थलग्रामे ।**
**उन्नतपयोधरं प्रेक्ष्य ,**
**यदि वससि तद् वसः ॥ १ ॥**

अस्मिन् श्लोके यदि उपभोगसमर्थोऽस्ति तदा तिष्ठ इति वस्तु संस्तरादिशब्दशक्तिद्वारा व्यज्यते।

**दुर्गालङ्घितविग्रहो मनसिजं संमीलयँस्तेजसा ,**
**प्रोद्यद् राजकलो गृहीतगरिमा विश्वग्वृतो भोगिभिः ।**
**नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां रुचिन्धारयन् ,**
**गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः ॥ १ ॥**

श्लोकेऽस्मिन् उमादेवीवल्लभभानुदेवनृपो वर्णनं प्रकरणगम्यमिति प्रथमार्थः । द्वितीयार्थलभ्य पार्वती पतिशिववर्णनमप्राकरणिकत्वाद् असमञ्जसं मा भूदिति । स्थाणुभानुदेवयोरुपमानोपमेयभावः कल्प्यते तदत्र उमा-वल्लभ इव उमावल्लभो राजते इति उपमालङ्कारो व्यङ्ग्यो भवति ।

यत्र अर्थशक्त्यैव व्यञ्जनं भवति । स च ध्वनिरर्थशक्त्युत्थः । अर्थशक्तिः द्विनिष्ठा भवति । वस्तुनि अलङ्कारे चेति ।

वस्त्वलङ्कारौ द्वावपि स्वतः सम्भवि, कविप्रौ-ढोक्तिसिद्ध, कविनिबद्धवक्तृप्रौढोक्ति सिद्ध, इत्यनेन भेदेन त्रिविधौ तैर्व्यञ्जनमपि वस्त्वलङ्कारयोरेव भवतीति द्वादशप्रकारोऽर्थशक्त्युत्थः । तत् प्रकारस्याऽनुक्रमो-ऽत्रोदाहरणपूर्वं प्रतिपाद्यते । तथा हि–

(१) स्वतः संभावि वस्तु 'व्यङ्ग्यवस्तु' । तस्योदा-हरणं यथा–

**गुञ्जन्ति मञ्जु परितो, गत्वा धावन्ति संमुखम् ।।**
**आवर्तन्ते विवर्तन्ते, सरसीषु मधुव्रताः ।। १ ।।**

अस्मिन् श्लोके भ्रमरकृतमञ्जुगुञ्जनादिवस्तुभिः स्वतः संभविभिः समीपसरोरुहोद्भवध्वननद्वारा शरद-ऋत्वागमनकालनैकटयरूपं वस्तु व्यज्यते इति ।

(२) स्वतः संभविवस्तु व्यङ्गयालङ्कारः । तस्योदाहरणं यथा—

**मृद्विका रसिता सिता समशिता स्फीतं निपीतं पयः ,**
**स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः ।**
**तत्त्वं ब्रूहि मदीय जीव ! भवता भूयो भवे भ्राम्यतः ,**
**वीरेत्यक्षरयोरयं मधुरिमो-द्गारः क्वचिल्लक्षितः ।। १ ।।**

श्लोकेऽस्मिन् स्वतः संभविना बाह्यवस्तूनामुपभोगरूपवस्तुना अनेकजन्मतपोध्यानप्रमुखप्राप्य भगवन्नाम्नोऽतिशयोक्तिरलङ्कारो व्यज्यते इति ।

(३) स्वतः संभवि-अलङ्कारव्यङ्गयवस्तु । तस्योदाहरणं यथा—

**नदन्ति मददन्तिनः परिलसन्ति वाजिव्रजाः ,**
**पठन्ति बिरुदावलीमहितमन्दिरे बन्दिनः ।**
**इदं तदवधि प्रभो ! यदवधि प्रवृद्धा न ते ,**
**युगान्तदहनोपमा नयनकोणशोणद्युतिः ।। १ ।।**

अत्र नेत्रकोणशोणद्युतेर्युगान्तदहनोपमया शत्रूणां सम्पत्तयो भस्मीभूतं भविष्यन्तीति वस्तु व्यज्यते ।

(४) स्वतः संभवि-अलङ्कारव्यङ्ग्यालङ्कारः । तस्योदाहरणं यथा—

**उदितं मण्डलमिन्दोरुदितं सद्यो वियोगिवर्गेण ।**
**मुदितं च सकलललना-चूडामणिशासनेन मदनेन ॥ १ ॥**

अस्मिन् श्लोके समुच्चयालङ्कारेण अतिशयोक्तिरलङ्कारो व्यज्यते ।

(५) कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यवस्तु । तस्योदाहरणं यथा—

**सज्जयति सुरभिमासो ,**
**न चार्पयति युवतिजनलक्ष्यशते ।**
**अभिनवसहकारमुखान् ,**
**नवपल्लवपत्तलान् अनङ्गस्य शरान् ॥ १ ॥**

श्लोकेऽस्मिन् वसन्त इषुकारः, कामदेवो धानुष्कः, लक्ष्यं स्त्रियः, कुसुमानीषवः, इत्यादीनि वस्तूनि कविप्रौढोक्तिसिद्धानि । तैः प्रकाशीभवत्कामभोगक्रीडनरूपं वस्तु व्यज्यते इति ।

(६) कविप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यालङ्कारः। तस्योदाहरणं यथा—

**रजनीषु विमलभानोः,**
**करजालेन प्रकाशितं वीर !।**
**धवलयति भुवनमण्डल-**
**मखिलं तव कीर्तिसन्ततिः सततम् ॥ १ ॥**

अत्र कविप्रौढोक्तिसिद्धवस्तुना चन्द्रकलाजालादधिककालप्रकाशितं कीर्तिकलापस्येति व्यतिरेकालङ्कारो व्यज्यते इति।

(७) कविप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्यवस्तु। तस्योदाहरणं यथा—

**देवाः के पूर्वदेवाः समिति मम नरः सन्ति के वा पुरस्ता-**
**देवं जल्पन्ति तावत् प्रतिभटपृतनावर्त्तिनः क्षत्रवीराः।**
**यावन्नायाति राजन् ! नयनविषयतामन्तकत्रासिमूर्ते !**
**मुग्धारिप्राणदुग्धाशनमसृणरुचिस्त्वत्कृपाणोभुजङ्गः ॥ १ ॥**

अस्मिन् श्लोके कविप्रौढोक्तिसिद्धेन रूपकालङ्कारेण त्वय्युद्यतकृपाणे सति परेषां का जीवनस्याशेति वस्तु व्यज्यते इति।

(८) कविप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्यालङ्कारः ।
तस्योदाहरणं यथा—

**दयिते ! रदनत्विषां मिषा-**
**दयितेऽमी विलसन्ति केसराः ।**
**अपि चालकवेषधारिणो**
**मकरन्दस्पृहयालवोऽवलयः ॥ १ ॥**

श्लोकेऽस्मिन् पूर्वोत्तरार्द्धवर्त्तिनीभ्यामपह्नुतिभ्यां न त्वं कामिनी किन्तु नलिनीति तृतीयापह्नुतिः व्यज्यते इति ।

(९) कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यवस्तु । तस्योदाहरणं यथा—

**शिखरिणी क्व नु नाम कियच्चिरं,**
**किमभिधानमसावकरोत् तपः ॥**
**सुमुखि ! येन तवाधरपाटलं,**
**दशति बिम्बफलं शुकशावकः ॥ १ ॥**

अत्र कविनिबद्धस्य कामिनः प्रौढोक्तिसिद्धेन वस्तुना तवाधरः पुण्यातिशयलभ्य इति वस्तु व्यज्यते ।

(१०) कविनिबद्धवक्तृप्रौढोक्तिसिद्धवस्तुव्यङ्ग्यालङ्कारः । तस्योदाहरणं यथा—

**सुभगे ! कोटिसङ्ख्यत्व-**
**मुपेत्य मदनाशुगैः ।**
**वसन्ते पञ्चता त्यक्ता ,**
**पञ्चतासीद् वियोगिनाम् ।। १ ।।**

इह कामदेवशराणां कोटिसङ्ख्यत्वमुपेतत्वेन निखिलविरहिजनमरणरूप - कविनिबद्धवक्तृ - प्रौढोक्ति-सिद्धवस्तुना शराणां पञ्चत्वं तान् विहाय वियोगिनं गतं किमिति उत्प्रेक्षालङ्कारः प्रतीयते ।

(११) कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्य-वस्तु । तस्योदाहरणं यथा-

**मल्लिकामुकुले चण्डि !**
**भाति गुञ्जन् मधुव्रतः ।**
**प्रयाणे पञ्चबाणस्य ,**
**शङ्खमापूरयन्निव ।। १ ।।**

अस्मिन् श्लोके कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन उत्प्रेक्षालङ्कारेण कामस्यायमुन्मादकः कालः समागतः तत् कथं मानिनि ? मानं न मुञ्चसीति वस्तु व्यज्यते ।

(१२) कविनिबद्धवक्तृप्रौढोक्तिसिद्धालङ्कारव्यङ्ग्याल-ङ्कारः । तस्योदाहरणं यथा-

**महिलासहस्सभरिए तुह ,**
**हिअए सुहअ ! सा अमाअन्ती ।**
**अणुदिणमणण्णकम्मा ,**
**अङ्गं तुणुअं वि तणुएइ ।। १ ।।**

श्लोकेऽस्मिन् कविनिबद्धवक्तृप्रौढोक्तिसिद्धहेत्वलङ्कारेण तनोस्तनूकरणेऽपि सा तव हृदये न वर्त्तते इति विशेषोक्तिरलङ्कारः प्रतीयते ।

।। इति अर्थशक्त्युत्थस्य द्वादशप्रकाराः प्रतिपादिताः ।।

शब्दार्थोभयशक्त्युत्थस्तु एक एव कथितः । यथा-

**अतन्द्रचन्द्राभरणा, समुद्दीपितमन्मथा ।**
**तारकातरला श्यामा, सानन्दं न करोति कम् ।। १ ।।**

अत्र चन्द्रेत्यादिशब्दा परिवृत्यसहिष्णव इति शब्दमालंब्य, अतन्द्राभरणेत्यादिशब्दा अनिद्रभूषणादिपर्यायान्तरैरपि तदर्थप्रतीतेः परिवृत्तिसहेत्यर्थमाश्रित्य, श्यामा रात्रिरिव श्यामा कामिनीति उपमा व्यङ्ग्य इत्युभयशक्त्युत्थः । एवं ध्वनिकाव्यस्यापि अष्टादशभेदाः सन्ति ।

एते सर्वेऽपि भेदाः पद-पदांशवाक्य-प्रबन्धप्रमुखगतत्वेन गणनातीता भवन्ति । विशेषार्थिना तन्निरूपणं साहित्याकरग्रन्थे द्रष्टव्यमिति ।

## ❀ तृतीयपरिच्छेदस्य सारांशः ❀

नव्ये भव्ये सुकाव्ये तु, चमत्कारश्च कीदृशः ।
सर्वमेतद् विनिश्चेतुं, नूतनं चेष्टितं मया ॥ १ ॥

काव्ये कश्च चमत्कारः ?, आह्लादकत्वमीरितः ।
आह्लादकस्य संसृष्टौ, रम्यता हितकारिणी ॥ २ ॥

चमत्कारो द्विधा काव्ये, शब्दार्थाभ्यां प्रवर्त्तते ।
शब्दैरथैः सुसंयुक्तै-श्चात्मकृत्यं विराजते ॥ ३ ॥

अर्थकृत्वश्चमत्कारो, वाच्य-व्यङ्ग्यार्थ - भेदतः ।
द्वैधात्वं पुनरायाति, कोमले काव्य–सागरे ॥ ४ ॥

सुकवेः सरसं कर्म, काव्यतां लभते सदा ।
कीदृग् रसस्वरूपं स्यात्, इति भावैश्च भावितः ॥ ५ ॥

समाहृत्य च सद्भावान्, विदुषां वर्णितान् परान् ।
अयं सुशीलसूरिर्वै, तत् स्वरूपं न्यरूपयत् ॥ ६ ॥

सरसा रुचिरा वाणी, चमत्कार-विधायिनी ।
तृतीयेऽस्मिन् परिच्छेदे, सौकर्याय सुवर्णिता ॥ ७ ॥

इति श्रीशासनसम्राट्-सूरिचक्रचक्रवर्त्ति-तपोगच्छाधिपति-भारतीयभव्यविभूति - महाप्रभावशालि-अखण्डब्रह्मतेजोमूर्त्ति-श्रीकदम्बगिरिप्रमुखानेकप्राचीनतीर्थोद्धारक-श्रीवलभीपुरनरेशाद्यनेकनृपतिप्रतिबोधक-चिरन्तनयुगप्रधानकल्प-वचनसिद्ध-सर्वतन्त्रस्वतन्त्र-प्रातःस्मरणीय-परमोपकारि-परमपूज्याचार्यमहाराजाधिराज **श्रीमद्विजयनेमिसूरीश्वराणां** दिव्यपट्टालंकार-साहित्यसम्राट्-व्याकरणवाचस्पति-शास्त्रविशारदकविरत्न - साधिकसप्तलक्षश्लोकप्रमाणनूतनसंस्कृत-साहित्यसर्जक - परमशासनप्रभावक - बालब्रह्मचारि - परमपूज्याचार्यप्रवर **श्रीमद्विजयलावण्यसूरीश्वराणां** प्रधानपट्टधरधर्मप्रभावक-शास्त्रविशारद - कविदिवाकर - स्याद्यन्तरत्नाकराद्यनेकग्रन्थकारक - बालब्रह्मचारि - परमपूज्याचार्यवर्य **श्रीमद्विजयदक्षसूरीश्वराणां** पट्टधर-जैनधर्मदिवाकर-शास्त्रविशारद - साहित्यरत्न - कविभूषण - बालब्रह्मचारि-**श्रीमद्विजयसुशीलसूरि** सन्दृब्धायां **साहित्यरत्नमञ्जूषायां** तृतीयः परिच्छेदः ।

## ।। अथ चतुर्थः परिच्छेदः ।।

"गुणदोषादयश्च के" इति जिज्ञासायां गुणदोषादयो निरूप्यन्ते । तत्र काव्यलक्षणे निर्दिष्टानां गुणानां स्वरूपं वस्तुं उपक्रमते । गुण्यन्तः इति गुणाः । यथा शरीरे शौर्यादयो गुणाः आत्मधर्माः तथैव काव्ये आत्मभूतस्याङ्गिनो रसस्य धर्मा गुणाः, शब्दार्थयोः परम्परया वर्तन्त इति परिष्कृता पन्थाः ।

**गुणस्य सामान्यलक्षणम्–**

**ये रसस्याङ्गिनो धर्माः, शौर्यादय इवात्मनः ।**
**उत्कर्ष-हेतवस्ते स्यु-रचलास्थितयो गुणाः ।।**

रसवृत्तित्वे सत्युत्कर्षहेतुत्वं गुणत्वम्, नाट्यशास्त्रे दशगुणाः प्रतिपादिताः ।

**श्लेषः प्रसादसमता समाधि-र्माधुर्यमोजः पदसौकुमार्यम् ।**
**अर्थस्य च व्यक्तिरुदारता च, कान्तिश्च काव्यार्थगुणा दशैते ।।**

श्रीमद्भोजराजेन श्रीसरस्वतीकण्ठाभरण - नामक-ग्रन्थे तु चतुर्विंशति गुणाः प्रतिपादिताः दशगुणाः नाट्यशास्त्रोक्ताः, इतरे तु एते उदात्तता और्जित्यम् प्रेयः सुशब्दता सौक्ष्म्यम्, गाम्भीर्यं विस्तरः संक्षेपः संमितत्त्वं भाविकम्, गतिः रीतिः उक्तिः प्रौढिः। एते गुणाः शब्दार्थयो एव, काव्यप्रकाशादिषु रसधर्मागुणा उक्ताः। ते च माधुर्यम् ओजः प्रसाद इति त्रय एव स्वीकृताः, न तु पुनर्दश चतुर्विंशतिर्वा। एषां व्यञ्जिका रचना रचनापवादश्च दर्शितः कलिकालसर्वज्ञश्रीहेमचन्द्राचार्येणापि, एतदेव मतमधुना सत्क्रियते, प्रोक्तेषु दशगुणेषु श्रीमद्भोजराजोक्तगुणानां अन्तर्भावः।

दशगुणेषु केषाञ्चिच्च माधुर्यौजः प्रसादेष्वन्तर्भावः। केचिच्च दोषाभावरूपाः। यथा-श्लेषः समाधि औदार्यम् प्रसादः ओजश्चैते, माधुर्यं माधुर्ये, अर्थव्यक्तिः प्रसादे चान्तर्गताः ग्राम्यदोषाभावः कान्तिः श्रुतकटुदोषाभावः सुकुमारता समता च क्वापि दोषः, क्वापि चास्या उक्तो गुणान्तर्भावः।

अर्थगुणेषु ओजः प्रसादमाधुर्य-सौकुमार्योदारता गुणाः अपुष्टार्थाधिकपदानवीकृता मङ्गलरूपाश्लीलग्राम्यदोषाभावरूपाः अर्थव्यक्तिः स्वभावोक्तिरलङ्कारे, कान्तिश्च

रसध्वनि-गुणीभूत-व्यंग्यादावान्तर्गतौ श्लेष-समाधौ वैचित्र्य-मात्रद्योतकौ समता च दोषाभावरूपता।

वेदान्तेऽपि व्यावहारिकस्यात्मनः सगुणत्वम्। अत एव न्याये वैशेषिके चात्मनो गुणा इच्छादेवादयः स्वीक्रियन्ते। गुणानां रसधर्मत्वाभाव - स्वीकारे च गुणालङ्कारयोर्मदको हेतुरपि नावशिष्यते। द्वयोरेव काव्योत्कर्षाध्यापकत्वात् गुणाःरसधर्मा एव।

• संक्षेपेण काठिन्यादिपरित्यागपूर्वकानन्दोद्बोधेन सहृदयार्द्रताजनकत्वम् माधुर्यम् (?), तच्च शृङ्गारे करुणे शान्ते च क्रमादतिशयमावहति। माधुर्य–व्यञ्जकाः– अग्रे वर्गान्त्यवर्णयुक्ता वर्णाः, ट ठ ड ढ वर्जिताः, ह्रस्व-स्वरयुक्तौ रेफणकारौ, अल्पसमासाः, ललितमृदुरचनादयः। आह्लादकत्वं माधुर्यशृङ्गारे द्रुतिकारकम्। शृङ्गारे करुणे शान्ते वा अनुभवसिद्धमेवाह्लादजनकत्वं माधुर्यम्। आह्लादातिरिक्तस्य द्रवीभावस्य निर्वक्तु-मशक्यतया आह्लाद एव पर्यवसानम्। एवं च शृङ्गार-करुण-शान्तरसोद्बोधनान्तरं जायमानो रत्याद्यविषयकः सहृदयद्रवीभावरूपः केवलानन्दसन्दोहानुभवो माधुर्यं तस्य जनकता-सम्बन्धेन रस सम्बन्धितया रसधर्मत्वमक्षत-मेवेति भावः।

केषाञ्चित् तु रतिशोकप्रशमेषु गुर्जर्यादिरागवृत्तिरिव कश्चिदेको धर्मोऽस्ति। स एव माधुर्यं तेन सामाजिकानां चित्तं द्रवीभवति। रत्यादीनां रसरूपतया परिणामेन तस्य रसवृत्तित्वं इति वदन्ति। तन्न। तत्र तादृश धर्मसत्त्वे मानाभावात्। न च दुतिरुपकार्यान्वयानुपपत्या तत् कल्पनं इति वाच्यम्। गुर्जर्यादौ तु प्रत्यक्षसिद्ध एव तादृशधर्मः। अन्ये तु **'सुश्रवत्वमेव माधुर्यं काव्यधर्मः'** संभोगापेक्षया करुणे तदपेक्षया विप्रलम्भे, तदपेक्षया शान्तेऽधिकम्।

शृंगारे माधुर्यं यथा–

**लता कुञ्जं गुञ्जन् मदवदलिपुञ्जं चपलयन्,**
**समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन्।**
**मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्,**
**रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि॥ १॥**

लतापदं सुरभि पुष्पलता बोधकतया सार्थक्यम्। आवृत्तेर्माधुर्यव्यञ्जकत्वं यथा–

**मुद्रितामिन्दुमालोक्य, पद्मिनीं पश्य सुन्दरि।**
**दन्तकान्तस्य विच्छेदे, मधुरोऽपि न रोचते॥**

सुकुमारार्थ - प्रतिपादकरचनाया माधुर्यं - व्यञ्जकत्वं यथा–

**उचितं गोपनमनयोः स्तनयोः कनकाद्रिधर्मतस्करयोः ।**
**अवमानित विधुमण्डल मुखमण्डलगोपनं किमिति ।।**

करुणे यथा–

**गृहिणीसचिवः सखा मिथः प्रियशिक्षाललिते कलाविधौ ।**
**करुणाविमुखेन मृत्युना हरता त्वं वद किं न मे हृतम् ।। १ ।।**

शान्ते यथा–

**यैः शान्तरागरुचिभिः परमाणुभिस्त्वं ,**
**निर्मापितस्त्रिभुवनैकललामभूत ! ।**
**तावन्त एव खलु तेऽप्यणवः पृथिव्यां ,**
**यत्ते समानमपरं नहि रूपमस्ति ।। १२ ।।**

[इति श्रीमानतुङ्गसूरीश्वरविरचिते श्रीभक्तामरस्तोत्रे प्रोक्तमिदम्]

माधुर्याभावो यथा–

**अकुण्ठोत्कण्ठयापूर्ण-माकण्ठं कलकण्ठि ! माम् ।**
**कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर ।।**

अत्र माधुर्यप्रतिकूल - टवर्गीयवर्णाभिसम्बन्धान्न माधुर्यम् ।

• ओजः चित्तस्य विस्तारकं दीप्यत्वमुच्यते। **चित्तोत्साह-पूर्वकदीप्तिजनकं ओजः।** एतद् वीररसे बीभत्से ततश्च रौद्ररसेऽतिशयित्वमाप्नोति।

**वर्गस्याद्य-तृतीयाभ्यां, युक्तौ वर्णौ तदन्तिमौ।**
**उपर्यधो द्वयो र्वा सरेफौ ट ठ ड ढैः सह।**
**षकारश्च षकारश्च तस्य व्यञ्जकतां गताः।**

उत्साहाद्याकारानुविद्ध चमत्कारोद्बोधेन भूयमान उत्साहाद्यविषयक चमत्कारोद्बोधः ओजः। वीरापेक्षया बीभत्से तदपेक्षया रौद्रे ओजस आधिकचम् अतिशयः। रौद्रवीरे च निष्प्रतिभटमोजः, बीभत्से तु माधुर्य लेशानु-विद्धम्, हास्याद्भुतभयानकेषु द्वयोः समावेशो ध्वनि-सिद्धान्त-संग्रहोक्तरीत्या ज्ञेय। एतन्मते बीभत्सापेक्षया रौद्रवीरयोरोजस आधिक्यम्। औद्धत्यशालिनी डम्बरा, सा च संयुक्तवर्णबाहुल्येन भवति चञ्चदिति व्याख्यात-मिदम्। समासबाहुल्यडम्बरबन्धयोः ओजो व्यञ्जकत्वं वर्गस्यादीत्युक्तवर्णस्य। यथा—

**अनेन च्छिन्दता मातुः, कण्ठं परशुना तव।**
**बद्धस्वर्घः कृपाणोऽयं, लज्जते मम भार्गव!॥**

अत्र तृतीयपादे दकारयुक्तौ धकारौ ओजो व्यञ्जकौ।

"विरुद्धप्रौढविक्रमः" इत्यत्रासंसक्तौ ठकारौ। वस्तुतस्तु माधुर्यव्यञ्जककारिका वर्णान्तरसंयुक्ता द्वित्रा, अन्येऽपि वर्णा ओजो व्यञ्जकाः। यथा–

**समरे भाति संरम्भादुद्यद्दिनकर - द्युतिः।**
**हुताश - कुण्डसंकाश लोचनो नृप - पुङ्गवः॥**

अत्र द्वितीयपादे संयुक्तवर्णत्रयमोजो व्यञ्जकम्। ओजो व्यञ्जकाक्षर - घटित - बहुतरपदसमासस्तादृशाक्षर-सन्दोहघटितो बन्धश्च ओजोऽतिशयव्यञ्जकौ।

**दीप्त - वह्निचयोद्दीप्तनेत्रापीतद्विषद्बलः,**
**चण्डध्वानपरिध्वस्त हस्तिदानोऽस्त्यसौ युधि।**
**उद्यद्दिनकरवक्त्रः, प्रज्ज्वलज्ज्वले - क्षणः,**
**भार्गवो नृपवर्णस्य, मृत्युरेष धृटि स्थितः॥**

अन्यत्रापि यथा-वीरे–

**मूर्ध्नामुद्वृत्तकृत्ताविरलगलगलद्रक्तसंसक्तधारा ,**
**धौतेशांघ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम्।**
**कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पाद्धुराणां ,**
**दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत् प्रयासः॥**

**बीभत्से-उत्कृत्योत्कृत्तिमित्यादि–**

रौद्ररसे—

**चञ्चद्भुजभ्रमितचण्डगदाभिघात-**
**संचूर्णितोरुयुगलस्य सुयोधनस्य ।**
**स्त्यानावनद्धघनशोणितशोणपाणि-**
**रुत्तसयिष्यति कचांस्तवदेवि ! भीमः ॥ १ ॥**

न पुनरेवं यथा—

**देशः सोऽयमरातिशोणितजलैर्यस्मिन् ह्रदाः पूरिताः ,**
**क्षत्रादेव तथाविधः परिभवस्तातस्य केशग्रहः ।**
**तान्येवाहितशस्त्रघस्मरगुरूण्यस्त्राणि भास्वन्ति नो ,**
**यद्रामेण कृतं तदेव कुरुते द्रोणात्मजः क्रोधनः ॥ १ ॥**

अत्र ओजसोऽनुकूलवर्णरचनासमासानां अभावेन न ओजः ।

• समस्तेषु रसेषु रचनासु च यः शुष्केन्धनं अनलः इव क्षिप्रं चित्तं व्याप्नोति सः **प्रसादः**। श्रुतिमात्रतः अर्थबोधकाः शब्दाः व्यञ्जकाः भवन्ति । यस्मात् कारणात् सूक्तस्य काव्यस्यान्तःस्थितोऽन्तर्गतः सकलः अर्थः सलिलस्यान्तःस्थितः सर्वोऽर्थः पदार्थ इव स्वयमेवावभासते-प्रकाशते स प्रसादः प्राचीनैः कथितः । यथा स्वच्छजले-

ऽन्तर्गतं वस्तु बहिर्दृश्यते, तथैव कवेरभिमतार्थस्य यत्र स्वयमेव प्रकाशनं जायते तत्र प्रसादस्य भावेति ।

काव्यप्रकाशादिरसधर्मतावादिनां मते––अर्थो रसः तदवभासकत्वं प्रसादत्वम् । शब्दार्थनिष्ठतः त्वौपचारिकी प्रसादस्य शब्दार्थयोः रसव्यञ्जकत्वात् ।

काव्यप्रकाशे प्रसादलक्षणं त्वेतत्––

**शुष्केन्धनाग्निवत् स्वच्छ-जलवत्सह सैव यः ।**
**व्याप्नोत्यन्यत्प्रसादोऽसौ, सर्वत्र विहित-स्थितिः ॥**

अर्थात्–वस्त्रे यथा निर्मलजलं, शुष्केन्धने यथा वह्निः, तथा चेतसि योऽविलम्बेन प्रसरति स **प्रसादः** ।

अन्यच्चापि कथयति एवम्––

**समर्पकत्वं काव्यस्य, यतः सर्वरसान् प्रति ।**
**स प्रसादो गुणो ज्ञेयः, सर्वसाधारणक्रियः ॥**

अर्थात्––यदा विकासाख्यचित्तवृत्तिसमुत्पादकः प्रसादो वीर-रौद्रादिषु चित्तं व्याप्नोति तदा शुष्केन्धनाग्निवत्, यदा च शृङ्गार-करुणादिषु चित्तं व्याप्नोति तदा विमलजलवत् सः ज्ञेयः । **श्रवणमात्रेणार्थबोधजनकैर्वर्णरचनासमासैरयं व्यज्यते । रसमात्रसाधारणोऽयं गुणः ।**

यथा-

**दातारो यदि कल्पशाखिभिरलं यद्यर्थिनः किं तृणैः ,**
**सन्तश्चेदमृतेन किं यदि खलास्तत् कालकूटेन किम् ।**
**किं कर्पूरशलाकया यदि दृशोः पन्थानमेति प्रिया ,**
**संसारेऽपि सतीन्द्रजालमपरं यद्यस्ति तेनापि किम् ।। १ ।।**

केचित्तु कथयति एवम्-

**श्लेषः१ प्रसादः२ समता३, माधुर्यं४ सुकुमारता५ ।**
**अर्थव्यक्ति६ रुदारत्व-७ मोजः८ कान्तिः९ समाधयः१० ।।**

इति दशगुणान् मन्यन्ते साक्षराः, तथाऽपि तेषामुपर्युक्तगुणत्रयेऽन्तर्भावान्नातिरिक्तत्वम् ।

तद्यथा-

**माधुर्ये** कान्तिः सौकुमार्यं च, **ओजसि** श्लेषः समाधिरुदारता च, तथा **प्रसादे** अर्थव्यक्तिः समता चेति ।

यद् प्रोक्तमिदम्-

**माधुयमोजः प्रसादाख्यास्त्रयस्ते न पुनर्दश ।**
**केचिदन्तर्भवन्त्येषु दोषत्यागात् परे स्थिताः ।।**

समतामाह-

अल्पश्चासौ समासः तस्य भावस्तत्त्वं दीर्घसमासा-

भावः समता । या वर्णाद्यै र्वर्णादिसंख्यासामान्येन पदादितुल्यता वा समता । यथोदाहरणम्–

**श्यामला कोमला बाला, रमणं शरणं गता ।।**

श्यामा यौवनमध्यस्था सैव श्यामला कोमला सुकुमाराङ्गी बाला नवोढा शरणं रक्षकं रमणं पतिं गता प्राप्ता । कामपीडिता भानं परित्यज्य तं प्राप्नोति इति भावः ।

अत्र दीर्घसमासाभावः श्यामला, कोमला, रमणं, शरणमिति पदचतुष्टये त्र्यक्षरत्वेन बाला गतेति पदद्वये द्वयक्षरत्वेन पदतुल्यता श्यामलेति प्रथमपादे आकारवर्णसाम्येन रमणमिति द्वितीयपादे अकारवर्ण - साम्येन च तुल्यता ।

**समाधि–**

लसन् प्रकाशमानो घनो निबिडश्चासौ रसश्चेति लसन्-घनरसः स एवात्मा स्वरूपं यस्य स तेन ।

अन्तर्विशता चेतोविशता येनार्थेन सतां सहृदयानां गात्रं शरीरम् । अङ्कुरितं रोमाञ्चितं स्यात् सोऽर्थमहिमाऽर्थचमत्कारः समाधि । **"अर्थदृष्टिः समाधिः"**

रसव्यञ्जक-चमत्कृतार्थत्वं समाधित्वम् । अत्र रसपदं ध्वन्यलङ्कारादीनां उपलक्षणम् । येनायं भावो यद् येनार्थेन सहृदयानां चमत्कारः स्यात् सोऽर्थः समाधिः । यत्र च चेतनप्रवेशेन रोमाञ्चितगात्रादि चमत्कृत कृतार्थव्यञ्जकत्वमिति भावः ।

**माधुर्यम्–**

पुनरुक्तपदस्य रमणीयताजनकं द्रुतिजनकमिति । विचित्रता स्याद् तदा माधुर्यं भवति वा रमणीयतासंवलितविचित्रताजनकं पुनरुक्तपदत्वं माधुर्यं भवति, तेन माधुर्यं तु उक्तस्य कथितस्य चारुतावहं चित्तद्रवीभावजनक वैचित्र्यमिति । संक्षेपतः "चित्तद्रवीभावमयोह्लादो माधुर्यमुच्यते इति साहित्यदर्पणे उक्तम् । काव्यप्रकाशे तु द्रवीभावजनकाह्लादो माधुर्यमित्युक्तम्, शृंङ्गारादिरसे चित्तद्रवीभावो माधुर्यमित्यर्थः । इदं संयोगशृङ्गारे करुणे, विप्रलम्भे शान्ते च क्रमशोऽधिकं वर्त्तते ।

तस्योदाहरणं यथा–

वपस्य पश्य पश्यास्याश्चञ्चलं लोचनाञ्चलम् । अत्र पश्य, पश्य, विलोक्य पुनरुक्तपदस्य चारुता प्रतीतिर्भवति ।

**ओजः–**

यथा **साहित्यदर्पणकम्–**

**ओजश्चित्तस्य विस्तार-रूपं दीप्तत्वमुच्यते ।**
**वीर बीभत्सरौद्रेषु, क्रमेणाधिवयमस्य तु ॥**

**चन्द्रालोके तु–**

**ओजः स्यात् प्रौढिरर्थस्य, संक्षेपो वाऽतिभूयसः ।**
**रिपुं हत्वा यशः कृत्वा, त्वदसिः कोशनाविशत् ॥**

अर्थगतः ओजो भवति वा अतिभूयसो महतोऽर्थस्य संक्षेपः संकोचः शाब्द ओजो गुणः ।

साहित्यदर्पणे––ओजो लक्षणमुक्त्वाऽस्य व्यञ्जिका-रचने यं प्रतिपादिता-

**वर्गस्याद्यतृतीयाभ्यां, युक्तौ वर्णौ तदन्तिमौ ।**
**उपर्यधो द्वयोर्वा स रेफौ टठडढैः सह ॥ १ ॥**
**शकारश्च सकारश्च, तस्य व्यञ्जकतां गताः ।**
**तया समासो बहुला, घटनौद्त्य-शालिनी ॥ २ ॥**

उदाहरणे रिपु....त्वदसिस्तव खड्गः शत्रुं हत्वा कीर्त्ति कृत्वा कोशं प्रविवेश ।

अत्र कारणभूतस्य रिपुहननकर्तृत्वानाश्रयस्य खड्गस्य रिपुहननकर्तृत्वाश्रयरूपेण वर्णनादर्थगत ओजः।

**सौकुमार्यम्–**

शब्दान्तरस्य परिवर्तनाद् विनिमयाद् वा हेतोः परुषवर्णाभावः सौकुमार्यम्, अमङ्गलशब्दपरित्यागेन तत् पर्यायवाचिशब्दप्रयोगः सौकुमार्यमिति भावः। अमङ्गल-जनकाश्लीलत्वाभावो यत्र तत्र सौकुमार्यम्।

यथा-स पुरुषः मरुत्सखं समालिङ्ग्य कथाशेषतां यातः। अत्र 'अग्नौ प्रविश्य मृतः' इति भावः, किन्तु अमङ्गलशब्दस्याभावरूपेण पर्यायपदान्तरैर्वर्णनं कृतम्।

**उदारता–**

विदग्धप्रयोज्यत्वमुदारता, सा च न ग्राम्यदोषा भाव-रूपा अपि ग्राम्यदोषाभावात्। वामनस्य मते "**अविकटत्वमुदारता**" पदानां नृत्यत्प्रायत्वं चाविकटत्व-मुदारता। अविकटत्वं ओजस्यान्तर्गतं काव्यप्रकाशादि मते। व्यङ्ग्यार्थप्रत्यायकत्वं उदारता इति दण्डी व्याचष्टे।

वामनोक्तदशगुणान्तर्गतयोः कान्त्यर्थव्यक्तिगुणयोः काचिदन्तर्भावं दर्शयति––शृङ्गारे चेति। कान्तिश्चार्थ-

व्यक्तिश्चेति कान्त्यर्थव्यक्ती तयोः संग्रहः क्रमेण शृङ्गारे प्रसादे च भवति शृङ्गारे कान्तिः प्रसादे चार्थव्यक्तिरन्तर्गतेति भावः । ननु वामनेन दीप्तरसत्वं कान्तिरिति व्याहृत्य 'प्रेयान्सायमपाकृतः सशपथं पदानतः कान्तया' इत्याद्युदाहृतम् ।

तत्रैर्ष्यौत्सुक्यानुभावस्य दीप्तेर्वर्णनं न तु शृंगारदीप्तिरिति । अनुभाववर्णनस्य शृंगारवर्णनाभिन्नत्वम् । गुणसंख्यामुपसंहरति अमीति पुंसि यथा शौर्यादयो गुणाः वर्तन्ते तथैव काव्ये, अमी पूर्वोक्ता गुणाः श्लेषप्रासादयो दशैव वर्त्तन्ते । दशगुणा वामनस्य मते स्वाभिमतास्त्वष्टावेव ।

यथा श्लेषः प्रसादः समता, समाधिः, माधुर्यम्, ओजः, सौकुमार्यम्, उदारतेति । सरस्वतीकण्ठाभरणोक्तचतुर्विंशतिगुणानामत्रैवान्तर्भावः ।

**।। इति गुणनिरूपणं प्रोक्तम् ।।**

## ॥ दोषनिरूपणम् ॥

काव्यस्य शब्दार्थौ शरीरम्, रस आत्मा, गुणाः शौर्यादयः कटक-कुण्डलादि आभूषणाः। यथा कामिन्याः वपुर्विशेषमलङ्करोति तथैव अलङ्काराः काव्यस्य रीतयोऽवयवसंस्थानवत् दोषाः कारणत्वादिवत् भवति। अन्यच्च कथितं येन चेतः प्रविष्टेन काव्यस्य रमणीयतोद्देश्य प्रत्यायकत्वलक्षणा सुन्दरतानाशेन सक्षता सप्रतिबन्धा स्यात्। यत् सत् तयोद्देश्यप्रतीतिविघातो भवेत् दोषः इति तात्पर्यम्।

काव्यस्य शब्दार्थौ शरीरं भवति, आत्मा रसः, शौर्यादयः गुणाः, तथैव काणत्वादिवत् अपकर्षकाः दोषाः भवन्ति। संस्थानसमा रीति, आभूषणसमाऽलङ्काराः ज्ञातव्याः।

रसानां अपकर्षहेतवः ये सन्ति ते दोषाः। ते च त्रिधा शब्ददोषार्थदोषरसदोषभेदात्। विस्तरेण शब्दे वाचके अर्थे वाच्ये च कृतो उन्मेषः प्रादुर्भावो येन स तं शब्दार्थोभयनिष्ठमिति। यावत् तं रमणीयता विघातकं

दोषं काव्यदूषणमुद्घोषयन्ति विद्वान्सः। स चायं दोषः द्विविधः नित्योऽनित्यश्च। तत्र प्रकारान्तरेणापि समाधातुमशक्यो नित्यः। यथा-च्युतसंस्कृत्यादिः, एतद् विपरीतस्त्वन्यः। यथा-ग्राम्यत्वादिः अभिभूतोऽर्थे अभिधेयो यस्मिन् स तादृशो दोष इति यावत्। रागे वक्तव्ये लोहितादिशब्दमपहाय रुधिरार्थवाचकशोणितादि पदप्रयोगे निहतार्थदोषसत्ता, यतो हि शोणित-पदस्य रुधिरे प्रसिद्धार्थता रागे त्वप्रसिद्धार्थता इति दोषः। उभयार्थशब्दत्वे सत्यप्रसिद्धार्थप्रयोजकत्वं निहतार्थित्वम्। असमर्थे त्वर्थानुपस्थितिरत्र द्वितीयार्थस्य विरलप्रयोगतया विलम्बेन अर्थप्रयोगः। प्रकृते यच्छब्दस्यानुपयोगित्वम्= तन्निरर्थकत्वम्। यथा-

**उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि !**
**अभिवाञ्छितं प्रसिद्ध्यतु भगवति ! युष्मत् प्रसादेन।**

अत्र 'हि' शब्दो अनुपयोगी। पूरणमेवैकं मुख्यं प्रयोजनं यस्मिन् तत् तादृशः पादाक्षरभरणमात्रफलकम्। निर्गतोऽर्थः प्रयोजनं यस्मात् तन्निरर्थकं नाम दूषणं भवति। यत्र श्लोके पादाक्षरपूर्तीच्छया 'तु' हि पदानि विनिवेश्यन्ते। यथा-

"मुञ्च मानं हि मानिनि" अत्र हि शब्दः निरर्थकः। निरर्थकपदयुक्ते वचसि सहृदयानां वैमुख्यम्।

**व्याकरणशास्त्रादिलक्षणरहितं निर्लक्षणम्-**

यथा-

**दिशि मन्दायते तेजो, दक्षिणस्यां रवेरपि ।**
**तस्यामेव रघोः पाण्ड्याः, प्रतापं न विषेहिरे ।।**

अत्र "**पाण्ड्या**" इति न सम्भवति बहुवचने तद्धित-प्रत्यय लोपात् इति व्याकरणदूषितम् ।

## अनुचितार्थम्

यत् पदं अयोग्यार्थपदं प्रकटयति, तदनुचितार्थबोधकं पदं तदेवानुचितार्थदोषाख्यमाहुः ।

उदाहरणं यथा-"**इयमद्भुतशाख्यग्रकेलिकौतुकवानरी**"

(चन्द्रालोके)

## अवाचकम्

"**अभिमतार्थप्रतिपादनासमर्थम् अवाचकम्**" । यथा-

**उद्गर्जज्जलकुञ्जरेन्द्ररभसास्फालानुबन्धोद्धतः ,**
**सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः ।**
**उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा ,**
**प्रायः प्रेङ्खदसङ्ख्यशङ्खधवला वेलेयमागच्छति ।।१।।**

अत्र ध्वनिशब्दो गीतप्रमुखध्वनिषु प्रसिद्धः, समुद्रे तु

गर्जितमेव, अतो ध्वनिशब्दो समुद्रजशब्देऽशक्तः इति तदर्थबोधेऽसमर्थः । विदधदित्यादौ कुर्वदित्यादावर्थेऽभिधिये यद् दधद् आद्यं यस्मिन्-तत् पदं दधदाधम् । यदुपसर्ग-सम्बन्धेन यो धातुः यादृशार्थबोधकः तदुपसर्गादिविनैव तादृशार्थबोधकतया तस्य धातोः प्रयोगेऽवाचकदोषः । विवक्षितार्थद्योतकोपसर्गादि–सम्बन्धाभावेऽपि तत् सम्बन्ध-जन्यार्थ–प्रतिपादकतया तत् प्रयुक्तत्वं अवाचकत्वम् । यथा–

"डुधाञ् धारण-पोषणयोः" इति धातु व्युपसर्गसहित एव करणार्थे वर्त्तते । नान्यथा, यदि धा धातोः करणार्थे प्रयोगः इष्यते तदा व्युपसर्गसहितस्यैव प्रयोगः [वि-धत्ते] इत्यादि । वि-उपसर्ग रहितस्य तु न । तस्य धारणार्थकत्वात् । यदि धारणार्थकस्य वि- उपसर्ग–रहितस्य धा धातोः करणार्थे प्रयोगः स्यात् तदाऽवाचकदोषः जायते । "**धत्ते नभस्तलं सूर्यः अरुणं प्रखरैः करैः ।**"

## "अश्लीलम्"

**'असभ्यार्थान्तरव्यञ्जकत्वं अश्लीलम्, अथवा मनो-वैकल्यजनकं अश्लीलम् ।'** यथा–

**"मनीषिताः सन्ति गृहेऽपि देवता-**
**स्तपः क्व वत्से ! च तावकं वपुः ।**

**पदं सहेत भ्रमरस्य पेलवं,**
**शिरीषपुष्पं न पुनः पतत्रिणः ॥१॥"**

अत्र "**पेलव**" शब्दस्य अतिशयेन कोमलत्वं व्यञ्ज्यते। किन्तु पेलवः शब्दः अश्लीलस्याऽर्थे प्रसिद्धः। अन्यच्च– न श्लीलः अश्लीलः व्रीडा, जुगुप्सा, घृणा, अमङ्गलं अशुभमात्मास्वरूपं यस्य तेन। अर्थात् व्रीडाजनकतया जुगुप्साजनकतया अभद्रतया चाऽश्लीलस्य भेदत्रयम्। "**प्रियानाशे भवेत् वायुः, कथं आह्लादसाधनम्**"।

अत्र आह्लादसाधने 'उपस्थ' शब्दस्याश्लीलत्वं व्रीडाजनकं भवति। वायोः अपानवायुप्रतीत्या जुगुप्साजनकम् 'प्रियानाशे' अस्मिन् पदे अमङ्गलस्य प्रतीतिः। किन्तु शिवलिङ्गः, सुभगा, भगिनी, ब्रह्माण्डादिशब्दानां लोके नाश्लीलतया प्रतीतिः, तेषां प्रयोगे न दोषः।

## नेयार्थम्

यत्र परम्परयाऽर्थो ज्ञायतेऽनुभूयते वा लक्षणाया लक्षणावृत्या अत्यन्तप्रसरादाधिक्याद्यय मनोहरत्वं **नेयार्थत्वम्** अथवा नेयः स्वकल्पनयान्यथा प्राप्यौऽर्थोऽभिधेयो यस्मिन् तत् पदं **नेयार्थम्**। अन्यच्च सति मुख्यार्थबाधे सति च रूढिप्रयोजनान्यतरहेतौ लक्षणावकाशो भवति यत्र **नेयार्थम्**।

नेयार्थस्य द्वौ भेदौ । यत्र च रूढिप्रयोजनान्यतरहेतुं विनैव लक्षणा क्रियते तत्राद्यः, द्वितीयश्च लक्षणाप्रयोगाधिक्ये भवति । यथोदाहरणम्–

**नवकुमुदवनश्रीहासकेलिप्रसङ्गा-**
**दधिकरुचिरशेषा–मप्युषां जागरित्वा ।**
**अयमपरदिशोङ्के मुञ्चति स्रस्तहस्तः ।**
**शिशयिषुरिव पाण्डुर्म्लानमात्मानमिन्दुः ॥१॥**

अत्र 'हस्तः' शब्दः करं बोधयति, तेन च किरणाः लक्ष्यन्ते इति नेयार्थम् ।

अन्यच्च–

**"हिमांशोर्हारादधिका, जागरे यामिकाः कराः ।"**

अत्र चन्द्रकिरणेभ्योऽप्यधिका कामिनी- मुक्ताहार-शोभासीदिति । अत्र लक्षणाया–आधिक्यं स्पष्टमिति ।

## ग्राम्यत्वम्

**अविदुषो वचनं ग्राम्यम् । अन्यच्च–**

**"स ग्राम्योऽर्थोरिरंसादिः, पामरैर्यत्र कथ्यते ।**
**वैदग्ध्यवत् किमबलं, हित्वैव वनितादिषु ॥"**

अत्र सहृदयवैमुख्यं दूषकताबीजं बोध्यते । अनित्योऽयं दोषः ।

यथा–

> **"ताम्बूलभृतगल्लोऽयं, भल्लं जल्पति मानवः ।**
> **करोति खादनं पानं, सदैव तु येन्या तथा ।।"**

अत्र 'गल्ल' 'भल्ल' शब्दौ ग्राम्यत्वबोधकौ । अन्यच्च– **'ते कटि हरते मनः'** अर्थात्– तव कटि मे मनः हरते । अत्रापि सहृदयवैमुख्यं जायते । अथवा 'एकं मे चुम्बनं देहि तव दास्यामि कञ्चुकम्' । अत्र 'चुम्बनं' ग्राम्यत्व जनकं वर्त्तते, अतः ग्राम्यत्वदोषः ।

## सन्दिग्धम्

**अर्थद्वयभासमानेन संशयात्मकं भवति यत् तत् सन्दिग्धमिति' ।**

यत्र काव्ये द्वावर्थौ भवति तथा अर्थं संशयात्मकं भवति । एतादृशं पदं संदिग्धाख्यं भवति । सन्दिग्धस्य अन्यं लक्षणं द्व्यर्थमिति–उपलक्षम् । तेनानेकार्थकपदोपादानेऽपि संदिग्धाख्यो दोषः स्यादेव । सं पूर्वकाद् 'दिह उपचये' धातोर्भावे क्त प्रत्ययः । **अन्यच्च–**

**अनेककोटचवलम्बितार्थबोधकत्वं सन्दिग्धत्वम् ।**

उदाहरणं यथा–

> **आलिङ्गितस्तत्रभवान्, सम्पराये जयश्रिया ।**
> **आशीः परम्परां वन्द्यां, कर्णे कृत्वा कृपां कुरु ।।**

अत्र बवयोः ऐकयात् वन्द्यां, वन्दनीयां वा इति अर्थ-द्वय प्रतिभासः। अतः संदिग्धमिति। **अन्यच्च–"नद्यां यान्ति पतत्रिणः"**।

पतन्तं अधोगच्छन्तं त्रायत इति पतत्रं पक्षः तदेषामस्तीति पतत्रिणः पक्षिणः नद्यो सीरति यान्ति गच्छन्ति। अत्र 'नद्यो' इति पदं नदीप्रदेशे गच्छन्ति, द्यो स्वर्गं न गच्छन्ति इत्यर्थद्वयप्रतिपादकमिति। अत्र संदिग्धदोषम्। नद्यो इति पदं सरित् पक्षे सपृभ्यन्तं, स्वगर्थिपक्षे द्वितीयान्तं भवति। अत्र द्वयात्मकविपत्ति सन्देहे 'किं ग्राह्यम् किं न ?' इति सन्देहमुत्पादयति। अतः सन्दिग्ध-दोषं अत्र भवतीति।

## श्रुतिकटुत्वम्

**परुषवर्णतया व्यवह्लितं श्रुतिकटुत्वम्।** यथा–

**उत्खातप्रखरा सुखासुखसखी खड्गा सिता खेलगा ,**
**वैशृङ्खल्यखलोकृताखिलखला खे(खा)त्खेटकैः ख्यापिताः।**
**खेटादुत्खनितु निखर्वमनसां मौर्ख्यं मुखात् खक्खटं ,**
**निःसंख्यान्यनिखर्वसर्वमणिभूराख्यातु सङ्ख्यानि वः॥१॥**

## क्लिष्टत्वम्

**यदीयोऽर्थःअर्थश्रेण्या निःश्रेणि इच्छति तत् क्लिष्टम्।**

**अन्यच्च अर्थपरम्परया स्वल्पतात् पर्यार्थकप्रत्यायकत्वं क्लिष्टत्वम्** । **यथा**– "हरिप्रिया पितृवधूप्रवाहप्रतिभं वचः" ।

हरेः प्रियाःलक्ष्मीःतस्याः पिता समुद्रः तस्य वधूः गङ्गा तस्याः प्रवाहप्रतिभं प्रवाहतुल्यं ते तव वचः अस्ति । अर्थात्– गङ्गाप्रवाहसदृशं ते वचः अस्ति । अत्र समस्तपदगतो दोषः । **अन्यच्च कष्टत्वं** यत्र वाचि न सम्यग् भासते वा दुःखबोधत्वं यत्र वर्त्तते । **यथा**–

**सदा मध्ये या सामममृतरसनिष्पन्दसरसं ,**
**सरस्वत्युद्दामा वहति बहुमायां परिमलम् ।**
**प्रसादं ता एता घनपरिचयाः केन महतां, ,**
**महाकाव्यव्योम्नि स्फुरितरुचिरायां तु रुचयः ।।१।।**

या सा कविरुचीनां प्रतिभास्वरूपाणां प्रभाणां मध्ये बहुमार्गा सुकुमारविचित्रमध्यमात्मक त्रिमार्गा सरस्वती भारती परिमलं चमत्कारं वहति । ताः कविरुचयो महाकाव्यव्योम्नि सर्गबन्धलक्षणे परिचयमागताः ।

### अपुष्टः

अपुष्टोऽर्थो यस्मिस्तदपुष्टार्थदूषणं भवति । **मुख्यानुपकारकविशेषणोपादानत्वमपुष्टार्थम्** । यत्र शब्दपरि-

वर्त्तनेऽप्यर्थे दूषकता स्यात् तदार्थगता दोषा इत्यर्थान्वयव्यतिरेकतयात्रार्थदोषाः ज्ञेयाः । **उदाहरणं यथा–**

**"विशन्ति हृदयं कान्ता कटाक्षाः खञ्जनत्विषः ।"**

खञ्जनस्य त्विड् इव खञ्जनसमानकान्तयः कान्ता कटाक्षा हृदयं विशन्ति प्रविशन्ति इत्यर्थः । अत्र खञ्जन त्विष इति विशेषणेन विशेषस्य कान्ता कटाक्षपदस्य न किञ्चित् हृदयप्रवेशानुकूलोऽतिशय आधीतस्य इत्यपुष्टार्थमत्र । अन्यच्च '**प्रकृतानुपयोगी अपुष्टः**' । यथा–

अनणुरणन् मणिमेखलमविरतसिञ्चानमञ्जुमंजरीन् परिसरणमरुणचरणे रणरणकमकारणं कुरुते । अत्र वर्णसावर्ण्यमात्रं भवति ।

## व्याहतत्वम्

यत्र पूर्वापरविरोधः अनुभूयते । यदि पूर्वः अपरः पूर्वापरौ पूर्वापरार्थौ तयोः अर्थयोः मिथः परस्परं विरोधो व्याघातः स्यात् तदा व्याहतदोषः । "**पूर्वापरार्थं विरुद्धत्वं व्याहतत्वम् ।**" यथा–

"उत्कर्षो वाऽपकर्षो वा प्राग् यस्यैव निगद्यते तस्यैवार्थस्तदन्यश्चेद्, व्याहतोऽर्थस्तदा भवेत् इति न्यायेन स्तुति-

रूपार्थस्य निन्देन निन्दारूपार्थस्य वा स्तुतौ द्विविधो व्याहृतदोषः । **उदाहरणं यथा–**

**जहि शत्रुकुलं कृत्स्नं, जय विश्वंभरामिभाम् ।**
**न च ते कोऽपि विद्वेष्टा, सर्वभूतानुकम्पिनः ।।**

अत्र पूर्वार्द्धे शत्रुकुलं जहि उत्तरार्द्धे न कोऽपि विद्वेष्टा इति परस्परविरोधः । अतः अत्र व्याहृतत्वम् ।

**प्रथमव्याहृतस्यान्यत् उदाहरणम्–**

**सहस्रपत्रमित्रं ते, वक्त्रं केनोपमीयते ।**
**कमलतुल्यं ते मुखं, केन वस्तुना समानी क्रियते ।।**

अत्र पूर्वं कमलोपमां प्रदर्श्याऽपि पुनस्तदुपमानिषेधो दर्शितः । अतः अत्र मिथो विरोध इति व्याहृतता । कमलसादृश्येन पूर्वं मुखस्योत्कर्षः, पुनरत्रोपमाभावप्रदर्शनेन कमलसादृश्यमेवापकर्षद्योतकं प्रथमव्याहृतदोषोदाहरणम् ।

**द्वितीयम्–**

**गोस्तनीमधुपीयूष-मस्तु लोकमनो मुदे ।**
**मदनोन्मत्तचार्वङ्गी वचो मधु मुदे मम ।।**

अत्र पूर्वं मधुन्युपेक्षारूपा निन्दा पुनरुत्तरत्र च मधु न

एवोत्कर्षार्थमारोपः । हेयोपादेयत्वविरोधो दूषकताबीजं, नित्योऽयं दोषः ।

## पुनरुक्तम्

**अधिगतेऽर्थे पुनरभिधानं पुनरुक्तम् ।** अथवा "**अधिगते प्राप्ते वाऽर्थे पुनरभिधानं पुनरुक्तम्**" ।

अर्थप्रतीतत्त्वेऽपि पुनस्तत् प्रतिपादकत्वं पुनरुक्तत्वम् । अत्र वा शब्देन प्रतिपन्नत्वे सति पुनस्तेनैव प्रतिपादने पुनरुक्तत्वम्, किन्तु अर्थेन प्रतिपन्नस्य प्रतिपादने तु अपुष्टत्वम् । यथा–

**तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।**
**दिलीप इति राजेन्दु-रिन्दुः क्षीरनिधाविव ।।१।।**

**अत्र इन्दुरिति पुनरुक्तम् तदर्थस्य राजेन्दुरित्यत्रावगतत्वात् । "कुतस्ततोपमा यत्र पुनरुक्तः सुधाकरः ।"**

तत्रोपमा सादृश्यं कुतः कस्मात् यत्र सुधाकरः चन्द्रः पुनरुक्तः व्यर्थः । अत्र कुत इति पदेनोपमाभावप्रदर्शनेन चन्द्रव्यर्थे सिद्धेऽपि पुनः "पुनरुक्तः सुधाकरः" इति वाक्योपादाने पुनरुक्तता । यद्वा "**वक्त्रं केनोपमीयते**" इत्यस्यावृत्तिः । तेन वक्त्रं केनोपमीयत "**कुतस्तत्रोपमा**" इति वाक्यद्वयं पुनरुक्तम् । न चास्यापुष्टत्वदोषेऽन्तर्भावः ।

**हेत्वाभाववत्-निर्हेतुकम्- यथा-**

**गृहीतं येनासीः परिभवभयान्नोचितमपि ,**
**प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषयः ।**
**परित्यक्तं तेन त्वमसि सुतशोकान्न तु भयात् ,**
**विमोक्ष्ये शस्त्र ! त्वामहमपि यतः स्वस्ति भवते ।।१।।**

अत्र द्वितीयशस्त्रपरित्यागे हेतुर्नोपात्तः ।

## दुष्क्रमम्

**अत्र लोकशास्त्रविरुद्धक्रमाभिधानत्वं दुष्क्रमत्वम् ।" तस्योदाहरणं यथा- हे प्रभो ! त्वद् भक्तः गच्छेयं नरकं स्वर्गमेव वा ? ।**

'हे प्रभो ! त्वद् भक्तः अहं नरकं गच्छेयं स्वर्गं गच्छेयं वा' इति सम्भावना । प्रभोर्भक्तस्य पूर्वं स्वर्गगमनसम्भावना समुचिता, ततश्च नरकगमनरूपा । अत्र तु पूर्वं नरकगमनरूपा समुपातेति दुष्क्रमाख्योऽत्र दोषः । नित्योऽयं दोषः सहृदयोद्वेगः बीजं दूषणतायाः ।

## अनौचित्यम्

**"अयोग्यसम्बन्धत्वं अयोग्यत्वम् ।" 'कीर्त्तिलतां तरङ्गयति यः सदा'** यः सदा यशोवलीं तरङ्गितां करोति ।

अत्र निष्ठतरङ्गवर्णनमनुचितम् । तरङ्गस्य सम्बन्धः समुद्र-सरित्प्रभृतिषु योग्यः । पल्लवयतीति अनुचितम् ।

## प्रसिद्धविरुद्धत्वम्

**यत्र प्रसिद्धया विद्यया शास्त्रेण वा विरुद्धं वर्ण्यते तत्र प्रसिद्धविरुद्धत्वम् । यथा–**

**"न्यस्तेयं पश्य कन्दर्पप्रतापधवलद्युतिः" ।**

इयं कन्दर्पस्य कामस्य यः प्रतापः तस्य धवला द्युतिः शास्त्रेषु काव्येषु वा प्रतिपादिता । अत्र प्रतापस्य रक्तवर्ण-रूपां कविप्रसिद्धिमपहाय श्वेतो वर्णः प्रतापस्य प्रतिपादितः इति कविसमयविरुद्धमेतत् । श्रीकेशवमिश्रेणालङ्कारशेखरे प्रोक्तम्–

**असतोऽपि निबन्धेन, सतामप्यनिबन्धनात् ।**
**नियमस्य पुरस्कारात्, सम्प्रदायस्त्रिधा कवेः ।।**
**विद्याविरुद्धस्योदाहरणं यथा–**
**'केतकी शेखरे शम्भो–र्धत्ते चन्द्रकला तुलाम् ।'**

अत्र केतकीपुष्पं शम्भोः पूजायां वर्जितम् । अतः अत्र केतकेः वर्णनं पुराणादिविद्याविरुद्धं वर्त्तते । यथा-कथितं कार्त्तिकमाहात्म्ये–

श्रृणु केतव ते पुष्पैः, नरो मामर्चयिष्यति ।
लक्ष्मी सन्तति हीनोऽसौ, रौरवं नरकं व्रजेत् ।।

पूर्वं शब्ददोषा अर्थदोषाश्च कथिताः । तदन्तरं रसदोषाः कथ्यन्ते—

(१) रसस्थायिभावादीनां स्वशब्दोक्तिः ।

(२) विभावानुभावयोः कष्टेन प्रतीतिः ।

(३) वर्णनीयरसविरुद्धविभावादिपरिग्रहः ।

(४) पुनःपुनः उद्दीपनं रसादेः ।

(५) अनवसरे रसस्य विस्तारः ।

(६) अकाण्डे रसस्य छेदः ।

(७) प्रकृतीनां विपर्ययः ।

प्रमुखाः अनुक्रमेण यथा—

श्रृङ्गारी गिरिजानने सकरुणो रत्यां प्रवीरः स्मरे ,
बीभत्सोऽस्थिभिरुत्फणी च भयकृन्मूर्त्याद्भुतस्तुङ्गया ।
रौद्रो दक्षविमर्दने च हसकृन्नग्नः प्रशान्तश्चिरा—
दित्थं सर्वरसात्मकः पशुपतिर्भूयात् सतां भूयते ।।१।।

अत्र रसस्य शृङ्गारादेः स्वशब्दोक्तिः ।

"संप्रहारे प्रहरणैः, प्रहाराणां परस्परम् ।
छणत्कारैः श्रुतिगतै- रुत्साहस्तस्य कोऽप्यभूत् ।।

अत्र स्थायिभावस्य स्वशब्दोक्तिः ।

(२) परिहरति रतिं, मतिं लुनीते, स्खलति
भृशं, परिवर्तते च भूयः ।।
इति बत विषमा दशाऽस्य देहं परिभवति
प्रसभं किमत्र कूर्मः ।।१।।

अत्र रति-परिहारप्रमुखानां करुणादावपि सम्भवात् कष्टावसेयः, कामिनीरूपो विभावः ।

(३) प्रसादे वर्तस्व प्रकटय मुदं संत्यज रुषं,
प्रिये ! शुष्यन्त्यङ्गान्यमृतमिव ते सिञ्चतु वचः ।
निधानं सौख्यानां क्षणमभिमुखं स्थापय मुखं,
न मुग्धे ! प्रत्येतुं प्रभवति गतः कालहरिणः ।।१।।"

अत्र शृङ्गारप्रतिकूलस्य शान्तरसस्य निर्वेदस्योपनिबन्धनम् ।

(४) रतिविलापे पुनर्पुनरुद्दीपनम्-इति कुमारसम्भव-काव्यग्रन्थे चतुर्थसर्गे कथितमेव ।

(५) 'अनवसरे रसस्य विस्तारः,' श्रीवेणीसंहारग्रंथे

द्वितीयाऽङ्के कथितं यद् भीष्मप्रमुखानेकानां वीरक्षये करुणवीररसादेरेव प्रसङ्गः शृङ्गाररसस्तु सर्वथाऽनुचितः, तथापि दुर्योधनस्य भानुमत्या सह शृङ्गारवर्णनमिति दोषः ।

(६) **'अकाण्डे रसस्य छेदः'** श्रीवीरचरित्रग्रन्थे द्वितीयाऽङ्के राम-परशुरामयोः वीररसे प्रवृत्ते कङ्कण-मोचनाय गच्छामीति श्रीरामस्योक्तिः प्रसिद्धः ।

(७) **प्रकृतीनां विपर्ययः**– प्रकृतयः त्रिविधा सन्ति । तथा हि–दिव्या, अदिव्या, दिव्यादिव्याश्चेति । तत्र दिव्याः देव-गन्धर्वादयः, अदिव्याः नरादयः, ये दिव्या अपि आत्मनि नराभिमानिनस्ते दिव्यादिव्याश्च । यथा–श्रीरामचन्द्रादय-स्तेषां यत् प्रतिकूलवर्णनं तत् प्रकृतिविपर्ययः । यथा–धीरोदात्तप्रकृतेः रामस्य धीरोद्धतवच्छद्मना वालिवधः । तथा च मातृ-पित्रोः सम्भोगवर्णनवद् भगवतो सम्भोग-वर्णनमनुचितम्, तथापि श्रीकुमारसम्भवकाव्यग्रन्थे पार्वती-शङ्करयोः तद्वर्णनमिति दोषः । एते दोषा स्थल-विशेषे यथायथं दोषत्वं त्यजन्ति । तथा तेषामनुकरणे सति विदूषकप्रोक्तौ, व्यभिचारस्य स्वशब्देन कीर्त्तने, वदनाद्या-कारविशेषे एवं अन्यत्रापि वै । क्वचिद् दोषोऽपि गुणः करोति । यथा–क्रोधयुक्ते वक्तरि रौद्ररसे च दुःश्रवत्वं गुणः

तथा वैयाकरणवक्तरि कष्टत्वं वा दुःश्रवत्वं गुणः । एवं अधमोक्तिषु ग्राम्यत्वं गुणः । तथाऽन्यत्रापि विज्ञेयमिति ।

एतेषां दोषाणामाश्रयाणामपि संक्षिप्तवर्णनं अत्र क्रियते । शब्दनिष्ठाः दोषाः पदादिगतत्वेन पञ्चधा, अर्थदोषस्त्वेकविधः । 'काव्यप्रकाशादौ' तु अर्थदोषो रसदोषश्चेति द्विविधोऽर्थदोषो वर्णितः । अलङ्कारादिदोषास्तूक्तेभ्यो दोषेभ्यो न भिन्ना इति । अतः तेऽत्र न परिगणिताः । 'व्यक्तिविवेके' महिमभट्टेन "तद् यथा विधेयाविमर्शः, प्रक्रमभेदः, क्रमभेदः, पुनरुक्तिः, वाच्यावचनञ्च" इति पञ्चैव दोषाः वर्णिताः काव्यडाकिनी नाम्ने चिरञ्जीव भट्टाचार्यग्रन्थे दोषा एव प्रतिपादिताः ।

कलिकालसर्वज्ञश्रीमद्हेमचन्द्राचार्येण श्रुतिकटुत्वं, च्युतसंस्कृतित्वं, अप्रयुक्तत्वं, असमर्थत्वं, निहतार्थत्वं, अनुचितार्थत्वं, निरर्थकत्वं, अवाचकत्वं, व्रीडाजनकाश्लीलत्वं, अमङ्गलजनकाश्लीलत्वं, सन्दिग्धत्वं, अप्रतीतत्वं, ग्राम्यत्वं, नेयार्थत्वं, क्लिष्टत्वं, अविमृष्टविधेयांशत्वं, विरुद्धमतिकृतत्वं चेत्यादिदोषाः प्रतिपादिताः । एषु श्रुतिकटुत्वादि ये दोषाः अत्र वर्णिताः पददोषाः वाक्यदोषाश्च । निरर्थकत्वावाचकत्व - क्लिष्टत्वादयः पदमात्रगाः । अन्येऽपि चतुर्दशदोषाः अर्थमात्रगाः । यथा–अपुष्टार्थत्वं, कष्टत्वं, व्याहतत्वं,

पुनरुक्तत्वं, दुष्क्रमत्वं, ग्राम्यत्वं, सन्दिग्धत्वं, अनौचित्यत्वं, प्रसिद्धविरुद्धत्वमित्यादयः ।

ये च दोषान् निवारयन्ति ते **'दोषाङ्कुशं'** भवन्ति। अर्थात् येन दोषाः गुणा भवन्ति, निर्दोषाः भवन्ति सः दोषाङ्कुशः । यो हि त्रिधा भेदैः । दोषाङ्कुशभेदत्रयमाह-(१) दोषं गुणतां तनुते, (२) दोषं निर्दोषं करोति, (३) दोषाणां ग्राह्यत्वं विदधाति च । एते त्रयः भेदाः अर्थात् दोषे गुणत्वं, दोषे निर्दोषत्वं, दोषे उपादेयत्वम् तृतीयो भेदः ।

**।। इति दोषनिरूपणम् ।।**

## ।। अथ रीतिनिरूपणम् ।।

शरीरिणोऽवयवसन्निवेश इव रसोपकर्त्री सुप्तिङात्मक-पदसंयोजनात्मिका **'रीतिः'** । यथा शरीरेऽवयवसन्निवेशः तथैव रसोपकर्त्री सुप्तिङात्मकस्वरूपा रीतयः । रीतिविषये श्रीवामनाचार्यः रीतिप्राधान्यं स्वीकरोति । **'रीति-रात्माकाव्यस्य । विशिष्टा पदरचना रीतिः'** ।

सा च **'वैदर्भी, गौडी, पाञ्चाली'** इत्यनेन तिस्रो रीतयः श्रीवामनाचार्यमते कथिताः । लाटीरीतिरधिका श्रीरुद्रटमते कथिता । श्रीभोजराजमते अवन्ती-मागधीसहिताः पूर्वोक्ताः षट्रीतयः कथिता एव ।

कलिकालसर्वज्ञश्रीमद्हेमचन्द्रसूरीश्वराणां मतेऽपि रीतयः षटैव कथिताः। तेषां मते आतुर्यमाचतुर्थं यथा तथा पदैः समासः स्यात् तदा **पाञ्चाली रीतिः**। आ समाप्तं च यथा स्यात् तथा पदैः समासः स्यात् तथा लाटीया लाट-देशप्रिया रीतिः। अष्टमादिभिर्यथेष्टैः पदैः समासो यदा तदा गौडदेशप्रिया **गौडीया रीतिः**। सर्वथापि समासो यदा न स्यात् तदा वैदर्भी रीति विदर्भदेशप्रिया। द्वित्रिचतुष्पदानां समासे पाञ्चाली, पञ्च-षट्-पदानां समासे लाटीया, अष्टमादियथेष्टपद-समासे गौडीया, सर्वथा समासाभावे वैदर्भी रीतिः, पाञ्चालदेशे भवा पाञ्चालिकी, लाटदेशे भवा लाटीया, गौडदेशे भवा गौडीया, विदर्भदेशे भवा वैदर्भीः रीतयः प्रसिद्धाः। रसमनतिक्रमेति यथा रसं रीतयः भवन्ति। शृङ्गारे वैदर्भी, रौद्र-वीरयोर्गौडीया, अन्यत्र पाञ्चाली-लाटीये रीती स्तः।

**साहित्यदर्पणे रीतिलक्षणमाह–"पद-संघटना रीतिः अङ्गसंस्थाविशेषवत्।"** रीयते गुणानां विशेषो ज्ञायतेऽनया इति रीतिः। 'रीङ् गतौ' इति धातोः स्त्रियां क्तिन्। यद्यपि रौद्र-वीरयोर्गौडीया रीतिर्भवति, तथापि कुत्रापि वक्तुरौचित्याद् वीरेऽपि वैदर्भीरीतिर्भवति। यथा– "भो लङ्केश्वर! दीयतां जनकजा रामः स्वयं याचते" इत्यादौ वीरे

रसेऽपि वक्तुः श्रीरामस्यानुद्धततया वैदर्भी रीत्यनुकूला सुकुमार-रचना ।

काव्यप्रकाशे तु उपनागरिका परुषा- कोमलाख्या वृत्तयः एव वैदर्भी-गौडी-पाञ्चाल्याख्या रीतयः । यथा- पाञ्चाल्याः उदाहरणम्- प्रसादगुणाभिव्यञ्जिका, सुश्लिष्टा सुकुमारा मधुरा रचना पाञ्चाल्यां भवति । उदाहरणम्—

**"मधुरया मधुबोधितमाधवी-**
**मधुसमृद्धिसमेधितमेधया ।**
**मधुकराङ्गनया मुहुरुन्मद-**
**ध्वनिभृता निभृताक्षरमुज्जगे ।। १ ।।**

अन्यच्च-

**मदननृपतिमात्राकालविज्ञापनाय,**
**स्फुरति जलधिमध्ये ताम्रपात्रीव भानुः ।**
**अयमपि पुरुहूतप्रेयसी मूर्ध्नि पूर्णः,**
**कलश इव सुधाशुः साधुरुल्लालसीति ।।**

अस्मिन् श्लोके प्रथमपादे चतुष्पदानां समासे पाञ्चाली रीतिः ।

(१) **वैदर्भी**-माधुर्यगुणव्यञ्जिका, मनोहारिणी, कोमलबन्धान्विता, समासरहिता अल्पसमासा वा- **वैदर्भीरीतिः ।** यथा-

"अमुं पुरः पश्यामि देवदारुं,
पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तन-निःसृतानां,
स्कन्दस्य मातुः पयसां रसज्ञः ।।

[इति रघुवंशकाव्ये कथितम्]

नैषधकाव्येऽपि कथितमेवम्—

"निविशते यदि शूकशिखापदे,
सृजति सा रिवतीमिव न व्यथाम् ।
मृदुतनोर्वितनोतु कथं न तां,
अवनिभृत्त निवेश्य हृदि स्थितः ।।१।।"

**लाटीया—**

वैदर्भीपाञ्चाल्योः मध्यवर्तिनी लघुसमाससंयुक्ता ललिता लाटीरीतिः । यथा—

"अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्,
कुपितकपिकपोलक्रोडताम्रस्तमांसि ।।१।।

**अन्ये त्वाहुः—**

"गौडी डम्बरबद्धा स्यात् वैदर्भी ललितक्रमा ।
पाञ्चाली मिश्रभावेन, लाटी तु मृदुभिः पदैः ।।"

(२) गौडी–"ओजो गुणानुरञ्जिका सघनसमासा उद्धतबन्धबन्धुरा–गौडीरीतिः। पञ्च-षट्पदानां समास-सद्भावात् गौडीया। यथा वेणीसंहारे–

"चञ्चद्-भुजभ्रमित-चण्डगदाभिघात-
सञ्चूर्णितोरु-युगलस्य सुयोधनस्य।
स्त्यानावनद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचांस्तव देवि! भीमः॥

अन्यच्च–

"दंष्ट्रालः स्फुटकुन्दकुड्मलशतैः जिह्वाल-उल्लासिभिः,
किं किल्लिद्रुमपल्लवैः शितमुखैः प्रेखन्नखः किंशुकैः।
वल्लीजालविशालबालधिरसावत्रो अयन्ताचलो,
बन्धूकोद्धतलोचनः प्रकुरुते शार्दूलविक्रीडितम्॥

काव्यलक्षणे वृत्तीनिरुपयिष्यन्नादौ मधुरो वृत्ति व्याचष्टे। विलासविन्यासक्रमो वृत्तिः वचनविन्यासक्रमो रीतिः वेषविन्यासक्रमश्च प्रवृत्तिरिति। काव्यमीमांसायां लक्षणानि वर्णितानि–

"वेदभाषानुकरणात्, तथाचारप्रवर्तनात्।
संक्षेपेण समाख्याता, वृत्तिरीतिप्रवृत्तयः॥ १॥

तेन कैशीकी सात्वत्यारभटीभारती-इति नाटक-वृत्तीनामेव मधुराप्रौढापरुषाललिता भद्राख्या-इत्यादयः। मधुरादिवृत्तीनां विलास-विन्यास-क्रमस्वरूपा चात्। निजवर्गस्थैः पञ्चमैर्वर्णङकारादिभिः समाक्रान्ता युक्ता वर्गस्थाः कवर्गादिवर्गस्थिताश्चत्वारो वर्णाः क ख ग घादयः मधुरायां भवन्ति। पुनश्च लसंयुक्तो लकारसहितो लकारः। तथा ह्रस्वव्यवहितौ ह्रस्वाक्षरान्तरितौ रणौ रफणकारौ च मधुरायां स्तः।

साहित्यदर्पणे हि वृत्तौ ट ठ ड ढा वर्णा न भवन्ति। यथा उदाहरणम्–

**"अङ्गभङ्गोल्लसत् लीला तरुणी स्मरतोरणम्"।**

**प्रौढावृत्तेः लक्षणम्–**

ट वर्गात् पञ्चमात् ङकारादि पञ्चमाक्षरात्, "ऋते विना टवर्ग पञ्चमाक्षराणि च वर्जयितु इत्यर्थः। अस्यां वृत्तौ वर्गेण वा क ख ग घादयो वर्णाश्च यणौ यकारण-कारौ चेति वर्णाः, रकार-संयुक्ताः भवन्ति तथा तवर्गश्च कपाभ्यां ककार-पकाराभ्यां आक्रान्तो भवति। अर्थात् तवर्गश्च न रेफाक्रान्तोऽपि तु कपाक्रान्त एव इति भावः। किञ्च प्रौढावृत्तिः ककारस्य मूर्ध्नि तकारो यस्यां सा

तादृशी भवति। संक्षेपेणाऽयं टवर्ग-वर्ग्यपञ्चमाक्षराणि तवर्गं च त्यक्त्वा वर्ग्यायणौ च रेफयुक्ताः तवर्गश्च तपाक्रान्तः क मूर्ध्नि च तकारः प्रौढायां भवति । यथा–

**"तर्ककर्कशपूर्वोक्ति प्राप्तोत्कटधियां वृथा ।"**

**परुषावृत्तिः–**

सकारस्योर्ध्वैकपरिस्थितैः सर्वैः निखिलवर्णैः संयोगः तथा रेफस्य सर्वैः वर्णैः संयोगः अस्यां वृत्तौ भवति । रेफहकारयोः द्विधोपर्यधोभावेन संयोगः, शषौ स्वतः परुषायां स्तः । 'साहित्यदर्पणे' परुषरचनायाः स्वरूपं यथा निर्दिष्टम्–

**"वर्गस्याद्यतृतीयाभ्यां, युक्तौ वर्णौ तदन्तिमौ,**
**उपर्यधो द्वयोर्वा सरेफौ ट ठ ड ढैः सह ।**
**षकारश्च षकारश्च, तस्य व्यञ्जकतां गताः,**
**तथा समासो बहुलो, घटनौद्धत्य शालिनी ।।**
**विप्सोत्सर्पन् मुखाग्रार्द्रं, बर्ही जह्रे कृशस्तृषम् "**

**ललितावृत्ति :–**

यदा लकारस्य लकारे संयोगः भवति, घकार-मकार-धकाराश्च रसकारौ ललितायां भवन्ति । **यथा–**

**ललना रभसं धत्ते धनाः ।**

**भद्रावृत्तिः–**

उक्त चतुर्वृत्यवशिष्टाः षकारादयोऽन्यैर्वर्णैः संयुक्ता असंयुक्ता वा भद्रायां भवति । यथा– **टोपे महीयसी** इत्येताः पञ्चवृत्तयःअक्षरविन्यासविशेषव्यङ्ग्या भवन्ति इतिभावः ।

**मधुरा वृत्तिश्च प्रौढावृत्तिः–**

नव्यन्यायशास्त्रेण कठिनाः व्याप्ताश्च या उत्तमस्ताभिः लब्धाः विकटाः मतिः येस्तैः तार्किकाणां कृत इति भावः । कामतोरणरूपा, अङ्गभङ्गेन भावहावाद्यङ्गविक्षेपेणोल्लसन्ति लीलाविलासो यस्याः सा तादृशी तरुणी वृथा न सुखाय । सा हिंसादित्यपरिशीलनरसिकानामेव सुखदेति भावः । अत्र ङकारधः स्थौ गकारौ लकाररसयुक्तौ लकारो रेफणकारौ च ह्रस्वाक्षरान्तरितावित्यङ्गभङ्गेति पूर्वार्द्धे मधुरावृत्तिः तर्ककर्कशेत्युत्तरार्द्धे ककार-पकारणकारा रेफाक्रान्ताः । तकार ककार पकाराभ्यां संयुक्तः । त्क इत्यत्र च ककारस्य मूर्ध्नि तकार इति प्रौढावृत्तिः । रीतीनां समासव्यङ्गत्वं वृत्तीनां वर्गानुपूर्वी व्यङ्गत्वमित्यनयोर्भेदः । काव्यप्रकाशे तु अनयोः न कोऽपि भेदः इत्युक्तं रीतिनिरूपणप्रस्तावे निरूपितम् ।

**"अङ्गभङ्गोल्लसल्लीला तरुणीस्मरतोरणम् ।**
**तर्क-कर्कश-पूर्वोक्ति प्राप्तो कटधिपां वृथा ॥" (चण्डा०)**

परुषा-ललिता-भद्रा-वृत्तीनां उदाहरणानि अतिशयेन घटाटोपे सति कृशो बर्हीं वारं-वारं उत्सर्पद्यन् मुखाग्रं तदार्द्र यथा तथा येन केन प्रकारेण तृषमत्यजत् वीप्सोत्सर्पन्मुखाग्रार्द्र बर्हीं जहे कृशस्तृषम्। ललना रभसं धत्ते धनाटोपे महीयसी (चन्डा०)। वर्षाकाले मयूराः नृत्यन्ति रमण्यःरमन्ते इति भावः। पूर्वोक्तोदाहरणे पूर्वार्द्धे सकारोर्ध्वस्थौ पकार तकारौ पकार गकार रकारश्च रेफस्योपर्यधःस्थायिनः रकार-दकारौ च मिथः उपर्यधो भावापन्नौ, शकार-षकारौ चायुक्तौ इति परुषा वृत्तिः। "**ललना रभसं धत्ते धनाः**"। इत्यत्रासंयुक्तो लकारः रेफ-भकार-सकार-घकार-धकाराश्च लघवोऽसंयुक्ता इति ललिता-वृत्तिः। "**ललना रभसं धत्ते धनाटोपे महीयसी**" इत्यत्र वर्णानां असंयुक्तत्वाद् भद्रावृत्तिः।

### ।। इति रीतिः निरूपणम् ।।

## ।। अथ अलङ्कार-निरूपणम् ।।

**अथ अलङ्काराः—"अलङ्क्रियतेऽनेनेति अलङ्कारः"**। यथा रसपोषकाः शरीरस्य कनक-कुण्डलादय इव काव्यस्य

शोभाविधायिका **अलङ्काराः**,ते च शब्दार्थगतत्वेन द्विविधाः। शरीरसुषमाध्यायकत्वेन हारादीनामिव काव्यशोभा-सम्पादकत्वेन अनुप्रासादीनां अलङ्काराणां वाचकः। अलंकृतिः अलंकरणं वा अलङ्कारः इति भावप्रधानोऽलङ्कारशब्दः साहित्यशास्त्रपरपर्यायः। यथा शरीरे हारादयः संयोग-सम्बन्धेन आत्मनि शौर्यादयः समवायसम्बन्धेन वर्त्तन्ते तथैव काव्ये शब्दार्थशरीरेऽनुप्रासोपमादयः संयोगवृत्या माधुर्यादयः रसे समयावृत्याद्यवर्तन्त इति भेदोऽवधयः।

बहूनां आचार्याणां काव्यलक्षणे अलङ्काराणां प्राधान्यं वर्त्तते। **श्रीभामहोद्भटवामनरुद्रटादिभिः** काव्यालङ्कार-नाम्ना ग्रन्थाः निर्मिताः। कलिकालसर्वज्ञ-**श्रीमद्हेमचन्द्र-सूरीश्वरेणापि** अलङ्काराणां काव्ये महत्त्वं स्वीकृतमस्ति। एतेषां ग्रन्थेषु रसविचारः स्वल्प एव प्राप्यते। प्रतीयमा-नस्य अर्थस्य अप्रस्तुतप्रशंसा समासो मत्यादिअलङ्कारेषु अन्तर्भावो दृश्यते। पर्यायोक्ति-वक्रोक्ति-अतिशयोक्त्या-दिषु च।

ततः **श्रीआनन्दवर्धनाचार्येण** ध्वनिः उद्भावितः। 'ध्वन्यालोके' अस्य विवेचनं प्राप्यते। प्राधान्येन उपमैवा-लङ्कारः। सैव भूमिकाभेदात् अनेकालङ्कारतो प्राप्नोति। यथा–प्रोक्तं **चित्रमीमांसायां अप्पयदीक्षितेन-**

**उपमैका शैलूषी संप्राप्ता चित्रभूमिकाभेदान् ।**
**रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ।।**

उपमेयोपमानन्वय-प्रतीप-स्मरण-रूपक, सन्देह, दीपक, प्रतिवस्तूपमा - दृष्टान्त - निदर्शना - व्यतिरेक - सहोक्ति - समासोक्ति - श्लेष - अप्रस्तुतप्रशंसा इत्यादयः अलङ्काराः उपमाभूमिकाभेदात् एव उत्पन्नाः ।

**काव्यादर्शे दण्डिना** पञ्चत्रिंशद् अलङ्काराणां विवेचनं कृतम् । **भामहेन** एकोनचत्वारिंशद् अलङ्काराणां वर्णनं कृतम् । **उद्भटेन** चत्वारिंशद् अलङ्काराणां विवेचनं कृतम् । **वामनेन** त्रयस्त्रिंशद् अलंकाराः प्रदर्शिताः । **रुद्रटेन** द्विपञ्चाशत् अलङ्काराः कथिताः । **मम्मटेन** काव्यप्रकाशे सप्तषष्टिः अलङ्काराः प्रदर्शिताः । अलङ्कारसर्वस्वे एकाशीति, एषु षट् शब्दालङ्काराः दर्शिताः । **चन्द्रालोके** शतमलङ्काराः प्रदर्शिताः । **कुवलयानन्दे** चतुर्विशत्यधिकशतमलङ्काराःकथिताः कलिकालसर्वज्ञ**श्रीमद्हेमचन्द्रसूरीश्वरेणापि** षट् शब्दालङ्काराश्च शतमलङ्काराः प्रदर्शिताः सन्ति ।

सामान्यलक्षणेन अलङ्काराणां विवेचनं क्रियतेऽत्र । काव्येऽलङ्कारिकस्य प्रसिद्धया वा प्रौढिवशेन प्रौढिकल्पनया वा शब्दार्थयोः चमत्कारश्च मनोहरशब्दार्थयोः विन्यासः हारादिवत् पुरुषस्य काव्येषु अलङ्कारो भवति । शब्दाना-

ञ्चार्थानां च यः कविप्रसिद्धया वा तस्य प्रौढिकल्पनया मनोहरः सन्निवेशः क्रमशः शब्दगतोऽर्थगतश्च अलङ्कारः, न तु हारादिवत् पुंसः पृथग्भूतः। अनुप्रासादेः शब्द एवान्तर्भावात्, उपमादेश्चार्थे, हारादिवदिति दृष्टान्तस्तु रमणीयता मात्रे न तु सर्वांशो गुणानां मनोहररूपतया सन्निवेशरूपत्वेऽपि न अलङ्कारत्वम्। यत् तेषां तत्त्वेनाप्रसिद्धेरिति भावः केषाञ्चिद् आचार्याणां मतम्। वस्तुतः हारादिवदित्यनेन अलङ्काराणां काव्यात् पृथग्भावः प्रदर्शितः। तेन गुणालङ्कारभेदोऽपि संघटते।

अत्र प्राचीनकविप्रसिद्धाः अन्ये प्रौढिकल्पिता अपि अलङ्काराः सन्ति, इति सूचयन्ति।

अलङ्काराणां शब्दार्थगतत्वनिश्चयस्त्वन्वयव्यतिरेकानुविधायित्वेन बोध्यः। समानार्थकशब्दपरिवर्तनेऽपियोऽलङ्कारो वर्त्तते सोऽर्थनिष्ठः। अन्यथा तु शाब्दः स इति शब्दार्थनिष्ठबोधको हेतुर्दोषालङ्कारादीनाम्। कविप्रसिद्धप्रौढ्यन्तरजनित-हारादि-दृष्टान्तो भूतचमत्कृतिजनकशब्दार्थान्यतरसन्निवेशत्वमलङ्कारत्वम्। यथा— **काव्यप्रकाशे** अलङ्कारलक्षणम्—

**उपकुर्वन्ति तं सन्त-मङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥८२-६७॥**

एवं काव्यप्रकाशमतेन रसोपकारकत्वे सति तदवृत्तित्वं तथात्वे सति रसानियतास्थितित्वम्, अनियमेन रसोपकारत्वमिति लक्षणत्रितयं फलितम्। **कुवलयानन्देऽलङ्कारचन्द्रिकायाञ्चा**लङ्कारलक्षणं यत् निरूपितं यथा– रसवदादिभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठाया विषयिता सम्बन्धावाच्छिन्ना चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वमलङ्कारत्वमिति। अस्माकं मतेऽपि **वैद्यनाथेन** परिष्कृत्य अलङ्काराणामिदं लक्षणं प्रोक्तम्। अस्माकं मतेऽपि अनुप्रासादिविशिष्टशब्दज्ञानमुपमादि विशिष्टार्थज्ञानं चमत्कृतिजनकम्, तेन तयोश्चमत्कृतिजनकता वर्त्तत एव। तदवच्छेदकता चानुप्रासोपमादिविशिष्टशब्दार्थयोर्वर्त्तते।

अत्र चानुप्रासोपमादयो विशेषणीभूता इत्यस्माकं मतम्। चमत्कृतिजनकावच्छेदकता च शब्दार्थयोः विषयतासम्बन्धेन वर्तत, इति विषयता-सम्बन्धोऽयं चमत्कृति-जनकतायाः अवच्छेदकः। चमत्कृतिजनकतावच्छेदकता च शब्दार्थान्यतरनिष्ठविषयता सम्बन्धावच्छिन्ना वर्त्तते। तेन शब्दार्थान्तरनिष्ठा विषयतासम्बन्धावच्छिन्ना या चमत्कृतिजनकतावच्छेदकता तदवच्छेदकत्वमलङ्कारत्वमिति ममाऽपि सिद्धान्तम्।

ननु ध्वनिविशिष्टार्थज्ञानेनापि चमत्कारोदयात्-ध्वनिविशिष्टार्थज्ञाने चमत्कृतिजनकता तदवच्छेदकता-वच्छेदकत्वं च ध्वनौ वर्तत, इत्येतस्यापि अलङ्कारत्वम्। एतेन ध्वनौ व्यङ्ग्यार्थस्य सत्वान्नालङ्कारत्वम्।

एवं सत्यपि रसवत्प्रेयङ्गर्जस्विसमाहितेषु चतुर्ष्व-लङ्कारेषु व्यङ्ग्यार्थसद्भावान्नालङ्कारत्वं स्याद् तेन लक्षणेन। मन्यन्ते च तत्रालङ्कारत्वं सर्वैरिति चेत् तदा रसवदादि-भिन्नव्यङ्ग्यभिन्नत्वे सतीति विशेषणविशिष्ट-सत्पन्न-विशेषणोपादनं कर्त्तव्यम्, तेन उक्तलक्षणे न कोऽपि दोषः।

## अथ शब्दालङ्काराः

१ **अनुप्रासः**– 'प्रकर्षश्चाऽव्यवधानेन न्यासः स एव च सहृदयहृदयानुरञ्जकः'। **साहित्यदर्पणे**–अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्। **काव्यप्रकाशे**– 'वर्णसाम्यमनुप्रासः'। सोऽयं अनुप्रासः वर्णगतः शब्दगतश्चेति द्विविधः। निरर्थक-वर्णानुप्रासः प्रथमः। द्वितीयस्तु सार्थकः वर्णानुप्रासः। अनुप्रासः पञ्चविधः–

(क) **छेकानुप्रासः**– तत्र प्रथमो छेकानुप्रासः छेकवृत्ति-त्वेन द्विविधः। प्रथमः यत्र स्वराः व्यञ्जनानि च तेषां सन्दोहः साम्यं स्तोमो वा तस्य व्यूहावृत्तिर्यस्यां सा। यद्वा

"छेकास्त्रिषु विदग्धेषु गृहासक्तमृगाण्डजे"। इति चवर्गादौ रभसकोशेन छेका आलस्थाः परीक्षणास्तेषां अनुप्रासेन द्विर्भाषितेन भासुराः। एषां पक्षिणां द्विर्भाषितं भवतीति व्यवहारसादृश्येन छेकानुप्रास संज्ञा। अथवा स्वरस्तोमानां व्यञ्जन्-स्तोमानां उभयेषां च यत्र सकृत् साम्यं तत्र छेकानुप्रासः।

अनुप्रासे स्वरवैपरीत्येऽपि शब्दस्य साम्यं भवति। यत्र वर्णानामेकवारमावृत्तिः तत्र छेकानुप्रासः। अत एव काव्य-प्रकाशे "**सोऽनेकस्य सकृत्पूर्वः**" अनेकस्य व्यञ्जनस्य सकृत् साम्यं छेकानुप्रास इत्युक्तम्।

वृत्त्यनुप्रासे तु एकस्यापि व्यञ्जनस्य असकृद् आवृत्ति-र्भवति। **साहित्यदर्पणे** तु "**छेको व्यञ्जनसंघस्य सकृत् साम्यमनेकधा**" इति छेकानुप्रासलक्षणमुक्तम्।

**छेकानुप्रासस्य लक्षणं वक्ष्यतेऽधुना–**

**छेको व्यञ्जनसंघस्य सकृत् साम्यमनेकधा ।।सा.द.।।**

यथा–

**निरानन्दः कौन्दे मधुनि विधुरो बालमुकुले,**
**न साले सालम्बो लवमपि लवङ्गे न रमते।**
**प्रियङ्गौ नासङ्गं रचयति न चूते विटमति,**
**स्मरं लक्ष्मीलीलाकमलमधुपानं मधुकरः।।**

(ख) **वृत्त्यनुप्रासः**- रसानुगुणा वर्णरचनावृत्तिःवृत्त्यनुप्रासः। "वृत्त्यनुप्रासवचनं अमन्दानन्दमन्दिरम्" 'एकस्याप्यसकृत्परः' **काव्यप्रकाशे** वर्णितः। असकृदनेकवारमावर्त्तनं वृत्त्यनुप्रासः। आवृत्तवर्णेन सम्पूरितं वचनं वृत्त्यनुप्रासे भवति। वृत्तम् अर्थात् आदितोऽवसानपर्यन्तं वर्त्तनम्। तदस्यास्तीति वृत्ती तस्यानुप्रासः सोऽस्यामस्तीति वृत्त्यनुप्रासः। संक्षेपतः **यत्र वर्णानामनेकवारमावृत्तिः तत्र वृत्त्यनुप्रासः। यथा–**

(१) **उत्कूजन्तु वटे-वटे बतबकाः काकाः वराका अपि,**
**क्रां कुर्वन्तु सदा निनाद - पटवस्ते पिप्पले-पिप्पले।**
**सोऽन्यः कोऽपि रसालपल्लवनवग्रासोल्लसत्पाटवः,**
**क्रीडत् कोकिलकण्ठकूजनकला–लीलाविलासक्रमः॥**

(२) **अमन्दानन्दसन्दोहस्वच्छन्दास्पदमन्दिरम्।**

(ग) **श्रुत्यनुप्रासः**– यत्र समानोच्चारणस्थानानां वर्णानां प्रयोगः विधीयते तत्र **श्रुत्यनुप्रासः** भवति। एकैव स्थानोच्चारिताः शब्दाः श्रवणमधुराः भवन्ति अतः यत्र कण्ठ- तालव्य - मूर्धन्य- दन्त्यौष्ठ - नासिका स्थानानां वर्णानां आवृत्तिर्जायते तत्र श्रुत्यनुप्रासः भवति। यथा-

जयतु जिनेश्वर जय, जय 'सुशील' सन्तापहर।

(घ) **अन्त्यानुप्रासः**– यत्र यथासम्भवमनुस्वारविसर्ग-

स्वरयुक्ताक्षर विशिष्टं व्यञ्जनं पदान्ते वा आवर्त्यते तत्र **अन्त्यानुप्रासः**। यथा–

> **केशः काशस्तबकविकासः,**
> **कायः प्रकटितकरभविलासः।**
> **चक्षुर्दग्धवराटककल्पं,**
> **त्यजति न चेतः काममनल्पम् ॥१॥**

(ङ) **लाटानुप्रासः**–शब्दगतोऽयमनुप्रासः, यत्र तात्पर्य-मात्रतः भेदे सति शब्दार्थयोः पौनरुक्त्यं तत्र लाटानुप्रासः। लाटजनप्रियत्वादेष लाटानुप्रासः, भिन्नाभिप्रायक पुनरुक्तत्वं लाटानुप्रासः। **साहित्यदर्पणे**– **"शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः" इति साहित्यदर्पणे लक्षणमुक्तम्**। **काव्यप्रकाशे** तु पदानां पदस्य एकसमासे भिन्नसमासे समासासमासयोश्च नाम्नः सारूप्यात् पञ्चधा लाटानुप्रासः। यत्र वैरिणः हुंकारशब्दो न स्यात् जितं सफलम्। **यथा– "यत्र स्यान्न पुनः शत्रोः गर्जितं तर्जितं जितम्।"** अत्र "जितं जितम्" इति पुनरुक्तपदे द्वितीयजितशब्दस्य सफलतारूपाभिप्रायात् **लाटानुप्रासत्वम्**"। **अन्यच्च**–

> **स्मेर राजीवनयने, नयने किं निमीलिते।**
> **पश्य निर्जितकन्दर्पं, कन्दर्पवशनं पतिम् ॥**

**यमकः भिन्नार्थस्य स्वरव्यञ्जनसङ्घस्य यथैकधा समुच्चारणं तथैव पुनरुच्चारणं 'यमकालङ्कारः'।** अथवा **'यम्यते इति यमकम्'। भिन्नार्थवर्णसमूहावृत्तित्वं 'यमकत्वम्'।**

यमौ द्वौ समजातौ तौ तत्प्रकृतियमकम्। अनुप्रासे वर्णावृत्तेः स्थाननियमो नास्ति। यत्र तु वर्णावृत्तेः स्थाननियमोऽस्तीति द्वयोर्भेदः। क्वचिद्वर्णभेदेऽपि श्रुतिसाम्येन **यमकं** भवति। तदुक्तम्–

**यमकादौ भवेदैक्यं, डलयोर्रलयोर्बवोः।**
**शषयो र्नणयोश्चान्ते, सविसर्गाविसर्गयोः॥**
**सबिन्दुकाबिन्दुकयोः स्यादभेदप्रकल्पनम्॥**

यमकं हि एकस्मिन् द्वयोश्चतुर्षु वा पादेषु प्रयोक्तव्यं न तु पादत्रये। यमकं तु विधातव्यं न कदाचिदपि त्रिपात्। **उदाहरणं यथा–** "स्तबकं स्तबकं माधुर्यं माधुर्यं" इति पादान्तवर्णावृत्तेः सत्वात्। **काव्यप्रकाशादौ** यमकस्य अनेकभेदाः व्याख्याताः। तथाहि - मुख - सन्देश - आवृत्ति - गर्भ - सन्दृष्ट- पुच्छ - पंक्ति - परिवृत्ति - युग्मक - समुद्रक- महायमकं इत्यादय एकादशभेदाः। पाद - भागवृत्तियमकेषु, द्विखण्डीकृतेषु विंशतिः त्रिखण्डीकृतेषु त्रिंशत्, चतुःखण्डीकृतेषु चत्वारिंशद् भेदाः। स्थानपरिवर्त्तने च

अन्तादियमक - आद्यन्तयमक, एतत्समुच्चय - मध्यादियमक, आदिमध्ययमक, उभयसमुच्चय, अन्त्यमध्य, मध्यान्तिक, अन्त्य मध्यान्तसमुच्चयादयो बहवः भेदाः। स च श्लोक-श्लोकार्द्ध - पाद - पादांशभेदेनानेकधा - तत्र श्लोकयमकं महायमकं कथ्यते। **यमकस्योदाहरणं यथा—**

**भव्याम्भोजविबोधनैकतरणि-र्विस्तारिकर्मावली,**
**रम्भासामजनाभिनन्दनमहानष्टापदाभासुरैः ।**
**भक्त्या वंदितपादपद्मविदुषां सम्पादयप्रोज्झिता,**
**रम्भासामजनाभिनन्दनमहानष्टापदाभासुरैः ॥१॥**

(३) **वक्रोक्तिः—**श्लेषवक्रोक्तिकाकुभ्यां वाच्यान्तरकल्पनम्। श्लेषश्च काकुश्चेति ताभ्यां यत्र वाच्यान्तरस्य कल्पनं क्रियते तत्र **वक्रोक्तिः**। अन्याभिप्रायेण वाक्यमन्यार्थकतया श्लेषेण काक्वा श्लेषेण वाऽन्यार्थे योजयेत् तत्र **वक्रोक्तिः । यथा—**

**सद्वाः प्रेयसि ! दीयतां प्रियतम ! द्वारं किमुच्छाद्यते,**
**सत्कं सुन्दरि ! याचितं कथय मे, किं कस्य सत्कं प्रिय ।**
**श्रीनाभेयजिनस्य मज्जनजलं कस्त्वं जनः किं जलं,**
**दम्पत्योरिति जल्पितं जिनपतेः स्नात्रोत्सवे पातु वः ॥**

**विज्ञप्तित्रिवेण्यां यथा—**

**कुन्थुं कान्त! नमस्कुरु प्रियतमे! कः क्षुद्रजन्तुं नमेत् ।**
**बर्त्तः! श्रीतनयं वदामि मदनः, किं नैष सूरात्मजः ॥**
**किं मन्दोऽयमयि प्रभो! नहि जगत्प्रद्योतकस्तीर्थकृत् ।**
**दम्पत्योरिति वक्रवाक्यविषयः पुण्यात् सुखान्येष वः ॥**

अत्र अन्यदीयान्यार्थकं योजितम् । सभङ्गश्लेषेणार्थान्तर-कल्पनाद् वक्रोक्तिः श्लेषभूता । **काकुवक्रोक्तिः–**

**काले कोकिलवाचाले, सहकारमनोरमे ।**
**कृतागसः परित्यागात्, तस्याश्चेतो न दूयते ॥**

इत्यत्र न दूयते अपितु दूयत एवेति काक्वा वक्रोक्तिः **श्रीकुन्तकाचार्यो** वक्रोक्तिजीवितग्रन्थे सर्वेषामलङ्काराणां वक्रोक्त्यलङ्कारे समावेशं चक्रे । "**वक्रोक्तिः काव्यजीवितम्**" इत्यपि च तेन तत्रैवोक्तम् । '**वक्रोक्तिजीवित**' ग्रन्थस्य तृतीयोन्मेषे वाक्यवैचित्र्यवक्रता द्रष्टव्या ।

(४) **भाषासमः– "अनेक - विधास्वपि भाषासु एकविधैरेव वाक्यैर्यत्र रचना विधीयते तत्र भाषासमालङ्कारः भवति ।।"** तस्योदाहरणं **यथा–**

**संसार - दावानल - दाह - नीरं,**
**संमोह - धूली - हरणे समीरम् ।**
**माया - रसा - दारण - सार - सीरं,**
**नमामि वीरं गिरि - सार - धीरम् ।। १ ।।**

अस्मिन् श्लोके संस्कृत - प्राकृतभाषाद्वयोः समानता वर्त्तते ।

**अन्यश्चोदाहरणं यथा–**

**आलोलकमले चित्ते, ललामकमलालये ।**
**पाहि चण्डि! महामोह-भङ्गभीमबलामले ।।१।।**

[इति श्रीवाग्भटविरचिते काव्यानुशासने प्रोक्तमिदम्]

अत्र संस्कृतम्, प्राकृतम्, मागधी, पैशाचिकी, शौरसेनी, अपभ्रंशा- इति षण्णां भाषाणां योगः अस्ति ।

(५) **श्लेषः– "अनेकार्थपर्यवसितैरेकविधैरेव शब्दैरनेकार्थाभिधाने श्लेषालङ्कारः ।"** नानार्थकशब्दजन्यानेकार्थाभिधानत्वं श्लेषत्वम् । यथा– "सकलप्रदो माधवः पायात् संयोगं गामदीधरत् ।"

**कुवलयानन्दे** सामान्यलक्षणं वर्णितम्, नानार्थसंश्रयश्लेषो वर्ण्यावर्ण्योभयमिश्रितः । अत्रोदाहरणे यथा - सकलप्रदो माधवः पायात्, योऽगं पर्वतं गोवर्धनाख्यं गां भूमिं च दधावित्येकोऽर्थः अन्यश्च सर्वदा सदा उ माधव शिवः पायात् यो गङ्गां दधौ इति द्वितीयोऽर्थः । द्विविधस्याप्यर्थस्य अत्र प्रतीति अभिधया वृत्या एव भवति । स च श्लेषो द्विविधः शब्दगतोऽर्थगतश्च । तत्र च शब्दगतो वर्ण- पद- लिङ्ग- भाषा- विभक्ति- प्रकृति- प्रत्यय- वचनभेदाद् अष्टधा । सभङ्गः, अभङ्गः, उभयात्मकश्चेति पुनः स त्रिविधः ।

त्रिविधोप्ययं प्रकृतानेकविषयप्रकृताप्रकृतानेकविषयश्चेति त्रिविधः । अत्र प्रथमे द्वितीये च भेदे विशेषस्य श्लिष्टतायां कामचारः, तृतीयभेदे तु विशेषण - वाचकस्यैव पदस्य श्लिष्टत्वं न विशेष्यवाचकपदस्यापि । तथात्वे तु शब्दशक्ति-मूलध्वनेः उच्छेदः एव स्यात्, पादश्लेषस्य खण्डश्लेषः, भङ्गश्लेषश्चेति द्वौ भेदौ । तत्र च खण्डश्लेषस्येदं लक्षणम्- **"प्रत्येक - वाक्यार्थं प्रतिपदानां शब्दानां भिन्नार्थकता तर्हि खण्डश्लेषः ।"** अन्यच्च **"समस्तपदावयवस्यैकरूपस्यै-वार्थभेदेन वाक्यार्थ द्वय प्रतिपादकत्वं खण्डश्लेषः ।**

श्लेषालङ्कारविषये तावदयं विचारः प्रस्तुतो ग्रन्थान्तरेषु तथाहि– शब्दयोः जतु काष्टन्यायेन सभङ्गः श्लेषः शब्दगतः, शब्दाभेदाद् - एकवृन्तगतफलद्वयन्यायेन अभङ्गश्लेषः अर्थनिष्ठः । केषाञ्चिन्मते सभङ्गाभङ्गोभयात्मकश्चेति । त्रिधा । **सभङ्गो यथा–**

**पृथुकार्त्तस्वरपात्रं, भूषितनिःशेषपरिजनं देव ! ।**
**विलसत् करेणुगहनं, सम्प्रति सममावयोः सदनम् ।।१।।**

**अभङ्गो यथा–**

**किं तत्रास्ति निरन्तरं न भवतः सङ्गः कुरङ्गीदृशां ,**
**किं वा तत्र तथा पयोधरपरिष्वङ्गोऽपिनाह्लादकः ।**
**यन्मामत्र विहाय निर्वृतिमना नाथोज्जयन्तं गतः ,**
**पायाद् वोऽभिहितः स भोजसुतया देवः शिवानन्दनः ।।१।।**

**उभयात्मको यथा-**

**माघेन विघ्नितोत्साहा, नोत्सहन्ते पदक्रमे ।**
**स्मरन्ति भारवेरेव, कवयः कपयो यथा ।।१।।**

**।। इति शब्दालङ्काराः ।।**

## ।। अथ अर्थालङ्काराः ।।

अर्थालङ्कारेषु उपमायाः महत्त्वं विशेषेण वर्त्तते । सादृश्यमूलेषु सादृश्यप्रतिभोत्थापितेषु स्मरणादिषु लक्षितव्येषु तेषां सादृश्यमूलालङ्काराणां उत्थापकत्वेन प्राधान्यात् प्रथमे उपमालङ्कारः निरूपणं विधीयते ।

उपमायामुपमेयोपमानस्य साधारणो धर्मः उपमा वाचकश्चेति चत्वारः पदार्थाः । तत्र साधारणधर्मत्वेन प्रसिद्धः पदार्थः उपमानम् । तद् धर्मतया कविसंरम्भ-गोचरः उपमेयम् उत्कृष्टगुणवत् तया संभाव्यमानमुपमानम्, अपकृष्ट-गुणवत्तया संभाव्यमानं उपमेयम् । अर्थात्-सादृश्य-प्रतियोगी उपमानं सादृश्यानुयोगी उपमेयम् । उपमानो-पमेययोः संगतो धर्मः साधारणः कथ्यते । यस्य धर्मस्य सम्बन्धाद्येन सह यद् उपमीयते स साधारणधर्मः तदुप-मानं तच्चोपमेयम् । यथा- "**श्रीपार्श्वस्य पादौ कमलौ इवास्तः**" अत्र मनोज्ञत्वधर्म कोमलत्वधर्म सम्बन्धात्

तद्वद् तया प्रसिद्धेन कमलेन सह पादौ उपमीयते कोमलत्वं साधारणधर्मः कमलमुपमानं पादौ उपमेयमिति **उपमालङ्कारः ।**

इयमुपमा तदुक्तिवैचित्र्येण नानालङ्कारभावं अवगाहते । तथाहि- "द्वयोपरुमानोपमेययोः सादृश्य - प्रतीतेः पूर्णोपमालङ्कारः । तथा च उक्तेषु चतुर्षु पदार्थेषु मध्ये कस्याप्येकस्यापि अभावे लोपे वा लुप्तोपमा भवति । पूर्णोपमाश्नौत्यार्थीभेदेन द्विधा । तेऽपि वाक्य-समास-तद्धित-गतत्वेन षड्विधे । एवं पूर्णोपमायाः षड्भेदाः धर्मलुप्तोपमा च तद्धितगतश्नौतिमन्तरोक्तभेदैः पञ्चधा । पुनरपि सा धर्मलुप्ता कर्मविहित - क्यचि, आधारविहितक्यचि, कर्मविहितणमुलि, कर्तृविहितणमुलि क्याङि पञ्चधा भवति । उपमानलोपे वाक्यसमासगतत्वेन द्वौ भेदौ । वाक्यलोपे समासे क्विपि च द्वौ भेदौ उपमेयलोपे क्यचि एको भेदः धर्मोपमेयलुप्तैका ।

धर्मवाचकोपमानलुप्ता चैका समासगा । एवं संकलने लुप्तोपमायाः एकविंशतिभेदाः पूर्णतयाश्च षट् भेदाः भवन्ति । सर्वे च सप्तविंशतिभेदाः उपमायाः । 'काव्यप्रकाशे' लुप्तोपमायाः एकोनविंशतिभेदाः, ते उक्तभेदेषु अन्तर्गताः, 'कुवलयानन्दे' तु वाचकोपमानलोपे एको भेदो-

ऽधिकः स्वीकृतः । 'काव्यादर्शे' दण्डिना धर्मोपमा, वस्तूपमा, विपर्यासोपमा, अन्योन्योपमादयः द्वात्रिंशद् भेदाः उपमायाः प्रोक्ताः ।

**तत्र अतिप्रसिद्धत्वात् प्रथमं उपमालङ्कारः–**

**१– "उपमानोपमेययोर्हृद्यं साधर्म्यं उपमालङ्कारः ।"**

स च द्विविधः । **पूर्णोपमालङ्कारः प्रतीयमानोपमालङ्कारश्चेति** । यत्र उपमानमुपमेयं साधारणधर्मः सादृश्यं च प्रोक्तानि स्युः तत्र पूर्णोपमालङ्कारः । एतेषामन्यतमस्यानुक्ते प्रतीयमानोपमालङ्कारश्चेति ।

**पूर्णा यथा–**

**गत्या विभ्रममन्दया प्रतिपदं या राजहंसायते ,**
**यस्याः पूर्णमृगाङ्कमण्डलमिव श्रीमत्सदैवाननम् ।**
**यस्याश्चानुकरोति नेत्रयुगलं नीलोत्पलानि श्रिया,**
**तां कुन्दार्हदतीं त्यजञ्जिनपती राजीमतीं पातु वः ।।**

अत्र पूर्णोपमालङ्कारः प्रवर्तते । **प्रतीयमाना यथा–**

**अनाधिव्याधिसंबाध-ममन्दानन्दकारणम् ।।**
**न किञ्चिदन्यदस्तीह, समाधेः सदृशं सखे ! ।।**

अत्र प्रतीयमानालङ्कारः वर्त्तते ।

२– "यत्र पूर्वपूर्वोपमेयस्य उत्तरोत्तरमुपमानता तत्र–रसनोपमालङ्कार : ।"        यथा–

चन्द्रायते शुक्लरुचाऽपि हंसो,
हंसायते चारुगतेन कान्ता ।
कान्तायते स्पर्शसुखेन वारि,
वारीयते स्वच्छतया विहायः ।।१।।

३– "एकस्यैव वस्तुनो यदोपमानत्वमुपमेयत्वं च तदाऽनन्वयालङ्कारः ।"

यथा–

"राजीवमिव राजीवं, जलं जलमिवाऽजनि ।
चन्द्रश्चन्द्र इवातन्द्रः, शरत् समुदयोद्यमे ।। १ ।।"

अत्र अनन्वयालङ्कारः प्रवर्त्तते ।

४– "यत्रानुक्रमेण द्वयोरुपमानोपमेयत्वं तत्र उपमेयोपमालङ्कारः ।"

यथा–

"गिरिरिव गजराजोऽयं,
गजराज इवोश्चकैर्विभाति गिरिः ।
निर्झर इव मदधारा ,
मदधारेवास्य निर्झरः स्रवति ।। १ ।।

अत्र उपमेयोपमालङ्कारः वर्त्तते ।

५– "यत्रोपमेये उपमानस्य 'अभेदाध्यवसायः'
तत्र रूपकालङ्कारः।"

यथा–

" संसार एष कूपः सलिलानि विपत्तिजन्मदुःखानि।
इह धर्म एव रज्जुस्तस्मादुद्धरति निर्मग्नान् ॥ १ ॥

अत्र रूपकालङ्कारः प्रवर्त्तते।

६– "यत्र सादृश्यज्ञानतः स्मृतिः संजायते तत्र
स्मृत्यलङ्कारः।"

यथा–

"पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः।"

अत्र स्मृत्यलङ्कारो वर्त्तते।

७– यत्र सादृश्यज्ञानतो भ्रान्तिः संजायते
तत्र भ्रान्त्यलङ्कारः।

यथा–

पलाशमुकुलभ्रान्त्या, शुकतुण्डे पतत्यलिः।
सोऽपि जम्बुफलभ्रान्त्या, तमलिं धर्तुमिच्छति ॥ १ ॥

अत्र भ्रान्त्यलङ्कारः प्रवर्त्तते।

**८- यत्र सादृश्यज्ञानतः सन्देहः संजायते तत्र सन्देहालङ्कारः ।**

**यथा-**

**जीवनग्रहणे नम्रा, गृहीत्वा पुनरुन्नताः ।**
**किं कनिष्ठाः किमुज्येष्ठा, घटी यन्त्रस्य दुर्जनाः ।। १ ।।**

अत्र सन्देहालङ्कारो वर्त्तते ।

**९- वर्णनीयवस्तुधर्मनिह्नवपूर्वकतत् सादृशधर्मारोपः शुद्धापह्नुतिः अलङ्कारः ।**

**यथा-**

"अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे,
सारङ्गं कतिचिच्च संजगदिरे भूच्छायमैच्छन्परे ।
इन्दौ यद् दलितेन्द्रनीलशकलश्यामं दरीदृश्यते,
तत्सान्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे ।। १ ।।

अत्र शुद्धापह्नुतिः अलंकारः प्रवर्त्तत्ते ।

१०- यत्र निषेधं विना फलस्वरूपयोः ग्रहणम् । उत्कटकोटि सन्देह विषयी क्रियते, तत्र **उत्प्रेक्षेति** भावः । उत् ऊर्ध्वंगता प्रेक्षा बुद्धिः यस्यां सा उत्प्रेक्षा । प्रकृत-स्योत्कट - कोटिकज्ञानतादात्म्येन सम्भावनमुत् प्रेक्षा; गूढा

अगूढा च इयं उत्प्रेक्षा द्विधा । इवादिपदाभावे गूढा, इव पदस्य सत्तायां चागूढा ।

दण्डिना काव्यादर्शे दर्शितम्–

मन्ये शङ्के ध्रुवं प्रायो, नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दै-रिवाशब्दोऽपि तादृशः ।।

अत्यन्तसादृश्यादसतोऽपि धर्मस्य कल्पन-मुत्प्रेक्षाऽलङ्कारः । सा च एवं मन्ये शङ्के ध्रुवं नूनमित्यादिभिः शब्दैर्व्यज्यते ।

यथा–

दिशतु विरतिलाभानन्तरं पार्श्वसर्प-
न्नमिविनमिकृपाणोत्सङ्गदृश्याङ्गलक्ष्मीः ।
त्रिजगदपगतापत् कर्त्तुमात्तान्यरूप-
द्वय इव भगवान् वः सम्पदं नाभिसूनुः ।।

प्रतीयमानोत्प्रेक्षालङ्कारो यथा–

बलं जगद्ध्वंसनरक्षणक्षमं,
क्षमा च किं संगमके कृतागसि ।
इतीव संचिन्त्य विमुच्य मानसं,
रुषेव रोषस्तव नाथ ! निर्ययौ ।।

अत्र प्रतीयमानोत्प्रेक्षालङ्कारः प्रवर्त्तते ।

## ११- अत्युक्तिर-तिशयोक्तिरलङ्कारः ।

अतिशयोऽतिशयता प्रसिद्धिमतिक्रान्ता उक्तिरतिशयोक्तिः । विषयिणा विषमस्य निगरणमतिशयस्तस्योक्तिः इति । यत्र च उपमानद्वारोपमेयस्य निगरणं भवति । यथा साहित्यदर्पणे–

"सिद्धत्वेऽध्यवसायस्यातिशयोक्ति निगद्यते।" अध्यवसायो नाम विषयिणा विषयनिगरणेन द्वयोरभेदप्रतिपत्तिः, यत्र कार्यकरणे युगपत् एककालमेव कार्यकारणाधिकरणैककालावच्छिन्नत्वमतिशयोक्तित्वम् ।–

**मुखं द्वितीयश्चन्द्रः।** अत्र अतिशयोक्तिः विषये अधःकरण मात्रेण निगरणं भवति । अतिशयोक्तिनां अन्योदाहरणेषु विषयानुपादानात् निगरणं भवति । भेदेप्यभेदः सम्बन्धेऽसम्बन्धस्तद् विपर्ययौ पौर्वापर्यात्ययः कार्यहेत्वोः सा पञ्चधा [साहित्यदर्पणे] भेदेऽभेदः, अभेदे भेदः सम्बन्धेऽसम्बन्धः, असम्बन्धे सम्बन्धः, कार्यकारणपौर्वापर्यवत्यास इति पञ्चविधातिशयोक्तिः । 'कुवलयानन्दे' यथा-रूपकातिशयोक्तिः, भेदकातिशयोक्तिः, सम्बन्धातिशयोक्तिः, चपलातिशयोक्तिः, अत्यन्तातिशयोक्तिश्चेति ।

**अतिशयोक्त्याः अलङ्कारस्योदाहरणं यथा–**

**सममेव समाक्रान्तं, द्वयं द्विरदगामिना ।**
**तेन सिंहासनं पित्र्यं, मण्डलं च महीक्षिताम् ।। १ ।।**

अत्र अतिशयोक्तिरलङ्कारः वर्त्तते ।

१२– **दृष्टान्तालङ्कारः** – "**यत्रोपमानोपमेययोर्भिन्नौ धर्मौ बिम्बप्रतिबिम्बभावेन वर्णितौ तत्र दृष्टान्तालङ्कारः ।**"

यत्र बिम्ब-प्रतिबिम्बत्वं दृष्टान्तस्तत्र वर्ण्यते । चेद् यदि वाक्यार्थयो बिम्बश्च प्रतिबिम्बश्चेति बिम्ब-प्रतिबिम्बौ तयोर्भावो बिम्बप्रतिबिम्बत्वम् । "बी गति व्याप्ति-पूजनकान्त्यसनखादनेषु" इति धातोः "उत्वादयश्च (४।६५) इत्यौणादिकात् सूत्राद् वन्नुमागम ह्रस्वत्वे बिम्बशब्द-सिद्धिः । यथा दर्पणे बिम्बवत् प्रतिबिम्बः दृश्यते तथैव एकवाक्यवदपरवाक्यं यत्र तद् तदा दृष्टान्तोऽलङ्कारो भवति । दृष्टोऽन्तो निश्चयः यस्मिन् स दृष्टान्तः । उपमानोपमेयनिष्ठ - वाक्यधर्मयोःबिम्बप्रतिबिम्बभाव यत्र तत्र दृष्टान्तः ।

वस्तुतो भिन्नयोरपि उपमानोपमेययोः परस्परसादृश्या-द्भिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभावः । "दृष्टा मया-ऽर्हत्प्रतिमा, तन्मृष्टा दैवदुष्कृतिः ।" **यथा–**

"**अविदितगुणाऽपि सत्कविभणितिः ,**
**कर्णेषु वमति मधुधारां ।**
**अनधिगतपरिमलाऽपि हि ,**
**हरति दृशं मालतीमाला ।। १ ।।**"

**१३- निदर्शनाऽलङ्कारः— "यत्र सदृशयोः वाक्यार्थयोः ऐक्यारोपस्तत्र–निदर्शनाख्योऽलङ्कारः ।"**

**'वाक्यार्थयोः बिम्बबिम्बं बोधयेत् सा निदर्शना ।'**
**'निश्चित्यदर्शनं सादृश्याविष्करणं निदर्शना ।'**

'अनुपपद्यमानो वाक्यार्थयोः सम्बन्धो यत्रौपम्यबोधकः सन् पर्यवस्यति तत्र निदर्शना ।' साधारणधर्मानुपन्यासाद् वाक्यार्थयोः सापेक्षत्वाच्च न दृष्टान्तेऽन्तर्भावः ।

**उदाहरणम्--**

**"या दातुः सौम्यता सेयं सुधांशोरकलङ्कता ।"**

[श्री कुवलयानन्दे प्रोक्तमिदम्]

या दातुर्वदान्यस्य सौम्यता सुधांशोः चन्द्रस्याकलङ्कता, कलङ्कशून्यता । अत्र दातृपुरुषसौम्यत्वस्योपमेयवाक्यार्थस्य चन्द्रस्याऽकलङ्कत्वस्योपमानवाक्यस्य च यत् तत् शब्दाभ्यां एक्यारोपात् निदर्शना अलङ्कारः । इयं निदर्शना सदर्था असदर्था इति द्विधा ।

**अन्यच्च–**

**"यथा जिनेन्द्रे प्रतिभाति शोभा,**
**तथा समृद्धिः परिपूजकानाम् ।"**

अत्र हि यथा तथा शब्दाभ्यां ऐक्यारोपात् निदर्शना अलङ्कारः। **यथा–**

**अरण्यरुदितं कृतं शवशरीरमुद्वर्तितं,**
**स्थलेऽब्जमवरोपितं सुचिरमूषरे वर्षितम्।**
**श्वपुच्छमवनामितं बधिरकर्णजापः कृतो,**
**धृतोऽन्धमुखदर्पणो यदबुधो जनः सेवितः ॥१॥**

अत्रापि वै निदर्शनाख्योऽलङ्कारो वर्त्तते।

**१४– व्यतिरेकालङ्कारः– "उपमानादुपमेयस्याधिक्यं न्यूनता, वा यत्र वर्ण्यते तत्र व्यतिरेकाऽलङ्कारः।**

वैशेष्यमुपमेयस्योपमानान्न्यूनताथ च। चेद् उपमानोपमेययोः प्रकृताऽप्रकृतयोः वैलक्षण्यं स्यात् तदा व्यतिरेकः अलङ्कारो भवति। व्यतिरेकशब्दो भावघञन्तः।

उपमानापेक्षया उपमेयस्य आधिक्ये व्यतिरेकाख्योऽलङ्कारो भवति। व्युत्पत्त्या व्यतिरिच्यते। उपमानवैलक्षण्येनोपलभ्यते। उपमेयमनेन इति व्यतिरेक पद व्युत्पत्तिरवधेया।

**"अचलेव श्रमणास्तुङ्गाः, किन्तु मनसि कोमलाः।"**

यथा श्रमणा अचलेव शैला इव तुङ्गाः उन्नताः, किन्तु मनसि चेतसि कोमला श्रमणाः उत्कर्षप्राप्ताः ऊर्ध्वं गताः किन्तु प्रकृत्या कोमलाः सुकुमाराः सन्ति।

अत्र शैल-श्रमणयोः औन्नत्य - साम्येऽपि सज्जनानां कोमलत्वेन आधिक्यं प्रतिपादितम् । अतः व्यतिरेकालङ्कारः ।

**१५– विनोक्त्यलङ्कारः– "यत्र येन विना वर्णनीय-वस्तुनि न्यूनता, आधिक्यं वा स्यात्, तत्र-विनोक्त्यलङ्कारः ।"**

**यथा–**

**"विद्या हृद्याऽपि सावद्या, विना विनयसम्पदम् ।**
**विना खलैर्विभात्येषा, राजेन्द्र ! भवतः सभा ।।**

अत्र विनोक्त्यलङ्कारो वर्त्तते ।

**१६– "स्वभावतः एकार्थके वाक्ये अनेकार्थता श्लेषा-लङ्कारः ।"**

'सकृदुच्चरितः शब्दः सकृदर्थं गमयति' इति नियमेन काव्ये स्वरभेदादानात् यावन्तोऽर्थास्तावन्त एव शब्दा एक प्रयत्नेनोच्चार्यन्त इति नये युगपन्ना शब्दोच्चारणे-ऽपि तेषां भेदोपलम्भो न भवति । तत्रापि प्रकरणादि-नियमाभावादनेकार्थानां अभिधयैव बोधः । प्रकरणादि-नियमसत्वे तु एकस्याभिधया परस्य व्यञ्जनयेति मतमा-श्रित्येदं लक्षणम् । एवं चैकप्रयत्नोच्चार्यत्वेन लुप्तभेदानां वर्णादीनां मेलकः श्लेषः ।

तद् विशिष्टैः पदैः अनेकार्थानां अभिधया बोधने सति श्लेषो भवति। वर्णौ च प्रत्ययौ च लिङ्गं चेतिविग्रहः। स **श्लेषालङ्कारः**।

स्वभावतः एकार्थके वाक्ये अनेकार्थता श्लेषः। बह्वर्थ-संश्रयश्लेषः वर्णप्रत्ययलिङ्गेषु।

**"सर्वदा ऋषभः पायात् यो हि गां स्ववशीकरोत्।"**

अत्र सदा श्रीऋषभजिनेश्वरः पायात् यो हि निश्चयेन गां इन्द्रियं वाणीं वा स्ववशे अकरोत् स्वाधीनं कृतवान्। अन्यच्च-द्विविधस्याप्यर्थस्याऽत्र प्रतीतिः अभिधाख्यया वृत्यैव भवति। ऋषभः बलीवर्दः पायात् यो गां धेनुं स्ववशीकरोत्।

**यथा–**

**"प्रवर्तयन् क्रियाः साध्वीर्मालिन्यं हरितां हरन्।**
**महसा भूयसा दीप्तौ विराजति विभाकरः॥१॥"**

अत्र श्लेषालङ्कारः प्रवर्त्तते।

**१७– अप्रस्तुतप्रशंसालङ्कारः – "यत्र अप्रस्तुतवर्णनेन प्रस्तुतं ज्ञायते, तत्र अप्रस्तुतप्रशंसाऽलङ्कारः।"**

**यथा–**

**"पादाहतं यदुत्थाय, मूर्धानमधिरोहति ।**
**स्वस्था देवापमानेऽपि, देहिनस्तद् वरं रजः ।।"**

अत्र अप्रस्तुतप्रशंसाऽलङ्कारो वर्त्तते ।

**१८– व्याजस्तुतिरलङ्कारः – "यत्र निन्दा-स्तुतिभ्यां स्तुति-निन्दे गम्येते तत्र-व्याजस्तुतिरलङ्कारः ।"**

**यथा–**

**"सर्वदा सर्वदोऽसीति, मिथ्या त्वं स्तूयसे बुधैः ।**
**नारयो लेभिरे पृष्ठं, न वक्षः परयोषितः ।।"**

अत्र निन्दया स्तुतिः, तस्माद् व्याजस्तुतिरलंकारः प्रवर्त्तते ।

**यथाऽथवा–**

**"किं वृत्तान्तैः परगृहगतैः किन्तु नाहं समर्थ-**
**स्तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः ।**
**गेहे गेहे विपणिषु तथा चत्वरे पानगोष्ठ्या-**
**मुन्मत्तेव भ्रमति भवतो वल्लभा देव ! कीर्त्तिः ।।"**

अत्रापि वै निन्दया स्तुतिः, तस्माद् व्याजस्तुतिरलङ्कारो वर्त्तते ।

**स्तुत्या निन्दा यथा–**

**"कृपणेन समो दाता, न भूतो न भविष्यति ।**
**अस्पृशन्नेव वित्तानि, यः परेभ्यः प्रयच्छति ॥"**

अत्र स्तुतिद्वारा निन्दा, तस्माद् व्याजस्तुतिरलङ्कारः प्रवर्त्तते ।

**१९– अर्थान्तरन्यासालङ्कारः– "यत्र सामान्यं विशेषेण विशेषश्च सामान्येन समर्थ्यते– तत्र अर्थान्तरन्यासालङ्कारः ।"**

**"विशेषेण हि सामान्यं, सामान्येन विशेषकम् ।**
**समर्थ्यतेऽन्योऽन्यं वा-ऽर्थान्तरन्यास मन्यते ॥ १ ॥"**

अन्योऽन्योऽर्थोऽर्थान्तरं तस्य न्यासः न्यसनम्, **अर्थान्तर-न्यासः** मुख्यार्थसम्बन्धमर्थान्तरं यत्र स्यात् तत्र अर्थान्तर-न्यासः । सामान्यं विशेषो वा सामान्येन विशेषेण वा समर्थ्यते यत्र तत्र अर्थान्तरन्यासः अलङ्कारः ।

**अन्यच्च**–समर्थ-समर्थकयोः सामान्यविशेषसम्बन्धे-ऽर्थान्तरन्यासः तदितरसम्बन्धे च काव्यलिङ्गमिति ।

**केचित्तु–**"समर्थनाद्यक्षसमर्थने काव्यलिङ्गम् तन्निर-पेक्षसमर्थनेऽर्थान्तरन्यासः ।" यत्र सामान्यविशेषरूपा-र्थान्तरेण पूर्वार्थसमर्थनम्, तत्र अर्थान्तरन्यासोऽलङ्कारः ।

व्यापकधर्मावच्छिन्नतया समर्थनं सामान्यम्, विशेषेण व्याप्यधर्मावच्छिन्नगोचरेण साधर्म्येण साधर्म्यप्रकारकज्ञानेन वैधर्म्यज्ञानेन वा यदि समर्थ्यते उत्पाद्यते तदा अर्थान्तर-न्यासः ।

**उदाहरणं यथा–**

**"विजेतव्या लङ्का चरणतरणीयो जलनिधि-**
**विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।**
**तथाप्येको रामः सकलमवधीद्राक्षसकुलं,**
**क्रियासिद्धिः सत्वे भवति महतां नोपकरणे ।"**

अत्र सामान्यं विशेषेण समर्थितम् ।

**सामान्येन विशेषसमर्थनं यथा–**

**"गुणवद् वस्तुसंसर्गाद्, याति नीचोऽपि गौरवम् ।**
**पुष्पमालानुसङ्गेन, सूत्रं शिरसि धार्यते ।।"**

**अन्यच्च–**

**"निर्ग्रन्थाः श्रमणाः मुक्ताः दुष्कृतं किं महात्मनाम् ।"**

श्रीजिनधर्मे निमग्नाः निर्ग्रन्थाः श्रमणाः साधवः मुक्ताः मोक्षं प्राप्ताः, यतो महात्मनां महापुरुषाणां किं दुष्करं दुर्लभं भवति, अपि तु किमपि दुष्करं दुर्लभं नेत्यर्थः ।

अत्र सामान्यविशेषभावसम्बन्धमर्थान्तरमभिहितम्, अतः अर्थान्तरन्यासोऽलङ्कारः। महात्मसम्बन्धि-समस्तकार्यसुकरता प्रतिपादनेन सामान्येन निर्ग्रन्थकृतक भवाम्बुधिस्तरणं विशेषार्थस्य समर्थनात् अर्थान्तरन्यासस्य प्रतिपादनम्।

२०–**विभावनालङ्कारः**– **"यत्र हेतुं विना कार्योत्पत्तिः वर्ण्यते तत्र विभावनालङ्कारः।"** विनाऽपि कारणे कार्यं यत्र स्यात् तत् विभावना। चेत् कार्यं विनाऽपि कारणं स्यात्। यदि कारणं विना कार्यजन्यफलोत्पत्तिः तदा विभावनालङ्कारो भवति। सति कारणे निमित्ते कार्यं भवतीति नियमः। अत्र तु तद् वैपरीत्यम्। विभाव्यते हेतुरस्यामिति विभावना बाहुलकादधिकरणे युच् प्रत्ययः।

**उदाहरणं यथा–**

**"चक्रिनिर्जितशत्रूणा–मुत्पदेऽरात्रिकं तमः।"**

अत्र अन्धकारोत्पत्ती रात्रावेव तथाऽपि तस्योत्पत्ती रजनीं विना वर्णिता–इति विभावना।

**अन्यच्चाऽपि–**

**"गतधना अपि हि त्वदनुग्रहात्,**
**कलितकोमलवाक्य सुधोर्मयः।**
**चकितबालकुरङ्गविलोचना,**
**जनमनांसि हरन्ति तरां नराः॥ १॥**

गतधना अपि यथा धनहीना अपि यत् निर्धनस्य कुत्राऽपि नैव सन्मानम् ।

**"माता निन्दति, नाभिनन्दति पिता, भ्राता न संभाषते,**
**भृत्यः कुप्यति, नाऽनुगच्छति सुतः, कान्ता च नाऽऽलिङ्गते ।**
**अर्थप्रार्थनशङ्कया न कुरुतेऽप्यालापमात्रं सुहृत्,**
**तस्मात् द्रव्यमुपार्जयाशु सुमते ! द्रव्येण सर्वे वशाः ॥"**

एतादृशों दशायां अनुभावमाना अपि मानवाः त्वदनुग्रहात् कलितकोमलवाक्यसुधोर्मयः भवन्ति । अर्थात् निर्द्रव्या अपि तवानुग्रहात् सर्वान् अपि मोहयन्ति । अतः कारणाभात्रेऽपि कार्योत्पत्तिर्वर्णिता इति । अतोऽत्र विभावनाऽलङ्कारः ।

२१– **विशेषोक्तिः– "यत्र कारणसत्त्वेऽपि कार्याभावस्तत्र विशेषोक्तिरलङ्कारः ।"**

कारणविद्यमाने सति कार्यस्याभावो यत्र वर्त्तते तत्र विशेषोक्तिः अलङ्कारो भवति । **उदाहरणं यथा–**

**"धनिनोऽपि निरुन्मादा,**
**युवानोऽपि न चञ्चलाः ।**
**प्रभवोऽप्यप्रमत्तास्ते,**
**महामहिमशालिनः ॥"**

अत्र विशेषोक्तिः अलङ्कारः वर्त्तते ।

**२२– विरोधाभासः–"यत्र आपाततः विरोधं प्रतिभासते तत्र–विरोधाभासोऽलङ्कारः ।"** श्लेषादिजन्यो विरोधश्चेत्, विरोधाभास भूयते । चेद् यदि श्लेषादिना भवति इति श्लेषादिजन्यो यदि विरोधः परस्परं अनुपत्तिस्तदा विरोधाभासः भवति । श्लेषहेतुकविरोधे विरोधाभासते इति भावः । आ ईषद् भासत इत्याभासः । विरोधश्चासा वाभासश्चेति विरोधाभासः । प्राचीनग्रन्थेषु विरोधो विरोधाभासश्चाभिन्न एव । वास्तविकविरोध-परिहार-मूलक - श्लेषादिजन्य - विरोधज्ञानत्वं विरोधाभासत्वम् । **उदाहरणं यथा–**

**"विश्वेश्वरोऽपि जनपालक ! दुर्गतत्वं ।**
**किं वाक्षरप्रकृतिरप्यलिपीस्त्वमीश ! ।।**
**अज्ञानवत्यपि सदैव कथंचिदेव ।**
**ज्ञानं त्वयि स्फुरति विश्वविकाशहेतोः ।। १ ।।**

अत्र विरोधाभासः अलङ्कारः प्रवर्त्तते ।

**२३– विषमालङ्कारः– "यत्र असम्भावितस्यार्थस्य सम्बन्धः क्रियते स–विषमालङ्कारः ।" उदाहरणं यथा–**

**"क्व चायं भूभागः क्व च गगनमेतद्व्यवहितं ।**
**तथाप्यम्भोराशिर्विकसति सितांशोः समुदये ।।**
**वृथा प्रत्यासत्तिः किमु किमपि मृष्यं तदपरं ।**
**यदत्यन्तं भावान् घटयति विदूरानपि मिथः ।। १ ।।"**

अत्र विषमालङ्कारो वर्त्तते ।

२४– समालङ्कारः– "यत्र योग्यकर्मणा योग्यस्य वस्तुनः प्रशंसा स्यात् तत्र समालङ्कारः।" उदाहरणं यथा–

"नमोऽस्तु वर्द्धमानाय, स्पर्द्धमानाय कर्मणा ।
तज्जयावाप्तमोक्षाय, परोक्षाय कुतीर्थिनाम् ।। १ ।।

येषां विकचारविन्दराज्या,
ज्यायः क्रमक्रमलावलिं दधत्या ।
सदृशैरिति संगतं प्रशस्यं,
कथितं सन्तु शिवाय ते जिनेन्द्राः ।। २ ।।

अत्र समालङ्कारः प्रवर्त्तते ।

२५– विचित्रालङ्कृतिः–"इष्टविरुद्धस्य करणं यदि इष्टफलाय जायते तदा विचित्रालङ्कृतिः।" उदाहरणं यथा–

"प्रणमत्युन्नतिहेतो-
जीवितहेतोः विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः,
को मूढः सेवकादन्यः ।। १ ।।"

अत्र विचित्रालङ्कारो वर्त्तते ।

२६– कारणमाला– "परं परं प्रति यदि पूर्वपूर्वस्य कारणता तदा कारणमालाऽलङ्कारः।" उदाहरणं यथा–

"श्रुतं कृतधियां सङ्गाज्जायते विनयः श्रुतात् ।
लोकानुरागो विनयान्न किं लोकानुरागतः ॥ १ ॥"

अत्र कारणमालाऽलङ्कारः प्रवर्त्तते ।

२७– मालादीपकम्– "उत्तरोत्तरं एकधर्मेण अनेकधर्मिणां सम्बन्धः मालादीपकमलङ्कारः ।" उदाहरणं यथा–

"सङ्ग्रामाङ्गणमागतेन भवता चापे समारोपिते ।
देवाकर्णय येन येन सहसा यद्यत्समासादितम् ॥
कोदण्डेन शराः शरैररिशिरस्तेनाऽपि भूमण्डलं ।
तेन त्वं भवता च कीर्त्तिरतुला कीर्त्या च लोकत्रयम् ॥ १॥"

अत्र मालादीपकमलङ्कारो वर्त्तते ।

२८– सारालङ्कारः–"उत्तरोत्तरमुत्कर्षो वस्तुनः सारालङ्कारः ।" उदाहरणं यथा–

"काव्येषु नाटकं रम्यं, नाटकेषु शकुन्तलम् ।
तत्राऽपि चतुर्थोऽङ्कः, तत्र श्लोकचतुष्टयम् ॥ १ ॥"

अस्मिन् श्लोके सारालङ्कारो वर्त्तते ।

२९– परिसंख्याऽलङ्कारः–"प्रश्नादप्रश्नाद्वा तादृशस्यान्यस्य वस्तुनो निरासो भवेत् तदा परिसंख्याऽलङ्कारः ।"

यत्र प्रश्नाद् वा अप्रश्नात् तादृशस्य अन्यस्य पदार्थस्य निरासो भवेत् तत्र परिसंख्याऽलङ्कारो भवति। **उदाहरणं यथा-**

**"किं भूषणं सुदृढमत्र यशो न रत्नं,**
**किं कार्यमार्यचरितं सुकृतं न दोषः।**
**किं चक्षुरप्रतिहतं धिषणा न नेत्रं,**
**जानाति कस्त्वदपरः सदसद्विवेकम्।**

अत्र परिसंख्याऽलङ्कारः प्रवर्त्तते।

**३०- आक्षेपालङ्कारः-"यत्रोपमानस्य तिरस्कारः स-आक्षेपालङ्कारः।" उदाहरणं यथा-**

**"अहमेव गुरुः सुदारुणामिति,**
**हालाहल तात! मा स्म दृप्यः।**
**ननु सन्ति भवादृशानि भूयो,**
**भुवनेऽस्मिन् वचनानि दुर्जनानाम्॥ १॥**

अत्र आक्षेपालङ्कारो वर्त्तते।

**३१- स्वभावोक्तिरलङ्कारः- "यत्र तत् तत् स्वभाव-मेव वर्णनं तत्र-स्वभावोक्तिरलङ्कारः।" उदाहरणं यथा-**

**"करारविन्देन पदारविन्दं,**
**मुखारविन्दे विनिवेशयन्तम्।**
**वटस्य पत्रस्य पुटे शयानं,**
**बालं मुकुन्दं मनसा स्मरामि॥**

अत्र स्वभावोक्तिरलंकारः प्रवर्त्तते।

**३२– काव्यलिङ्गालङ्कार :–** वाक्यपदार्थत्वे वाक्यस्य पदार्थस्य वा हेतुत्वे व्यङ्ग्ये काव्यलिङ्गालङ्कारो भवति । यत्र नूतनस्य नवस्यार्थस्य बोधको वाचः पदवाक्यरूपस्य अर्थः स्यात् तत्र **'काव्यलिङ्गाऽलङ्कारः' स्यात्** ।

समर्थनसापेक्षस्यार्थस्य यत्र पदद्वारा वाक्यद्वारा वा समर्थनं भवति तत्र **काव्यलिङ्गाऽलङ्कारः** । एवं च पदार्थ-हेतुकतया वाक्यार्थहेतुकतया च काव्यलिङ्गस्य द्वौ भेदौ भवतः । अन्यच्च काव्याभिमतं लिङ्गं काव्यलिङ्गम्, तर्क-वैलक्षण्यार्थ-काव्यग्रहणम् न हि यत्र व्याप्तिपक्षधर्मतः उपसंहारादयः क्रियन्ते, तत्र काव्यलिङ्गाऽलङ्कारो भवति ।

**लक्षणम्–**

**"काव्यलिङ्गं भवेत् यत्र, हेतोः वाक्यपदार्थता ।**
**विजितो कामसन्दोहः, मच्चित्तोऽस्ति जिनोत्तमः ।। १ ।।**

कामस्य सन्दोहः वेगः विजितः कारणं यत् मच्चित्तो मन्मनसि जिनोत्तमः जिनेश्वरः अस्ति, अतः कामस्य प्रभावो निष्फलः । श्रीजिनेश्वरस्य प्रभोः हृदि वर्त्तमानत्व वर्ण-नेन तस्य समर्थनात् काव्यलिङ्गालङ्कारो वाक्यार्थहेतुकः ।

**३३– दीपकम्–"वर्णनीयावर्णनीयानां तुल्यत्वे दीपकं स्मृतम् ।"**

यत्र वर्णनीयाः प्रस्तुताः अवर्णनीया अप्रस्तुताः प्रस्तुताऽप्रस्तुतानां प्रकृताऽप्रकृतानां गुणेन क्रियया च साम्ये तुल्यत्वे वा दीपकमलङ्कारः । प्रकृतधर्मः प्रसङ्गादप्रकृतमपि दीपयति प्रकाशयतीति दीपकम् ।

अथवा दीप इव दीपकम् "संज्ञायां कन्" इतीवार्थे कन् प्रत्ययः । यथा प्रासादार्थमारोपितो दीपकः वीथ्यामुपकरोति, दीपसाम्याद् दीपकाख्योऽलङ्कारोऽपि प्रकृतमपि उपकरोति । प्रस्तुताप्रस्तुतनिष्ठ - साधारणधर्म - कथनं दीपकत्वम् । **उदाहरणं यथा–**

**"सुधयेन्दु यथा भाति तथैव जिनशासने ।"**

अत्र दीपकाख्योऽलङ्कारः वर्त्तते ।

अत्र येऽतिप्रसिद्धाः अलङ्काराः साहित्यग्रन्थे कथितास्तेऽत्र प्रकाशिताः । विशेषार्थिना विशिष्टग्रन्थाः श्रीकाव्यानुशासन-काव्यप्रकाश-साहित्यदर्पणादयो विलोकनीयाः ।

**।। इत्यर्थालङ्काराः ।।**

## ।। दृश्य-श्रव्यकाव्यनिरूपणम् ।।

अत्र संक्षिप्तं दृश्य-श्रव्य काव्यनिरूपणं निरूप्यते-

**"दृश्य-श्रव्यत्वभेदाभ्यां, द्विविधं काव्यलक्षणम् ।**
**अभिनेयं यत् तद् दृश्यं, रूपारोपाद्धि रूपकम् ।। १ ।।**

अभिनेययोग्यं दृश्यं, नाट्याद्यभिनीयमानं नायकादि-चरितं दृश्यमुच्यते ।

यथा मुखादौ पद्यादेरारोपो रूपकं मतम्, तथैव नायकारोपो नटे रूपकमुच्यते । यथा मन्दारमन्दे भङ्ग्यन्तरेण प्रतिपादितम्–

उत्पादयन् सहृदये रसज्ञानं निरन्तरम्, अनुकर्त्ता स्थितो योऽर्थः अभिनयः सोभिधीयते ।

नाट्यशास्त्रेऽपि भरतस्य मतम्–विभावयति यस्माच्च नानार्थान् हि प्रयोगतः शाखाङ्गोपाङ्ग-संयुक्तः तस्माद् अभिनयः स्मृतः ।

**नाट्यशास्त्रे तु–**

**"विविधस्याङ्गिको ज्ञेयः, शरीरो मुखजस्तथा ।**
**तथा चेष्टा कृतश्चैव, शाखाङ्गोपाङ्गसंयुतः ॥**

इत्यनेनाङ्गिकाभिनयस्य वै विध्यमुदीरितम् ।

**"देहिको वाचिकश्चैव, भूषकः सात्त्विकस्तथा ।**
**तुर्याभिनयविधा ज्ञेया, भवेन्नाटक - रूपके ॥**

अस्य रूपकस्य दशभेदाः नाट्यशास्त्रेषु दर्शिता एव । तद्यथा—

"नाटकं प्रकरणं भाणं, व्यायोगं समवकारकम् ।
डिम्भेहामृगाङ्कविथ्यः, प्रहसनेतिदशस्मृतः ॥"

प्रकरणस्य लक्षणम्–

"लौकिकं वा रचितं वृत्तं, भवेत् प्रकरणे मतम् ।
विना विशेषं सर्वेषां, वृत्तं नाटकवत् रचेत् ॥"

भाणस्य लक्षणम्–

"एकाङ्कस्य भवेत् भाणः, धूर्तावस्थान्तरात्मकः ।"

व्यायोगस्य लक्षणम्–

"इतिवृत्तात्मकख्यातः, अल्पस्त्रीपात्रसंयुतः ।
विना विशेषं नाट्यस्य, व्यायोगोऽतिनराश्रितः ॥"

समवकारस्य लक्षणम्–

"सुराऽसुराश्रयं वृत्त - मङ्कस्त्रय - समन्वितम् ।
संधयस्तुर्यमाख्यातं, समवकारस्य लक्षणम् ॥"

डिमस्य लक्षणम्–

"इन्द्रजालसभायुक्तः, युद्धक्रोधादिचेष्टितः ।
मुख्य रौद्ररसो यत्र, डिमः ख्यातेति वृत्तकः ॥"

ईहामृगस्य लक्षणम्–

"चतुरङ्क सभायुक्तः, इतिवृत्तश्च मिश्र वा ।
संधयोऽपि त्रयस्तत्र, ईहामृगः प्रकीर्तितः ॥"

अङ्कस्य लक्षणम्–

उत्सृष्टिकाङ्के प्रख्यातं वृत्तं बुद्धया प्रपञ्चयेत् ।।
रसस्तु करुणः स्थायी नेतारः प्राकृता नराः ।
भाणवत्सन्धिवृत्त्यङ्गै-र्युक्तिः स्त्रीपरिदेवितैः ।।
वाचा युद्धं विधातव्यं तथा जयपराजयौ ।

(दशरूपकम्)

वीथिलक्षणम्–

"उत्तमाधममध्येषु, नायकैकोऽत्र वर्त्तते ।
आकाशभाषितैः युक्ता, एकाङ्का वीथिरुच्यते ।।"

प्रहसनस्य लक्षणम्–

"हास्यरसप्रधानत्वं, प्रहसने नाट्यभेदके ।"

साहित्यदर्पणे तु प्रहसनस्य लक्षणमिदम्–

"भाणवत् सन्धिसन्ध्यङ्ग-
लास्याङ्गाङ्कैः विनिर्मितम् ।
भवेत् प्रहसनं वृत्तं,
निन्द्यानां कविकल्पितम् ।। १ ।।"

## * श्रव्यकाव्यम् *

"श्रोतव्यमेव श्रव्यं हि, गद्य-पद्यात्मकं द्विधा ।
पद्यं छन्दमयं प्रोक्तं, तेन मुक्तं हि मुक्तकम् ।। १ ।।"

## * महाकाव्यम् *

**"धीरोदात्तगुणैर्युक्तः, नायको सुर वा नृपः ।**
**सर्गबद्धो महाकाव्यं, एकोऽङ्गीरस इष्यते ॥**
**इतिवृत्तात्मकं वृत्तं, अन्यद् वा साधुराश्रयम् ।**
**धर्मार्थकाममोक्षेषु, एकं तत्र फलं भवेत् ॥"**

**उदाहरणं यथा–** श्रीशान्तिनाथमहाकाव्यम्, माघ-काव्यम्, रघुवंशकाव्यं चेत्यादयः ।

## * खण्डकाव्यम् *

**"यत् काव्यांशानुसारी तत्, खण्डकाव्यं निगद्यते ।"**

काव्यस्य एकदेशानुसारी यत् वा एकांशानुसारी भवेत् तत् खण्डकाव्यं भवति ।

**उदाहरणं यथा–**शीलदूतं, नेमिदूतं, मेघदूतं, पवनदूतं चेत्यादयः ।

## * कोशः *

**"व्रज्या (वर्णमाला) क्रमेण शब्दानां श्लोकैः कोशस्य लेखनम् ।"**

**उदाहरणं यथा मम–**सुशीलनाममालायां वर्णक्रमेण एकाक्षरी कोशः ।

## * गद्यलक्षणम् *

समासरहितमाद्यं, पद्यभागयुतं परम् ।
अन्यदीर्घसमासोक्तं, तुर्यं चाऽल्पसमासकम् ।। १ ।।

गद्यकाव्यस्य चत्वारो भेदाः सन्ति । मुक्तकं, वृत्तगन्धिकं, उत्कलिकं, चूर्णकं चेति । तेषु प्रथमं समासरहितं **मुक्तकं** गद्यमस्ति । पद्यांशयुक्तं तथा गद्यमपि युक्तं च द्वितीयं **वृत्तगन्धिकं** गद्यमस्ति । तृतीयं दीर्घसमाससहितं **उत्कलिकं** गद्यमस्ति । यथा कादम्बरी-तिलकमञ्जरि-ग्रन्थादौ उत्कलिकं गद्यमस्ति । चतुर्थं च अल्पसमास-समेतं **चूर्णकं** गद्यम् अस्ति ।

## * आख्यायिका *

"कवेर्वंशकीर्त्तिगानं कथावृद्धिकथानकम् ।
वृत्तमन्यकवीनाञ्च, भवेद् आख्यायिका क्रमे ।।"

## * चम्पूलक्षणम् *

"गद्यपद्यात्मकं चम्पूः, काव्य-नाम्नाभिधीयते ।"

उदाहरणं यथा—पञ्चतन्त्रादयः ।

श्रव्यदृश्यविभागेन काव्यं यद् युगलात्मकम् ।
सुशीलसूरिणा रत्नमञ्जूषायां सुवर्णितम् ।।

।। इति दृश्य-श्रव्यकाव्य-निरूपणम् ।।

## * चतुर्थपरिच्छेदस्य सारांशः *

कवितासरिता-सृष्टौ, रसे प्राधान्यमारितम् ।
रसापकर्षका दोषाः, उत्कर्षाय गुणा मताः ॥ १ ॥

सरसता कीदृशैः शब्दै-रर्थैर्भावैश्च सम्मता ।
रम्यता लौकिकाह्लाद-जनिका भवति सर्वदा ॥ २ ॥

स्मारं स्मारञ्च साहित्यं, लालित्यैर्लसितं वरम् ।
लक्षणे दक्षवृत्तीनां, लक्षणं लक्ष्यलक्षितम् ॥ ३ ॥

साहित्यलक्षणग्रन्थे, काव्योत्कर्षकरा गुणाः ।
ओजः प्रसादमाधुर्य - भेदैस्त्रेधा च सम्मताः ॥ ४ ॥

माधुर्यं तत्र शृङ्गारे, करुणे शान्ते सुवर्णितम् ।
वर्गान्त्यवर्णसंयुक्तं, टठडढैश्च वर्जितम् ॥ ५ ॥

ह्रस्वस्वरसुसंयुक्तौ, रणावल्प समासकाः ।
ललिता रचना रम्या, माधुर्ये सुसमाहिता ॥ ६ ॥

चित्तोत्साहकरं प्रोक्तं, ओजः कर्मसु कौशलम् ।
वीर-बीभत्स-रौद्रे-ष्वोजोऽतिशयवन् मतम् ॥ ७ ॥

चित्ते प्रसन्नता येन, संयाति सहसा द्रुतम् ।
तं प्रसादं विजानीयात्, रसोत्कर्षकरं परम् ॥ ८ ॥

रसापकर्षका दोषाः, त्रिधा शास्त्रेषु वर्णिताः ।
शब्दार्थरसभेदै स्तु, मयाऽप्यास्मिन् नियोजिताः ।। ९ ।।

निरर्थका लक्षणहीना-ऽश्लीलकर्णकटूक्तयः ।
नेयार्था-ग्राम्य-संदिग्धा-ऽवाचकाः शब्ददूषणम् ।। १० ।।

अपुष्टाः कष्टबोध्याश्च, ग्राम्याः पौनरुक्तयः ।
निर्हेतुकाश्च सम्प्रोक्ताः, साहित्ये दोषहेतवः ।। ११ ।।

काव्ये रसस्य वैचित्र्यं, तत्र दोषोऽक्षमो मतः ।
यस्यार्थे काव्यसंसृष्टिः, दोषस्तत्र कथङ्करः ।। १२ ।।

रसानां स्थायिभावानां, स्वशब्दोक्तिश्च दूषणम् ।
कष्टेन यदि सम्प्राप्तिः, सोऽपि तद्विधमाश्रितम् ।।१३।।

वर्णनीयरसापेक्षो, विभावादि न चेद् भवेत् ।
तदा दोषो रसे चोक्तः, काव्यतत्त्वमनीषिभिः ।। १४ ।।

रसादेः पौनरुक्त्या च, समुद्दीपनमन्यथा ।
सोऽपि दोषत्वमायाति, काव्ये रसविघातनात् ।। १५ ।।

देशकालविरुद्धञ्च, रसविस्तारदर्शनम् ।
साहित्ये सरसे सोऽपि, दोषत्वेन च वर्णितः ।। १६ ।।

अकाण्डे रसविच्छेदः, प्रकृतीनां विपर्ययः ।
एतावपि रसे दोषौ, वर्णितौ धीश्वरैः परैः ॥ १७ ॥

शरीरिणोऽङ्गतुल्या स्याद् रीतिः काव्यशरीरके ।
सेयं सुप्तिङ्पदैर्युक्ता, रसोत्कर्षकरी मता ॥ १८ ॥

वैदर्भी चाथ गौडी च, पाञ्चाली लाटिका पुनः ।
काव्यशास्त्रे सुविख्याता, चतस्रोऽपि रसवर्द्धिका ॥ १९ ॥

माधुर्यधुर्य-संयुक्ता, ललितैर्वर्णैर्विराजिता ।
अल्पवृत्तिरवृत्ति-र्वा, वैदर्भी रीतिरुच्यते ॥ २० ॥

ओजो गुणगणैर्युक्ता, क्लिष्टवर्णसमाकुला ।
समास-सधना गौडी, रीतिरुक्ता सुधीश्वरैः ॥ २१ ॥

प्रसादगुण-संश्लिष्टा, सुकुमारा च माधुरी ।
पाञ्चाली रीतिराखिलैश्चर्चिता काव्यसंसदि ॥ २२ ॥

लघुसमासयुक्ता या, भूयिष्ठा ललिता वरा ।
लाटी च रीतिर्वैदर्भी, पाञ्चाल्योर्मध्यमा मता ॥ २३ ॥

काव्यशोभाकराः प्रोक्ताः, अलङ्कारा मनीषिभिः ।
शब्दार्थोभयभेदैश्च, पुनर्भेदत्वमागताः ॥ २४ ॥

चतुर्थेऽस्मिन् परिच्छेदे, गुण-दोषादिवर्णनम् ।
रीत्यलङ्कारसंयुक्तं, युक्तियुक्त्या च योजितम् ॥ २५ ॥

इति श्रीशासनसम्राट्-सूरिचक्रचक्रवर्त्ति-तपोगच्छाधिपति-भारतीयभव्यविभूति-महाप्रभावशालि-अखण्डब्रह्मतेजोमूर्त्ति-श्रीकदम्बगिरिप्रमुखानेकप्राचीनतीर्थोद्धारक - श्रीवलभीपुर-नरेशाद्यनेकनृपप्रतिबोधक-चिरन्तनयुगप्रधानकल्प-वचनसिद्ध-सर्वतन्त्रस्वतन्त्र-प्रातःस्मरणीय-परमोपकारि-परमपूज्याचार्य महाराजाधिराज **श्रीमद्विजयनेमिसूरीश्वराणां** दिव्यपट्टालंकार साहित्यसम्राट्-व्याकरणवाचस्पति-शास्त्रविशारद- कविरत्न-साधिकसप्तलक्षश्लोकप्रमाणनूतनसंस्कृतसाहित्यसर्जक-परम-शासनप्रभावक - बालब्रह्मचारि - परमपूज्याचार्यप्रवर **श्रीमद्-विजयलावण्यसूरीश्वराणां** प्रधानपट्टधर- धर्मप्रभावक-शास्त्रविशारद-कविदिवाकर- व्याकरणरत्न- स्याद्यन्तरत्ना-कराद्यनेकग्रन्थकारक-बालब्रह्मचारि-परमपूज्याचार्यवर्य **श्रीमद्-विजयदक्षसूरिवराणां** पट्टधर-जैनधर्मदिवाकर-शास्त्रविशारद-साहित्यरत्न - कविभूषण - बालब्रह्मचारि **श्रीमद्विजय सुशीलसूरि** सन्दृब्धायां साहित्यरत्नमञ्जूषायां चतुर्थः परि-च्छेदः ॥

## ।। अथ पञ्चमः परिच्छेदः ।।

अमृतमयी निरन्तर-निरर्गल-निर्मल-नीरप्रवाह इव परिपूताऽस्माकं भारतीयधरा । सर्वस्वरूपा संस्कृतसाहित्यविद्या तदीयज्ञानज्योतिर्विद्योतितान्तःकरणैः सुर-सरस्वती-समुपासकैस्सुविदितचरमेतद् यत् **काव्यस्य मूलतत्त्वानां पर्यालोचनेन काव्यमान्यताविभेदैः विभिन्नानां कविसम्प्रदायानां समुदयः समजनि**। एतेषां सर्वेषां साम्प्रदायिकविभेदानां कारणं काव्यस्य मूलतत्त्वमेव वरीवर्ति । अयं भारतदेशः प्रारम्भादेव आत्मवादी अस्ति ।

आत्मनः शोधः प्रतिष्ठा च निगमागमकालादेव सुष्ठुतया व्यवस्थिता अस्ति । आत्मा आनन्दस्वरूपोऽस्ति एतदेव सम्प्राप्य मनुष्य आनन्दमग्नो भवति । आत्मानन्द इव काव्यमपि आनन्ददायकमास्ते । अतएव काव्यशास्त्रिभिः काव्ये आनन्दस्वरूपात्मनः प्रतिष्ठां विधातुं सुचेष्टितम् । एनं महत्त्वपूर्णं विषयं पर्यालोच्य सूक्ष्मचिन्तनदृष्ट्या-रसः, रीतिः, ध्वनिः, अलंकारः, वक्रोक्तिः, औचित्यम् इति षट्-सम्प्रदायाः प्रकीर्तिताः । प्रत्येकोऽपि काव्यशास्त्रीयसम्प्र-

दायः स्वकीयं महत्त्वं प्रतिपादनाय प्रयत्नशीलः । **अलंकार-सर्वस्वस्य** समुद्रबन्धटीकायां पञ्चकाव्यसम्प्रदायानामुल्लेखः तावदेवं समुपलभ्यते–

"इह विशिष्टौ शब्दार्थौ काव्यम् । तयोश्च वैशिष्ट्यं धर्ममुखेन, व्यापारमुखेन, व्यंग्यमुखेन चेति त्रयः पक्षाः । आद्येऽप्यलंकारतो गुणतो वेति द्वैविध्यम् । द्वितीयेऽपि भणिति वैचित्र्येण भोगकृत्वेन वेति द्वैविध्यम् । इति पंचसु पक्षेष्वाद्यः उद्भटादिभिरङ्गीकृतः । द्वितीयो वामनेन तृतीयो वक्रोक्तिजीवितकारेण चतुर्थो भट्टनायकेन पञ्चम आनन्दवर्धनेन ।"

उद्धरणेऽस्मिन् क्षेमेन्द्रस्यौचित्यसिद्धान्तस्य समुल्लेखो न वर्तते तमपि स्वीकृत्य साम्प्रतं काव्यस्य मूलतत्त्वात्मान-मनुसृत्य षट् सम्प्रदायाः सन्ति । के च ते सम्प्रदाया इति जिज्ञायासां तेषां स्वरूपम् अनुक्रमेणेह प्रदर्श्यते–

(१) रससम्प्रदायः (२) अलंकारसम्प्रदायः
(३) रीतिसम्प्रदायः (४) वक्रोक्तिसम्प्रदायः
(५) ध्वनि-सम्प्रदायः (६) औचित्यसम्प्रदायः

सर्वेषामेतेषां सम्प्रदायानां सुगमव्याख्यानाभिलाषया प्रत्येकस्य विषयगाम्भीर्यं स्फोरयितुमस्माभिरेवं प्रयतितुं

शक्यते ।

**रस सम्प्रदायः**–रससिद्धान्तस्य प्रतिष्ठा नाट्याचार्य भरतस्य समये सञ्जाता । भरतस्य नाट्यशास्त्रमेव रस-सिद्धान्तस्य प्राचीनतमो ग्रन्थः । ग्रन्थेऽस्मिन् शताब्दिभिः प्रवर्तितकाव्यशास्त्रीयविवेचनस्य सारः समाहितोऽस्ति । विद्वज्जनैरिदमपि स्वीक्रियते यदयं ग्रन्थो रससिद्धान्तस्य प्रवर्तकग्रन्थो नास्ति अपितु विकासोद्योतकः । भरतात् पूर्वमपि सम्प्रदायस्यास्यानेके आचार्याः समभवन् । यथा–वासुकिः, सदाशिवः, अगस्त्यः, व्यासः, नन्दिकेश्वरः, वृद्ध-भरतादि ।

"**ह्यष्टौ रसाः प्रोक्ता द्रुहिणेन महात्मना**" कथनेनानेन द्रुहिणनामकाचार्यस्यापि समुल्लेखः समवाप्यते । राज-शेखरस्य काव्यमीमांसायां काव्यपुरुषस्य चर्चोपलभ्यते । तत्रायमुल्लेखोऽस्ति यत् काव्यपुरुषेण काव्यशास्त्रस्य विभिन्नाधिकरणानामुल्लेखनाय अष्टादशपट्टशिष्याः नियो-जिताः । एतेषु रसाचार्यो नन्दिकेश्वरः नाट्याचार्यरूपेण भरतस्य– '**रूपकं निरूपणीयं भरतः रसाधिकारं नन्दि-केश्वरः** ।' किन्तु नन्दिकेश्वरस्य सम्प्रति कापि कृति-र्नैवोपलभ्यते । यत्र तत्रोल्लेखे सत्यपि प्रामाणिकग्रन्था-नामभावे वयं कथयितुं शक्नुमो यत्–**नाट्यशास्त्रमेव साम्प्रतिको रससिद्धान्तविचारस्य आद्यग्रन्थः, रससिद्धान्त-**

**प्रवर्तकश्च भरत** इति । नाट्यशास्त्रस्य षष्ठे सप्तमे चाध्याये रसविकल्पकता, भावव्यञ्जकता च सुतरां स्फुटीभवति ।

**'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः ।'** इति रससिद्धान्तविषये भरतमुनेः सूत्रम् । साहित्ये रसानां महत्त्वं स्फुटतरं स्वयंसिद्धञ्चास्ति, यतो हि काव्यस्य मूलतत्त्वं रस एव । विभिन्नेष्वपि काव्यसम्प्रदायेषु रसस्य महत्ता जागर्ति ।

ध्वन्याचार्यैरपि वस्तुध्वनिः, अलङ्कारध्वनिः, रसध्वनिश्च स्वीकृताः किन्त्वत्र रसध्वनेः प्राधान्यं स्वीकृतम् । रसोक्तेः महत्त्वपूर्णं स्थानं मन्यमानेन भोजराजेनोक्तम्–

**वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयः ।**
**सर्वासु ग्राहिणीं तासु रसोक्ति प्रतिजानीते ॥**

आलंकारिकैः रससत्ता रसवदाद्यलंकाररूपेणैव स्वीकृता । **आचार्यभामहोऽलङ्कारवादी** सोऽत्र मनुते । यदुत्तमकाव्यायालंकारतत्त्वमनिवार्यम् । अस्य मते रसो गौणः, अलङ्कारेष्वेवान्तर्भूत इति-उक्तञ्च काव्यालङ्कारे–

**रसवद्दर्शितस्पष्ट शृंगारादि रसं यथा ।**

(काव्यालंकार ३/६)

अर्थात् 'रसवदलङ्कारस्तत्र भवति यत्र शृंगारादिरसाः स्पष्टरूपेण दर्शिता भवेयुः।' एवं सत्यप्यस्माभिः कथयितुं शक्यते यद् भामहो रसमहत्तां स्वीकरोतीति। यतो ह्ययं महाकाव्याय समस्तरसानां विधानमनिवार्यरूपेण स्वीकरोति—

**युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्।**

(काव्यालंकार १/१२१)

**आचार्यदण्डी** अलङ्कारवादी सन्नपि भामह इव रसेऽनुदारो न दृश्यते तथापि तस्य दृष्टिः भामहेन साम्यं भजति। **काव्यादर्शस्य** द्वितीये आदर्शे रसविवेचनं प्राप्यते तत्र दण्डी मधुरगुणानेव रसस्वरूपेणाङ्गीकरोति। तस्य मतमस्ति यत् 'रसवद्वाक्यमेव मधुरं भवति, अतएव रस एव माधुर्यम् न पृथक्-पृथक्। यया शब्दार्थजन्याह्लादकतया सहृदयगणाः मत्ताः भवेयुः, स एव रसः।' उक्तञ्च—

**मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितः।**
**येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः॥**

(काव्यादर्शः १/५१)

दण्डिनो मतानुसारेण प्रत्येकोऽप्यलङ्कारोऽर्थे रससेचनक्षमतां विभर्ति—

**"कामं सर्वोऽप्यलङ्कारो रसमर्थे निषिञ्चति"**

इत्थं काव्यसर्वस्वमलङ्कारं स्वीकुर्वताऽपि तेन तस्य चरमारिणतिः रसस्वरूपे स्वोक्रियत इति नास्ति क्षति, **आचार्यरुद्रटोऽपि** अलङ्कारवादी किन्तु अयमेव रसमहत्त्वं स्वीकुर्वन् प्रतिपादयति यत् 'तस्मात् कर्त्तव्यं यत्नेन महीयसारसैर्युक्तम्' काव्ये यत्नपूर्वकं रसप्रतिष्ठाया आग्रहमयं स्वीकरोत्येव **अग्निपुराणकाराऽपि** काव्ये चमत्कारस्य प्रधानतां स्वीकुर्वन्नपि रसमेव काव्यजीवनमिति स्फुटमङ्गीकरोति ।

**"वाग्वैदग्ध्य प्रधानेऽपि रस एवात्र जीवितम् ।"**

**आचार्यवामनः** रीति सम्प्रदायस्य प्रवर्तकोऽस्ति तथापि स गुणानां वर्णने रसमावश्यकतत्त्वमाभणन्तिं । कान्तिगुणान्तरेऽसौ रसस्य समावेशमपि चिकीर्षति '**दीप्तिरसत्वं कान्तिः ।**' वामनस्य मतानुसारेण रसो रीतेरङ्गमात्रम् । रसस्य दीप्तिः रीतेः शोभायां सहयोगाय प्रचक्ष्यते । इयमेव रसस्य सार्थकता अर्थात् रसोऽङ्गो रीतिरङ्गीति ।

एतद्विवेचनेन स्फुटतरमायाति यद्रीतेः अलङ्कारस्याचार्यैः रसस्यास्तित्वं स्वीक्रियते । ध्वनिसम्प्रदायोऽपि रसस्य प्राधान्यमङ्गीकरोति, सम्प्रदायेऽस्मिन् 'रसध्वनिः' इति कृत्वा सर्वश्रेष्ठा ध्वनिः स्वीक्रियते । काव्यस्यात्मा रस इत्यपि स्वीक्रियते—

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥**

अभिधावादी **भट्टनायकोऽपि** रसस्याक्षुण्णं महत्त्वं स्वीकुर्वन्ति । व्यञ्जनावादिन **आनन्दवर्धनाचार्याः, अभिनवगुप्तपादाश्च** रसस्य महत्त्वमङ्गीकुर्वन्ति **आचार्यमम्मट-विश्वनाथ-जगन्नाथानाम्, कलिकालसर्वज्ञाचार्यहेमचन्द्रसूरीश्वराणां** विषये तु किं कथयामः । एते तु रसतत्त्वस्य ध्वनितत्त्वस्य च प्रतिष्ठापकाः समभवन्, एतेषां मतानुसारेण **रसः काव्यस्य सर्वस्वमिति** ।

---

रससम्प्रदायस्य पृष्ठभूमिर्मनोवैज्ञानिकी वर्तते । रससिद्धान्ते मानवहृदयस्य मूलप्रवृत्तीनां विस्तरेण विवेचनं, सहायकमनोभावानां संसृष्टिरपि समुपलभ्यते । रससम्प्रदायस्य प्रमुखाः आचार्याः ग्रन्थाश्च एवं समुल्लसन्ति—

| | |
|---|---|
| आचार्यभरतः | नाट्यशास्त्रम् |
| आनन्दवर्धनाचार्यः | ध्वन्यालोकः |
| धनञ्जयः | दशरूपकम् |
| मम्मटः | काव्यप्रकाशः |
| विश्वनाथः | साहित्यदर्पणः |
| जगन्नाथः | रसगंगाधरः |

| | |
|---|---|
| अभिनवगुप्तः | अभिनवभारती |
| भोजः | शृंगारप्रकाशः |
| भानुदत्तः | रसमञ्जरी, रसतरंगिणी |
| आचार्यश्रीहेमचन्द्रः | काव्यानुशासनम् |
| रामचन्द्र-गुणचन्द्रः | नाट्यदर्पणम् |
| शारदातनयः | भावप्रकाशनम् |
| रूपगोस्वामी | हरिभक्तिरसामृतसिन्धुः |
| इत्यादयो रससम्प्रदायस्य | उज्ज्वलनीलमणिश्च, |
| प्रमुखाचार्याः | इत्यादयो ग्रन्थाः । |

## अलंकार-सम्प्रदायः

अलङ्कारसम्प्रदायसंदर्भे श्रीराजशेखराचार्येण कतिपयानामाचार्याणामुल्लेखः कृतः । तद् यथा—'आनुप्रासिकं प्रचेताः, औपम्योपकायनः, अतिशयं पराशरः, अर्थश्लेषमुतथ्यः, उभयालङ्कारिकं कुबेरः ।' इत्थञ्च - अनुप्रासोपमातिशयोक्त्यर्थश्लेषोभयालङ्कारादीनां विवेककर्तॄणां समुल्लेखस्तु प्राप्यते किन्तु एतेषु आचार्यचरणेषु केषामपि ग्रन्थः साम्प्रतं नोपलभ्यते ।

साम्प्रतमुपलभ्यमानासु आलङ्कारिककृतिषु कृतिकारेषु च भामहाचार्यकृतिः सर्वश्रेष्ठेति विदुषामाकूतम् । अयमेव

महानुभावोऽलङ्कार-सम्प्रदायस्य प्रवर्तकोऽप्यस्ति । अन्ये-ष्वाचार्येषु उद्भट-दण्डि - रुद्रट - प्रतिहारेन्दुराज - जयदेवाः प्रमुखाः सन्ति । जैनकाव्यशास्त्रिदृष्टया तत्र स्वनाम-धन्यानां विद्वन्मूर्धन्यानां कलिकालसर्वज्ञानां श्रीहेमचन्द्रा-चार्याणां नामापि महत्त्वपूर्णां पदवीमावहति ।

भामह-दण्डि-रुद्रटोद्भटादिभिराचार्यैरलङ्कारस्य व्या-पकमर्थं स्वीकृत्य काव्यस्यात्माऽलङ्कार, इति वचनम् कथ-यित्वा काव्यस्य सर्वस्वमलङ्कार इति स्वीकृतम् । एभिरा-चार्यैः अङ्गीभूतो रसः, भावः, रसाभासश्च क्रमशः रसवत् प्रेयस्वत्, ऊर्जस्वी, समाहितोऽलङ्कारः कथितः ।

एभिरालङ्कारिकैराचार्यैः गुणस्वरूपमप्यलङ्काररूपेण स्पष्टतस्तु नैव प्रोक्तस्तथापि दण्डिकथनानुसारेण प्रतीयते यत् – ते माधुर्यादि दसगुणान् साधारणालङ्कारान् विवक्षन्त इति ।

आलङ्कारिकाचार्या यद्यपि ध्वनिमलङ्कारशब्दैर्न क्वचिदपि व्यवह्रितवन्तस्तथापि-रूपकोत्प्रेक्षा-प्रतिवस्तूपमा-पर्यायोक्ति-संकराद्यलङ्काराणां लक्षणैरुदाहरणैर्वा किमप्य-स्मिन् विषये विशेषेण ध्वन्यते सूच्यते वेति विज्ञेयम् । आचार्यदण्डी नाट्यशास्त्रसम्बद्धान् विषयानपि अलङ्कार-

त्वेन स्वीकरोति । तद् यथा, सन्धिः, सन्ध्यङ्गम्, वृत्तिः-वृत्त्यङ्गम्, लक्षणा- व्यञ्जनादीनामपि अलङ्कारेषु समावेशः स्यादिति चिकीर्षति । इत्थञ्चालङ्कारिकाः विशेषतो दण्डी गुण-रस-ध्वनि-प्रबन्धकाव्य-नाट्यादिविषयानपि अलङ्कारनाम्नाऽभिहितवन्त इति समासेनात्र स्वीकार्यम् । एतेषां मतेन अनुप्रासोपमादय एवालंकारपदवाच्याः न सन्त्यपितु-**काव्य-चमत्कारोत्पादकाः सौन्दर्यविधायकाश्च सकलान्यपि काव्यतत्त्वानि काव्याङ्गानि वाऽलङ्कारपदवाच्यानि सन्ति-**इति सुतरां बुद्धिपथमुपयाति ।

निष्कर्षतो, वयं व्यावक्तुम् शक्नुमो यत् अलंकार-सम्प्रदायेऽलङ्कारस्य व्यापकोऽर्थोऽभीष्टः । एतेषां मते अलंकार एव काव्यसर्वस्वम् ।

अलंकारवादी रुय्यकोऽचीकथत् यत् प्राचीनाऽऽलंकारिका भामहोद्भटादयः प्रतीयमानं (व्यंग्यम्) अर्थम् वाच्यस्य सहायकं मत्वाऽलंकार एव निवेशयन्ति–'**इह तावत् भामहोद्भटप्रभृतयश्चिरन्तनालंकारकाराः प्रतीयमानमर्थं वाच्योपस्कारतया अलंकारपक्षनिक्षिप्तं मन्यन्ते ।**' एतेषामाचार्याणां मतेन रसादयोऽलंकारपोषकाः उपकारकास्सन्ति । अतएव काव्यमीमांसाग्रन्था अपि अलंकारशास्त्राभिधानेन प्रसिद्धिमावहन्तीति ।

**अलङ्करोतीति-अलङ्कारः**—यःशोभयति सोऽलङ्कारः । अथवा अलंक्रियतेऽनेनेत्यलंकारः । प्रथमव्याख्यानेऽलंकारः कर्त्ता, विधायको वा, द्वितीये च साधनमात्रम् । अलंकारस्य सर्वसम्मतदृष्ट्या द्वितीयव्युत्पत्तिः संगता यया च अलंकाराणां काव्यशोभायां साधनमात्रत्वमाभाति– **'काव्यशोभायाः कर्त्तारो धर्माः गुणाः तदतिशयहेतवस्त्वलंकाराः'** । **दण्डी** काव्यशोभाकर्त्तृत्वरूपेणालंकारं स्वीकरोति– **'काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते'** । अत्रालंकारो द्व्यर्थे प्रयुक्तः–समग्रकाव्यसौन्दर्याय सौन्दर्योपकरणाय च ।

आचार्यवामनोऽलंकारान् काव्यशोभाकरान् न मनुते अपितु गुणोत्कर्षान् अङ्गीकरोति । अस्यैव प्रभावः परवर्तिकाले प्रतिफलितोऽभूत् । परिणामस्वरूपेण एकः पक्षः काव्याय अलङ्कारस्यानिवार्यतामपरश्च गौणतां प्रदर्शयति । यथा खल्वाचार्यमम्मटः–**'अनलंकृती पुनः क्वापि'** । अत्र **चन्द्रालोककारः पीयूषवर्षी जयदेवस्तु** प्रोक्तवान्–

**अङ्गीकरोति यः काव्यं शब्दार्थावनलंकृती ।**
**असौ न मन्यते कस्मादनुष्णमनलंकृती ।।**

अर्थात् यदि कश्चित् पण्डितम्मन्यः काव्यमनलंकृती (अलंकाररहितम्) स्वीकरोति तर्हि स पावकमपि उष्णतारहितं स्वीकुर्यादिति ।

**आचार्यभामहस्तु** उक्तवान् यत्- '**न कान्तमपि निर्भूषं विभाति वनिताननम् ।**' अर्थात् आभूषणरहितं सुन्दर्याः वदनं प्रियाय आकर्षकं न भवतीति ।

ध्वनिसिद्धान्तस्य प्रतिष्ठानन्तरं काव्येऽलंकारसत्ता अपरिहार्या न सञ्जाता- आचार्यश्रीहेमचन्द्राः अलंकाराणां काव्ये शोभाजनकत्वेन कथितवन्त इति नात्र संदेहः । विश्वनाथोऽपि शब्दार्थास्थिरधर्मम् अलंकारमिति स्वीकृत्य काव्यशोभावर्धकम् रसोपकारकं मनुते—

**शब्दार्थयोरस्थिरा ये धर्मा शोभातिशायिनः ।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गादिवत् ॥**

निष्कर्षतोऽलङ्कारविषये वयं वक्तुं शक्नुमो यत् भावोत्कर्षप्रदर्शकान्, वस्तूनां रूप-गुण-क्रियातिशयानुभवितुं यदा कदा सहायिका युक्तिरलङ्कार इति ।

## रीतिसम्प्रदायः

रीतितत्त्वस्य चर्चा भरतस्य नाट्यशास्त्रेऽपि विराजते किन्त्वस्य सम्प्रदायस्य **प्रवर्तकः वामनाचार्य** एव । तस्य समयोऽष्टम्शकम् अस्ति ।

संस्कृतसाहित्ये रीतिशब्दोऽनेकेषु अर्थेषु प्रयुक्तः ।

भामहो रीतिशब्दस्यार्थः काव्यम्, दण्डिभोजौ मार्गः (पन्था) आनन्दवर्धनः पदसंरचना, रुद्रकमम्मटौ वृत्तिः, विश्वनाथः रीतिरिति अभिहितवन्तः।

भोजः रीङ् गतौ, धातोः क्तिन् प्रत्यये सति रीतिपदं निष्पादयति-अत स मार्गः (पन्था) इत्यर्थं सम्पादयति–

**वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः।**
**रीङ् गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते ॥**

आचार्यवामनः काव्यस्य आत्मा रीति इति स्फोरयति– **'रीतिरात्मा काव्यस्य'**। अत्र च तेन 'विशिष्ट-पदरचना रीतिः' स्वीकृता। विशेषतेयं गुणानां संश्लेषणाश्रिता– 'विशेषी गुणात्मा'। काव्यशोभोत्पादकान् धर्मान् गुणान् प्रचक्षते— **'काव्यशोभायाः कर्त्तारो धर्मा गुणाः।'** अत्र तावत् गुणो नित्यधर्मः, अलङ्कारश्चानित्यः। वामनमतानुसारेण काव्यस्य समस्तं सौन्दर्यं रीतौ प्रतिष्ठितम्। सौन्दर्यमेतद् दोषाणां परिहारेण गुणालंकार-सफलप्रयोगेण च सुतरामाविर्भवति–**काव्यं ग्राह्यमलंकारात्, सौन्दर्यमलंकारः स दोष-गुणहानादानाभ्याम्**।

अन्ये आचार्याः रीतिपदेन गुणाभिव्यञ्जकवर्णानामर्थ-ग्रहणव्युत्पत्तिं स्वीकुर्वन्ति- **रीयते माधुर्यादिगुणानां विशेषो**

**ज्ञायतेऽनयेति रीतिः'** । विश्वनाथोऽपि शरीराङ्गसंस्थानवत् काव्यात्मभूतरसादीनामुपकारिका रीतिरिति स्वीकरोति । उक्तञ्च—

> पदघटना रीतिरङ्गसंस्थाविशेषवत् ।
> उपकर्त्री रसादीनां.....................॥

निष्कर्षश्चायं वामनोऽलंकारवादिनः सिद्धान्तान् अधिकांशतोऽङ्गीकरोति तथापि काव्यस्यात्मा रीतिरिति मतं संस्थापयति । अनेनास्य गुणग्राहकता शिथिलता चोभयं द्योत्यते ।

## ध्वनिसम्प्रदायः

भारतीयकाव्यशास्त्रेतिहासे ध्वनि-सम्प्रदायोदयो युगान्तरकारी भासते । ध्वनिवादिन आचार्याः रसालंकाररीतिवक्रोक्त्यादीनां पूर्वन्तनीनकाव्यतत्त्वानां सामञ्जस्यं ध्वनिना सहैव सम्पादयन्ति । सम्प्रदायस्यास्य प्रतिष्ठाता **आनन्दवर्धनाचार्यः, पोषकोऽभिनवगुप्तः** तस्मिन् प्राणसञ्चारको **मम्मटाचार्यः** । यद्यपि ध्वनिसम्प्रदायस्य विरोधिनोऽस्य खण्डनं कर्तुं बहुधा विचेष्टितवन्तस्तथापि अन्तस्तत्त्वमहत्त्वात् सिद्धान्तोऽयमजेयः ।

वाच्यार्थाऽपेक्षया या अन्या हृदयाह्लादकारिका सा

ध्वनिः– **इदमुत्तममतिशयिनि व्यंग्ये वाच्याद् ध्वनिर्बुधैः कथितः।** (का. प्र. १/४) अर्थस्तावत् वाच्यप्रतीयमानभेदेन द्विधा भवति। साहित्ये ध्वनिवादिदृष्ट्या-अलंकारादीनां ग्रहणं वाच्यार्थे सम्पद्यते । ध्वनेः ग्रहणन्तु प्रतीयमानेऽर्थे प्रवर्तते । आनन्दवर्धनाचार्यमतेन प्रतीयमानार्थस्य सत्ता निश्चिता भवति । तच्च प्रतीयमानमन्यदेव वस्तु—

**प्रतीयमानं पुनरन्यदेववस्त्वस्ति वाणीषु महाकवीनाम् ।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ।।**

(ध्वन्यालोकः १/४)

ध्वनिसिद्धान्तोद्भावना प्रतिष्ठा च आनन्दवर्धनस्य महत्युपलब्धिरस्ति । वाल्मीकि-व्यास-कालिदासादीनां महाकाव्येषु ध्वनितत्त्वं समीक्ष्य तच्चात्मपदे प्रतिष्ठाप्याचार्यानन्दवर्धन उक्तवान्–

**'काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः'**

आनन्दवर्धनस्य कथनानुसारेणेदं प्रतीयते यत् ततः पूर्वमपि ध्वनितत्त्वप्रतिष्ठा आसीदिति । ध्वन्यालोकरचनायाः पूर्वं भरतस्य नाट्यशास्त्रम्, भामहस्य काव्यालंकारः, उद्भटस्य टीका दण्डिनः काव्यादर्शः वामनस्य काव्यालंकारसूत्रवृत्तिः, रुद्रटप्रणीतः काव्यालंकार इत्यादयो लाक्षणिकाः ग्रन्थाः आसन् किन्त्वेतेषु ध्वनितत्त्वस्य क्वचिदपि

विवेचनं न समवाप्यते आनन्दवर्धनस्तु ग्रन्थानेतान् विलोक्यैव त्रयाणां विरोधिमतानां कल्पनामकरोत् । ध्वनिसिद्धान्तात् पूर्वं रस-रीत्यलंकार-सम्प्रदायानां प्रतिपादनं समुल्लासितमासीत् । यद्यपि रस-रीत्यलंकाराचार्या ध्वनिसिद्धान्तेन परिचिताः नासन् एतेषां विवेचने ध्वनेः पूर्वाभासः समजनि । आनन्दवर्धनः स्वत एव स्वीकरोति यदेतेषां स्थापनाः ध्वनेः सामीप्यमभजन् ।

ध्वनिसिद्धान्तस्य मूलस्रोतो वैयाकरणानां स्फोटसिद्धान्ते सुरक्षितम् । तथा च तस्य स्वरूपं भारतीयदर्शनेषु विवेचितव्यञ्जनाव्यापारे परिलक्ष्यते । व्याकरणशास्त्रे कर्णगोचरः शब्दोऽनित्यः, अनित्यात् शब्दात् अर्थप्रतीतिरसम्भवा । अतो वैयाकरणाः नित्यशब्दानां कल्पनार्थं स्फोटसिद्धान्तोद्भावनामकुर्वन् । स्फोटश्चैवं व्याख्यातः— **'स्फुटित अर्थोऽस्मादिति स्फोटः'** यस्मात् शब्दविशेषात् अर्थः स्फुटितः स स्फोटः स च नित्यः पूर्वापरसम्बन्धरहितोऽखण्डएकरसः । शब्दस्यास्याभिव्यक्तिरेव ध्वनितत्त्वमस्ति । व्याकरणशास्त्रे ध्वनिशब्दोऽभिव्यञ्जनार्थे प्रयुक्तस्थता च ध्वनिसम्प्रदाये शब्दार्थोभयाय प्रयुज्यते ।

ध्वनिसम्प्रदाये काव्यस्यात्मा ध्वनिः । ध्वन्याचार्या ध्वनेरभ्यन्तरे रसध्वनिं, अलंकारध्वनिं वस्तुध्वनिश्च गुण-

यन्ति । रसध्वनिना तेषां तात्पर्यम्-नवरसभाव-भावाभास-भावोदय-भावशबलता-भावसन्ध्यादिभिरप्यस्ति । वस्तु-ध्वनिना तथ्यकथनस्य तथा च कल्पनाप्रसूत-चमत्कारजनक-भामाहाभिव्यक्तेरलंकारध्वनौ ग्रहणं भवती तिएतेषु । ध्वनि-त्रयेषुरसध्वनिरेव सर्वश्रेष्ठा मन्यते । सैषा ध्वनिरेव काव्य-स्यात्मा विद्यत इति ।

ध्वन्याचार्यैः ध्वनितत्त्वे एव सर्वेषामन्यकाव्यात्मक-तत्त्वानां समाहारो विहितः । तेषां वर्णनानुसारेण रस इव गुणालंकाररीतिवक्रतादयोऽपि व्यंग्या एव न वाच्याः । वाचकशब्दैस्तु न च माधुर्यादिगुणानां कथनं भवति, वैद-र्भ्यादिरीतिनाम्, उपमाद्यलंकारकाराणाम्, वक्रतादीनामपि च न । एते सर्वेऽपि ध्वनिस्वरूपे एव समुपस्थिता भवन्तीति । अन्यच्च– गुणालंकाररीत्यादयः पदार्थाः प्रत्यक्षतो वाच्यार्थ-द्वारा मानसं नाभिनन्दयन्ति । अस्य महत्त्वमपि प्रत्यक्षा-पेक्षया ध्वन्यार्थादेव । यतो हि यत्र ध्वन्यार्थो न तत्र आत्माविहीनतत्त्वानि आभूषणामिव निरर्थकत्वं भजन्ते । अतएव ध्वनिकारैरेते ध्वन्यार्थरूपाङ्गिनोङ्गत्वेनैव स्वीकृताः सन्ति । फलतो ध्वनेः प्राधान्यम्, सैव काव्यस्य आत्मा ।

भारतीयकाव्यशास्त्रेतिहासे ध्वनिसम्प्रदायोदयः स्व-कीयं विशिष्टोपलब्धिस्वरूपं विभर्ति । ध्वनिसम्प्रदायोद-

यात् प्रागपि काव्यशास्त्रे मौलिकता आसीत् । किन्तु तस्मिन् परिपक्वतया अभावो व्यजृम्भत । आनन्दवर्धनाचार्येण, अभिनवगुप्तेन मम्मटेन च **दिशेयं** निर्दिष्टा । परिपक्वतायाः प्रौढतायाः गाम्भीर्यस्य च समावेशोऽस्मिन्नेव काले समजनि । कालोऽयं चरमविकासकालः । ध्वनिसिद्धान्तमुद्दिश्य काव्यशास्त्रेतिहासे कालविभाजनमपि संदृश्यते–

१- पूर्वं ध्वनिकालः-प्रारम्भात्, आनन्दवर्धनात् पूर्वं ८५० ईस्वीपर्यन्तम् ।

२- ध्वनिकाल—आनन्दवर्धनान् मम्मटपर्यन्तं १२५० ई. पर्यन्तम् ।

३- उत्तरध्वनिकालः-मम्मटादद्यावधि-पर्यन्तम् ।

ध्वनिकालस्य प्रथमाचार्यः आनन्दवर्धनोऽभवत् । द्वितीयस्य अभिनवगुप्तः । अस्य समयः ९८० तः १०२० खीष्टाब्दपर्यन्तमङ्गीक्रियते ऐतिह्यतत्त्वविद्भिः । अनेन **'ध्वन्यालोकलोचन'** नाम्नी टीकाध्वन्यालोकोपरि टीकिता । तत्र च ध्वनिसिद्धान्तस्य पल्लवनं पोषणञ्च विराजेते । अस्याः कृतेर्महत्त्वं कस्या अपि मौलिककृतेर्न्यूनं न सम्भवति । अनेनाचार्येण प्रमाणितं यत् व्यञ्जनाव्यापारद्वारैव रससिद्धिर्भवितुमर्हति । आचार्योऽयं मुख्यतो रसवादी

विचारकः समभवत् । अतोऽनेन रसादेव ध्वनेर्महत्त्वं प्रतिष्ठापितम् । अस्य मतानुसारेण रस-भावादीनां प्रतीति व्यंग्यद्वारैव भवति । रसस्य महत्त्वं व्यञ्जनाशक्तेरनुसारेण स्फुटी भवति । अस्य विवेचनेन रस-ध्वनिसिद्धान्तयोर्मध्ये-ऽन्तसम्बन्धसंस्थापितोऽभवत् ध्वनिकारैर्ध्वनिविषये वस्तु-ध्वनिः, अलंकारध्वनिः । इति द्वयोरेवोल्लेखः कृतोऽभूत् किन्तु अभिनवगुप्तेनोद्घुष्टं काव्यं रसेनैव जीवति, रसमन्तरा काव्यं न सम्भवति । अतो रसध्वनिः स्वीकार्या । वस्तुतस्तु वस्त्वलंकाराभ्यामपि रस एव बोध्यते ।

---

इत्थश्चाभिनवगुप्तेन रसध्वनिसिद्धान्तयोः समीचीन-स्सम्बन्धसंस्थापितः ।

ध्वनिसम्प्रदायोन्नायकेषु सर्वाधिकमहत्त्वपूर्ण आचार्य-मम्मटो बभूव । अयश्च ध्वनिप्रस्थापनपरमाचार्यपदेनापि प्रसिद्धिमावहति । ध्वनिसिद्धान्तं समीचीनतया व्यवस्थाप-यितुं परिपोषयितुश्चास्य महत्त्वमतिरोहितं प्रेक्षावताम् ।

आचार्यमम्मटो मूलतो ध्वनिवादी सञ्जातः । अतएव काव्यप्रकाशस्य पञ्चमोल्लासे व्यञ्जनाविरोधीनां मतखण्डनं विधाय व्यञ्जनाव्यापारं संस्थापितवान् । मम्मटानन्तरं

कलिकाल-सर्वज्ञो हेमचन्द्रः, रुय्यकः, विद्याधरः, विद्यानाथः इत्यादयोऽपि ध्वनिसिद्धान्तप्रतिष्ठाने महत्त्वपूर्णं योगदानमकुर्वन् ।

पण्डितराजजगन्नाथोऽपि ध्वनिसमर्थकः समजनि । ध्वनिसम्प्रदायस्यान्तिमः प्रौढो ग्रन्थो **रसगङ्गाधरः** ।

ध्वनिविरोधकेष्वाचार्येषु मुकुटभट्टप्रतिहारेन्दु-धनञ्जय-धनिक-कुन्तक-महिमभट्टानामुल्लेखनीयानि सन्ति ।

## वक्रोक्तिसम्प्रदायः

भारतीयकाव्यशास्त्रे कुन्तकात् पूर्वम् अलंकारः काव्यस्य सर्वस्वम्, रीतिर्ध्वनिश्चात्मपदे प्रतिष्ठिते आस्ताम् । तथा च भरताचार्यैः आनन्दवर्धनाचार्यैश्च रसस्य परिनिष्ठितं व्यवस्थितञ्च स्वरूपं प्रत्यपादि ।

आचार्य **कुन्तक** एव वक्रोक्तिसम्प्रदायस्य **प्रवर्तयिता** स्वीक्रियते । एते वक्रोक्तिमलंकाररूपेण तथा प्रकारान्तरेण ध्वनिरिति कथयित्वा सिद्धान्तद्वयं प्रति मूलतो ध्वनिसिद्धान्तं प्रति समादरमभिव्यञ्जयन्ति । रसस्तु मुक्तकण्ठेन समर्थ्यतेऽनेन । तथापि वक्रोक्तिवादस्संस्थापितः एतैर्वक्रोक्तिश्चमत्कृतिः, सामान्यजनकथनाद्भिन्ना, चमत्कार-

जनिकेति स्वीक्रियते । अन्यच्च– '**वक्रोक्तिः काव्य-जीवितम्**' इति स्वीकृत्य सा काव्यस्यात्मपदे प्रतिष्ठापिता ।

मान्यतैषा परिवर्तिनिकाले पुनः काव्यस्यात्मपदात् परिभ्रष्टा, मात्रमलंकारस्वरूपे स्वीकृता । यतो हि वक्रोक्तिमाध्यमेन काव्यचमत्कारो निरूप्यते । वर्णसम्बन्धि-सूक्ष्मतत्त्वात्, बाह्यसौन्दर्याच्चारभ्य प्रबन्धवक्रतापर्यन्तं वक्रोक्तेः क्षेत्रम् । अत्र च गुणरीत्यलंकारध्वनि-प्रबन्ध-संगठनौचित्य रसादीनामंशतः समावेशोऽपि सञ्जायते । काव्यचमत्कारस्य सूक्ष्मविवेचनाय वक्रोक्तिसिद्धान्तः एकः सूक्ष्मो व्यापकः सर्वाङ्गपूर्णश्च वरीवर्ति । 'अरिस्टोटल-लांजीनस-एडीसन-क्रोचे'– इत्यादिभिः पाश्चात्य-विचारकैः स्वकीयसिद्धान्तेषु वक्रोक्तेः महत्त्वपूर्णं स्थानमङ्गीक्रियते ।

आचार्यकुन्तकः उक्तिवक्रताजन्यः काव्यस्य आह्लादः इति स्वीचकार । वस्तुतस्तु काव्याह्लादादेवोक्तिवक्रता समायाति । कविः उद्दीप्तमनोभावान् भावयितुं विशिष्टाह्लादं रसं वा अनुभवति तथा च अस्मादाह्लादात् रसाद्वा उक्तौ वक्रतावैचित्र्यं समायाति । अतएव रस एव काव्यात्मा भवितुमर्हति वक्रोक्तिरनिवार्या सत्यपि काव्यजीवितं भवितुं नार्हति ।

वक्रोक्तिसम्प्रदायो योग्योत्तराधिकारिणोऽभावात् समु-

चितरूपेण विकसितो नाभूत् । कुन्तकस्य समयः एकादश-शताब्द्याः पूर्वार्धो मन्यते ।

## औचित्यसम्प्रदायः

औचित्यसम्प्रदायस्याचार्यः क्षेमेन्द्रः । औचित्याग्रहो भरतस्य नाट्यशास्त्रेऽपि वर्तते । आनन्दवर्धनोऽपि स्वीकृतवान् यत् रसस्य मौलिकं रहस्यमौचित्यमिति–

**अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।**
**औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ।।**

ध्वन्यालोकः ३/१४

आचार्याभिनवगुप्तोऽपि औचित्यं ध्वनितत्त्वञ्च परस्परोपकारकरूपेणाङ्गीकृतवान् । क्षेमेन्द्रो ध्वनिवादी सन्नपि औचित्यं व्यापकतत्त्वरूपेणोद्भावयति । औचित्यविचार-चर्चायां काव्यशास्त्रस्यान्यसिद्धान्तान् औचित्ये आत्मसात् कुर्वन् प्रोवाच–

**अलंकारास्त्वलंकारा गुणा एव गुणाः सदा ।**
**औचित्यं रससिद्धस्य, स्थिरं काव्यस्य जीवितम् ।।**

क्षेमेन्द्रः उचितस्य भावः, औचित्यमित्येव स्वीकरोति–

**"उचितस्य च यो भावस्तदौचित्यं प्रचक्षते ।"**

औचित्यं रसस्य जीवनमस्ति, रस काव्यस्यात्मा। औचित्यमन्तरा काव्यं निश्चप्रचत्वेनोपहासप्रदमेव सञ्जायते।

अत्र कुप्पूस्वामिन उक्तिरपि विशेषेण समादरणीया—

**औचितीमनुधावन्ति सर्वे ध्वनिरसोन्नयाः।**
**गुणालङ्कृतिरीतिनां नयाश्चानृजुवाङ्मयाः॥**

आचार्यक्षेमेन्द्रस्य समयः एकादशशताब्द्याः उत्तरार्द्धः स्वीक्रियते।

विवेचनेनानेन काव्यशास्त्रीय-कविसम्प्रदायानां सामान्यपरिचयो विजायते। काव्यात्मतत्त्वजिज्ञासायां पल्लवितः सम्प्रदायविभेदः। वस्तुतस्तु काव्यतत्त्वमक्षुण्णमेव रुचीनां वैचित्र्यात् सम्प्रदायभेदत्वमुपयाति।

## निरङ्कुशाः कवयः

कविसम्प्रदाये कवीनां निरंकुशत्वमिति विषयोऽनुप्रेक्षणीय इति जिज्ञासायां तेषां निरंकुशोक्तीनां वैचित्र्यञ्चात्रैव परम्पराप्राप्तं विविच्यते—

**'कवयः निरंकुशाः भवन्ति'**। वस्तुवर्णने क्वचित् सत्तायामपि तस्याभावेऽपि वस्तूनां तद्भावं वर्णयन्ति।

इत्यादि बहुप्रकारा लोकनिरपेक्षा कवीनां प्रवृत्तिः प्रवर्त्तते। साऽत्र संक्षेपात् प्रदर्श्यते।

## १- सतां भावानामनिबन्धनम्

१. वसन्तऋतौ मालत्याऽभावो–

यथा–

"मालती विमुखश्चैत्रो,
विकासी पुष्पसम्पदाम्।
आश्चर्यं जातिहीनस्य,
कथं सुमनसः प्रियाः॥ १॥"

२. चन्दनवृक्षे पुष्प-फलयोरभावो–

यथा–

"सा छाया स च सुन्दरः परिमलस्ते कोमलाः पल्लवाः,
भ्रान्तश्चन्दनपादपस्य बहवः सन्त्येव किं तैर्गुणैः।
दृप्यद्दुष्टभुजङ्गसंगतिवशादापादमूलागतै-
रानीतं फलमन्यतोऽपि पथिकैः साशङ्कमास्वाद्यते॥१॥"

३. मासस्य कृष्णपक्षे ज्योत्स्नायाः अभावो वर्त्तते, तथा मासस्य शुक्लपक्षे तिमिरस्य अभावो वर्त्तते।

अत्र कृष्णपक्षे शुक्लपक्षे च यथा–

"परतो न तत्त्वचिन्ता,
तद्वन्तः स्युर्मुखस्थगुणदोषैः।
एको हि सितः पक्षः
कौमुद्या तुल्ययाऽपि कृष्णोऽन्यः॥ १ ॥"

४. कुन्दकुड्मलानां कामिदन्तानां रक्तत्वस्याभावो वर्त्तते।
यथा–

"सुश्वेतकुन्दकुड्मल-विमलदतीं यो विहाय राजिमतीम्।
मोक्षाङ्गनानुरक्तो, बभूव नेमिः स वः पायात्॥ १ ॥"

५. दिवा नीलोत्पलादीनां विकासस्याऽभावो वर्त्तते।
यथा–शिशुपालमाघकाव्ये वर्णने–

"कुमुदवनमपश्रि श्रीमदम्भोजखण्डं,
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः।
उदयमहिमरश्मिर्याति शीतांशुरस्तं,
हतविधिलसितानां हि विचित्रो विपाकः॥१॥"

इति वस्तु सतां भावानामनिबन्धविषये ज्ञेयम्।

## २- क्वचिद् वस्तु असतामपि भावानां निबन्धनं काव्येषु प्रदर्श्यते।

१. यथा मृणालानां जलाशयमात्रे निबन्धः यथा लक्षण-साहित्यग्रन्थेषु उदाहरणं निबन्धनस्य।

नदीषु नीलोत्पलादीनां, यथा–

"शस्तं पयः पपुरनेनिजुरम्बराणि,
चक्षुर्विसंहृतविकाशि बिसप्रसूनाः ।
सैन्याः श्रियामनुपभोगनिरर्थकत्व-
मिथ्याप्रवादमसृजत्वननिम्नगानाम् ॥ १ ॥"

२. राजहंसानां जलाशयमात्रे निबन्धो, यथा साहित्यदर्पणे–

"अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः,
सा हंसैः कृतकौतुका चिरमभूद् गोदावरीरोधसि ।
आयान्त्याः परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया,
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ॥१॥"

३. यशोहास्ययोः शौक्लस्य निबन्धो, यथा साहित्यलक्षण-ग्रन्थेषु–

"कर्पूरद्रुमगर्भधूलीधवलं यत् केतकानां त्विषः,
श्वेतिम्ना परिभूय चन्द्रमहसा सार्धं प्रतिस्पर्धते ॥
तत् पाकोज्वलनालिकेर सलिलच्छायावदातं यशः,
प्रालेयाचलचूलिकासु भवतो गायन्ति सिद्धाङ्गनाः ॥१॥"

४. अयशः पापयोः कार्ष्ण्यस्य निबन्धो, यथा–

"प्रसरन्ति कीर्त्तयस्ते तव-
च रिपूणामकीर्त्तयो युगपत् ।
कुवलयदलसंवलिताः
प्रतिदिशमिव मालतीमालाः ॥ १ ॥"

५. रात्रौ चक्रवाकानां भिन्नतटाश्रयणस्य विरहत्व-निबन्धनम् । यथा काव्यग्रन्थेषु–

"इह हि कुमुदकोशे पीतमम्भः सुशीतं,
कवलितमिह नालं कन्दलं चेह दृष्टम् ।
इति रटति निशायां पर्यटन्ती तटान्ते ।
सहचरपरिमुक्ता चक्रवाकी वराकी ॥१॥"

एवम्–

६. भूधरभावे हेमरत्नगजाः निबध्यते ।

७. अन्धतमिस्रे मुष्टिग्राह्यत्वं निबध्यते ।

८. ज्योत्स्नायाः कुम्भोपवाह्यत्वं निबध्यते ।

९. क्रोधानुरागयो रक्तत्वमसदपि निबध्यते ।

## ३- केषाञ्चिन्नैयत्यम्

यथा–

१. वसन्ते एव कोकिलरुतं नैयत्येन वर्ण्यते ।

२. वर्षास्वेव मयूरस्य नृत्यं रुतं च नैयत्येन वर्ण्यते ।

३. मलयगिरावेव चन्दनोत्पत्तिः नैयत्येन वर्ण्यते ।

४. समुद्रेष्वेव मकराः नैयत्येन वर्ण्यते ।

५. हिमगिरावेव भुर्जजन्म नैयत्येन वर्ण्यते ।

६. ताम्रपण्यां एव मौक्तिकानि नैयत्येन वर्ण्यते ।

इत्यादयो अनेकाः नैयत्येन वर्ण्यते इति ।

## ४- कुत्रचिद् भिन्नानामप्यैक्यम्, तत्र कृष्ण-नील-हरित-श्यामानां ऐक्यं

**यथा–**

**"सजलजलदनीला भाति यस्मिन् वनाली-**
**मरकतमणिकृष्णो यत्र नेमिजिनेन्द्रः ।**
**विकचकुवलयालि-श्यामलं यत्सरोम्भः,**
**प्रमदयति न कांस्कांस्तत्पुरं राहडस्य ।। १ ।।"**

अस्मिन् श्लोके कृष्ण-नील-हरित-श्यामानां भिन्नत्वेऽपि ऐक्यं निबध्यते ।

**श्वेत-गौरयोरैक्यं यथा रघुवंशकाव्ये—**

**"कैलासगौरं वृषमारुरुक्षोः,**
**पादार्पणानुग्रहपूतपृष्ठम् ।**
**अवेहि मां किंकरमष्टमूर्तेः,**
**कुम्भोदरं नाम निकुम्भमित्रम् ।। १ ।।"**

श्लोकेऽस्मिन् श्वेत-गौरयोः भिन्नत्वेऽपि ऐक्यं निबध्यते ।

पीत-रक्तयोरैक्यं यथा—

"नवकनकपिशङ्गं वासराणां विधातुः,
ककुभि कुलिशपाणेर्भाति भासां वितानम्।
जनितभुवनदाहारम्भमम्भांसि दग्ध्वा,
चलितमिव महाब्धेरुर्ध्वमौर्वानलार्चिः ॥ १ ॥"

अत्र पीत-रक्तयोः भिन्नत्वेऽपि ऐक्यं निबध्यते। एवं रक्त-गौरयोः इन्दौ शशमृगयोः कामध्वजे मकरमत्स्ययोः कन्दर्पस्य मूर्त्तत्वाऽमूर्त्तत्वयोः भिन्नत्वेऽपि ऐक्यं निबध्यते।

## ५- देवविवर्णने

विज्ञान-चातुर्यत्रपाशीलव्रतम्, रूपं, लावण्यं, सौभाग्यं, प्रेम, शृङ्गार इत्यादयो वर्ण्यन्ते।

## ६- मन्त्रवर्णने

यथा—

"मन्त्रे पञ्चाङ्गता शक्तिषाड्गुण्योपायसिद्धयः।
उदयाश्चिन्तनीयाश्च, स्थैर्यौन्नित्यादिसूक्तयः ॥"

अस्मिन् श्लोके मन्त्रवर्णनं प्रोक्तमिति।

## ७- नृपवर्णने

विद्या, वयः, शक्तिः, प्रजाशास्तिः, प्रजारागः, धर्मार्थ-कामेषु तुल्यतादिकं वर्ण्यते।

यथा किराते दुर्योधनवर्णने—

"असक्तमाराधयतु यथायथं,
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमियिवान्,
न बाधतेऽस्य त्रिगणः परस्परम् ॥"

अत्र नृपवर्णनमुक्तमिति ।

## ८- कुमारवर्णने

शस्त्र-शास्त्र-कला - बलं - गुणाः उच्छ्रया राजभक्तिः सुगमतादिकं वर्ण्यते । यथा—

द्रष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा,
धीरोद्धता नमयतीव गतिर्धरित्रीम् ।
कौमारकेऽपि गिरिवद्गुरुतां दधानो,
वीरो रसः किमयमेत्युत दर्प एव ॥

## ९- अमात्यवर्णने

नीतिशास्त्रं, शक्तिशास्त्रं, धैर्यं, बुद्धिः, गभीरता, अलोभत्वं, जनरागः विवेकिता वर्ण्यते ।

## १०- सेनापतिवर्णने

यथा—

"सेनापतौ राजभक्तिः नीतिशास्त्रमभीरुता ।
संगरे विजयोऽभ्यासे, वाहने कुशलव्रती ॥१॥"

अत्र सेनापतिवर्णनं प्रोक्तमिति ।

## ११- पुरोहितवर्णने

स्मृतिः वेदः निमित्तं आपत् प्रतिक्रिया दण्डनीतिज्ञता शुद्धिः धर्मः शीलं कुलक्रमः वर्ण्यते ।

## १२- दूतवर्णने

**यथा–**

**"दूतेषु चारु - चक्षुत्वं, राज्यश्रीवृद्धिकृद्वचः ।**
**क्षोभितुं शत्रुणां गुह्यं, धृष्ट वा कर्मदक्षता ।।१।।"**

अत्राऽपि दूतवर्णनं कथितमिति ।

## १३- युद्धवर्णने

**यथा–**

**"युद्धे तु वर्मबलवीररजांसि तूर्य-**
**विश्वासनादशरमण्डपरक्तनद्यः ।**
**छिन्नातपत्र-रथ-चामरकेतुकुम्भि-**
**मुक्तासुरीवृत भटामरपुष्पवर्षाः ।।१।।"**

अस्मिन् श्लोके युद्धवर्णनं कथितमिति ।

## १४- प्रयाणवर्णने

यथा–

"प्रयाणे भेरिनिर्घोषः, सेनासम्मर्दधूलयः ।
गजाश्वरथबाहुल्यं, पदातिसैनिकैर्युताः ॥ १ ॥"

अत्र प्रयाणवर्णनं प्रोक्तमिति ।

## १५- अश्ववर्णने

यथा–

"अश्वे निजखुरोत्खात-रजसा धूलिमण्डलम् ।
रभसा गति प्रौन्नत्यं, जातिर्धारायपञ्चनम् ॥१॥

श्लोकेऽस्मिन् अश्ववर्णनमुक्तमिति ।

## १६- गजवर्णने

यथा–

"गजे सहस्रयोधित्वमुच्चत्वं कर्णचापलम् ।
अरिव्यूहविभेदित्वं, कुम्भमुक्तामदानिलः ॥१॥"

अस्मिन् श्लोके गजवर्णनमिति ।

## १७- देशवर्णने

यथा–

"देशेऽतिगर्भद्रव्यत्वं,-पण्यधान्यादिषु सुखी ।
नगरग्रामजनाधिक्यं, दुर्गादिनदनिर्झराः ॥"

अत्र देशवर्णनं कथितमिति ।

## १८- पुरवर्णने

यथा–

"पुरेषु बहुप्रासादाः, विपण्यां जनसंमदः ।
परिखावप्रवाप्यानां, बाहुल्यं मणिकादिषु ।।"

श्लोकेस्मिन् पुरवर्णनं प्रोक्तिमिति ।

## १९- ग्रामवर्णने

यथा–

"ग्रामे सघनवृक्षाली, पशु-धान्य-धनं बहु ।
वाप्यरघट्टकेदारा ग्रामेयोमुग्धविभ्रमाः ।।"

अत्र ग्रामवर्णनमुक्तमिति ।

## २०- अरण्यवर्णने

यथा–

"वने सिंह-गज-व्याघ्र-, व्याल-वराह-वृक्षकाः ।
काकोलूककपोताद्या भिल्लभल्लदवादयः ।।"

अत्र अरण्यवर्णनं कथितमिति ।

## २१- उद्यानवर्णने

यथा–

"उद्याने कुञ्जवृक्षाणां, बाहुल्यं विहगादिषु ।
मल्लिका-मालती-गन्धः, वापिमध्ये सरोरुहाः ।।"

अस्मिन् श्लोके उद्यानवर्णनमुक्तमिति ।

## २२- आश्रमवर्णने

यथा–

"आश्रमेऽतिथिपूजैण-विश्वासो हिंस्रशान्तता ।
यज्ञधूमो मुनिसुता द्रुसेको वल्कलद्रुमाः ॥"

श्लोकेऽस्मिन् आश्रमवर्णनं प्रोक्तमिति ।

## २३- पर्वतवर्णने

यथा–

"शैले काष्टौषधिधातु-वंशविद्याधरादयः ।
सिंहा व्यालाश्च रिक्षादि, चरन्ति दस्युदानवाः ॥"

अत्र पर्वतवर्णनं प्रोक्तमिति ।

## २४- समुद्रवर्णने

यथा–

"अब्धौ द्वीपाद्रिरत्नोर्मि-पोतयादो जगत्प्लवाः ।
विष्णुकुल्यागमश्चन्द्राद्, वृद्धिमत् घोषपूरितः ॥"

अस्मिन् श्लोके समुद्रवर्णन मुक्तमिति ।

## २५- नदीवर्णने

यथा–

"सरत्यम्बुधियायित्वंः, वीच्यो जलगजादयः ।
पद्मानि षट्पदा हंसा-चक्राद्याः कुलशाखिनः ॥"

श्लोकेऽस्मिन् नदीवर्णनं कथितमिति ।

## २६- सरस्य वर्णने

यथा—

"सरस्यम्भोलहर्यम्भो-गंजाद्यम्बुजषट्पदाः ।
हंसचक्रादयस्तीरो-ध्यानस्त्रीपान्थकेलयः ॥"

अस्मिन् श्लोके सरस्य वर्णनं कथितमिति ।

## २७- सूर्यवर्णने

यथा—

"सूर्येऽरुणता रविमणिचक्राम्बुजपथिकलोचनप्रीतिः ।
तारेन्दुदीपकौषधिघूकतम - श्चौरकुमुदकुलटार्तिः ॥१॥"

अत्र सूर्यवर्णनं प्रोक्तमिति ।

## २८- चन्द्रवर्णने

यथा—

"चन्द्रे कुलटाचक्राम्बुरुहविरहितमोहानीरौज्ज्वल्यम् ।
सागरजननेत्रकैरवचकोरचन्द्राश्मदम्पतिस्नेहः ॥१॥"

श्लोकेऽस्मिन् चन्द्रवर्णनमुक्तं चेति ।

## २९- मृगवर्णने

यथा—

मृगयायां श्वव्याधानां, वागुरा नीलवेषता ।
शरक्षेपैः मृगत्रासः, सिंहयुद्धं गतिस्त्वरा ॥"

अस्मिन् श्लोके मृगवर्णनं कथितमिति ।

## ३०- वसन्तऋतुवर्णने

यथा–

"वसन्ते दोलाकोकिल-मारुतसूर्यगतितरुदलोद्भेदाः ।
जातीतरपुष्पचयाऽम्रमंजरीभ्रमरझंकाराः ।।"

अत्र वसन्तऋतुवर्णनं प्रोक्तमिति ।

## ३१- ग्रीष्मऋतुवर्णने

यथा–

"ग्रीष्मे पाटलमल्ली-तापसरः पथिकशोषवातात्यः ।
सक्तुप्रपाप्रपास्त्री – मृगतृष्णाम्रादिफलपाकाः ।।"

अस्मिन् श्लोके ग्रीष्मऋतुवर्णनमुक्तमिति ।

## ३२- वर्षाऋतुवर्णने

यथा–

"वर्षासु घनशिखिस्मयहंसगमाः पङ्ककन्दलोद्भेदौ ।
जातीकदम्बकेतक-झंझानिलनिम्नगा-हलिप्रीतिः ।।

श्लोकेऽस्मिन् वर्षाऋतुवर्णनं प्रोक्तमिति ।

## ३३- शरद्ऋतुवर्णने

यथा–

"शरदीन्दुरविपटुत्वं जलाच्छतागस्त्यहंसवृषदर्पाः ।
सप्तच्छदपद्मसिता-भ्रधान्यशिखिपक्षमदपाताः ।।"

अत्र शरद्ऋतुवर्णनं कथितमिति ।

## ३४- हेमन्त - शिशिरऋतुवर्णनयोः

यथा—

“हेमन्ते रवितनुता शीतयवस्तम्बमरुबकहिमानि ।
शिशिरे शुष्कगोमयत्वं कुमुदाम्बुजदाहशिखरतोत्कर्षाः ।।”

अस्मिन् श्लोके हेमन्त-शिशिरऋतुवर्णनं प्रोक्तमिति ।

## ३५- सुरापानवर्णने

यथा—

“सुरापाने गतिभंगः, वचने स्खलना भ्रमः ।
लज्जा मानापमानेषु, तिरस्कारं पदे-पदे ।।”

श्लोकेऽस्मिन् सुरापानवर्णनमुक्तमिति ।

## ३६- विवाहवर्णने

यथा-

“विवाहे वरमात्रा हि, स्त्रियाणां मधुरध्वनिः ।
लाजा होमादिवेदीषु, मङ्गलं पाणिपीडनम् ।।”

अत्र विवाहवर्णनं प्रोक्तमिति ।

## ३७- स्वयंवरवर्णने

“स्वयंवरे कुमाराणां, मञ्चमण्डपशोभनम् ।
राजपुत्र्याः निजोद्वाहं, क्रीयते निजचेष्टया ।।”

अस्मिन् श्लोके स्वयंवरवर्णनं कथितमिति ।

## ३८- सुरतवर्णने

यथा–

"सुरते सामजाभावाः, सीत्कारः कोरकाक्षता ।
माञ्जीयं मधुरं शब्दः, रवोऽधरनखक्षतिः ॥"

श्लोकेऽस्मिन् मैथुनवर्णनमुक्तमिति ।

## ३९- विरहवर्णने

यथा–

"विरहे तापनिश्वास - चिन्ताग्निदेहदग्धता ।
शीतोपलेपनं सौख्यं, जागृतिः शिशिरोष्मता ॥"

अत्र विरहवर्णनं प्रोक्तमिति ।

## ४०- जलकेलिवर्णने

यथा–

"जलकेलौ सरःक्षोभश्चक्रहंसापसर्पणम् ।
पद्मग्लानिः पयः क्षेपो, दृग्रागो भूषणच्युतिः ॥"

श्लोकेऽस्मिन् जलकेलिवर्णनमुक्तमिति ।

## ४१- पुष्पावचयवर्णने

यथा–

"पुष्पावचये पुष्पावचयः पुष्पार्पणार्थिने दयिते ।
मानाद्यं गात्रस्खलनेर्ष्यावक्रोक्तिसम्भ्राश्लेषाः ॥"

अत्र पुष्पावचयवर्णनं प्रोक्तमिति ।

## ४२- ४३- प्रातः-मध्याह्न-सायंकालेषु वर्णने

यथा-

प्रातः कोकाम्बुजोत्कर्षो,
मध्याह्ने तापसंप्लवः ।।

## ४४-

सायं-भानोः रक्तत्वं,
चक्रपद्मादिविप्लवः ।"

अस्मिन् श्लोके प्रातः-मध्याह्न-सायंकालेषु वर्णनमुक्त-मिति ।

## ४५- अन्धकारवर्णनं

यथा-

"तमिस्रे सान्द्रमन्धत्वं, सर्वलोकोपशून्यता ।
आकस्मिक समारम्भो निःशङ्कमभिसारिका ।।"

अस्मिन् श्लोके अन्धकारवर्णनं प्रोक्तमिति ।

## कविसमयः

एवं च कवीनां समये अङ्कलेखनस्य प्रकारोऽपि बहुधा संङ्केताक्षरैः निम्नप्रकारैः विवर्णितो दृश्यते काव्येषु शिलापट्टेषु इतिवृत्तात्माकालेखेषु च ।

(१) **एकं**–'ब्रह्म, भूमिः, इन्दुः' इति ।

(२) **द्वौ**–'पक्षौ, अक्षिणी, दोषौ (भुजौ) यमौ (यमलौ), अश्विनौ' इति ।

(३) **त्रयः**–'रामाः, गुणाः, ग्रामाणि, पुराणि, लोकाः, क्रमाः, अग्नयः' इति ।

(४) **चत्वारः**–'अब्धयः, युगाः, श्रुतयः, कृताः' इति ।

(५) **पञ्च**–'इषवः, वायवः, भूताः, अक्षाः' इति ।

(६) **षट्**–'रसाः अङ्गानि, ऋतवः, तर्काः' इति ।

(७) **सप्त**–'स्वराः, ऋषयः, तुरङ्गाः' पर्वताः' इति ।

(८) **अष्टौ**–'वसूनि, सर्पाः, मतङ्गजाः' इति ।

(९) **नव**–सङ्ख्याः, गावः, अङ्कानि, नन्दाः, निधयः, नभश्चराः, इति ।

(१०) **दश**– 'आशाः' शून्य, अभ्रम्' इति ।

(११) **एकादश**– 'त्रिलोचनाः-महेश्वराः' इति ।

(१२) **द्वादश**– 'आदित्याः, 'अर्काः, सूर्याः' इति ।

(१३) **त्रयोदश**–'विश्वे-देवाः' इति ।

(१४) **चतुर्दश**–'मनवः, इन्द्राः, भुवनानि' इति ।

(१५) **पञ्चदश**–'तिथयः' इति ।

(१६) **षोडश**–'कलाः, अष्टयः, राजानः' इति ।

(१७) **सप्तदश**–'अत्यष्टयः, धनाः' इति ।

(१८) **अष्टादश**–'धृतयः' इति ।

(१९) **एकोनविंशतिः**–'अतिधृतयः' इति ।

(२०) **विंशतिः**–'कृतयः, अङ्गुलयः, नखाः,' इति ।

(२१) **एकविंशतिः**–'प्रकृतयः, मूर्छनाः' इति ।

(२२) **द्वाविंशतिः**–'जातयः, आकृतयः' इति ।

(२४) **चतुर्विंशतिः**–'जिनाः सिद्धाः' इति ।

(२५) **पञ्चविंशतिः**–'तत्त्वानि' इति ।

(२७) **सप्तविंशतिः**–'ऋक्षाणि' इति ।

(३२) **द्वात्रिंशत्**–'दशनाः-द्विजाः' इति ।

(३३) **त्रयस्त्रिंशत्**–'सुराः' इति ।

(४९) **एकोनपञ्चाशत्**–'तानाः' इति ।

एवं एतेषां तुल्यार्थकानां शब्दैः पृथ्वीस्थाने भू - भूमि-महीत्यादि धीमता सङ्ख्याया अवगमः कार्यः इति ।

'अङ्कानां वामतो गतिः' ज्ञेया। एतेषां अङ्कानां श्लोक-रूपेण कथ्यतेऽत्र—

तथाहि—

एकं ब्रह्मेन्दु भूमिद्धौं, पक्षाक्षिदोर्यमाश्विनः।
त्रयो राम-गुण-ग्राम - पुर - लोक - क्रमाग्नयः ॥१॥

चत्त्वारोऽब्धि-युग-श्रुति - कृताः पञ्चेषु वायवः।
भूताक्षाः षड् रसाङ्गर्तु - तर्काः सप्त स्वरर्षयः ॥२॥

तुरङ्गः पर्वतश्चाष्टौ, वसु - सर्प - मतङ्गजाः।
नवसङ्ख्यागोऽङ्करन्ध्र - नन्द - निधि-नभश्चराः ॥३॥

शून्यमभ्रं दशाशाः स्या - देकादश त्रिलोचनाः।
द्वादशादित्यमाख्याता, विश्वेदेवा त्रयोदशः ॥४॥

चतुर्दश मनुश्चेन्द्रः, भुवनेभ्यः प्रयोगितः।
तिथयः पञ्चदशानां वै, कलाष्टिराज षोडशः ॥५॥

अथात्यष्टिर्धनाः प्रोक्ता, सप्ताधिदशसङ्ख्यके।
धृतयोऽष्टादश स्याद् वै, अतिधृत्यूनविंशतिः ॥६॥

कृताङ्गुलिनखाः ज्ञेया, संख्या विंशतिभ्यः सदा।
प्रकृतिर्मूर्छनाश्चैक - विंशतिः कथिताः बुधैः ॥७॥

स्याद् जातिराकृतिश्चैव, ख्यातो द्वाविंशतिः सदा ।
वन्दनीया जिनाः सिद्धाः, स्युश्चतुर्विंशतिः मुदा ॥८॥

तथा तत्त्वमपि प्रोक्तं, प्रसिद्धं पञ्चविंशतिः ।
सप्तविंशति ऋक्षाणि, द्वात्रिंशद् दशना द्विजाः ॥९॥

त्रयस्त्रिंशत् सुराः ख्याताः, वर्णिताः साक्षरैः सदा ।
तथा तानादयो शब्दाः, ऊनपञ्चाशदूचिरे ॥१०॥

पर्यायवाचकैः शब्दैः, कल्पनीया तथाऽपि वै ।
सङ्ख्याङ्कानां च वै संज्ञा, सुधिया धियाऽऽसाम् ॥११॥

इत्यत्र संक्षेपतः कविसमयः समासतो निर्दशितः । विशेषार्थिजिज्ञासुना काव्यानुशासन - तदीयविवेक-काव्य-प्रकाश-साहित्यदर्पण-तट्टीकादयो ग्रन्था अवलोकनीयाः ॥

## पञ्चमपरिच्छेदस्य सारांशः

काव्य - कलात्मकैर्भेदैः सम्प्रदायः कवेश्च कः ।
जिज्ञासाकुलचित्तानां, हितबुद्धया सुभाषितम् ।। १ ।।

कवीनां सम्प्रदायाः षट्, रसाऽलङ्कार रीतयः ।
वक्रोक्ति - ध्वनि - रौचित्य - भेदैस्साहित्यविश्रुताः ।। २ ।।

विभावस्यानुभावस्य, संयोगाद् व्यभिचारिणः ।
रसनिष्पत्तिराम्नायो, भरताचार्य - चर्चितम् ।। ३ ।।

उत्पत्तिञ्च रसस्यास्य, मनुते भट्टलोल्लटः ।
शङ्कुकोऽनुमतिं चाभि - व्यक्तिमभिनवोऽवदत् ।। ४ ।।

अलङ्कारस्य वैशिष्टयं, भामहोद्भटरुद्रटाः ।
दण्डी गुणानां रीतीनां, वामनश्चैव मेनिरे ।। ५ ।।

आनन्दवर्द्धनाचार्यैः, ध्वनेः प्राधान्यमीरितम् ।
अभिनवगुप्तपादैश्च, मम्मटाद्यैस्समर्थितम् ।। ६ ।।

औचित्यसम्प्रदायस्य, क्षेमेन्द्रोऽभूत् प्रवर्त्तकः ।
औचित्यं रससिद्धस्य, प्रोक्तं काव्यस्य जीवितम् ।। ७ ।।

सरसे काव्यसंसारे, कवेरेवास्ति कौतुकम् ।
यदस्मै रोचते रम्यं, नव्यं भव्यं प्रवर्त्तते ।। ८ ।।

निरङ्कुशत्वं कवीनां तु, विदितं विश्वभासितम् ।
ललितं वलितं नित्यं, चमत्कारैश्च चर्चितम् ।। ९ ।।

अङ्कलेखन - साहित्य - प्रतिपादन - पुरस्सरम् ।
समयादिवर्णनं प्रोक्तं, कविभिः स्वीकृतं पुरा ।।१०।।

पञ्चमोऽयं परिच्छेदः, प्रोक्तः सुशीलसूरिणा ।
पठता पटुतासिद्धयै, प्रीत्यै पाठयतां परम् ।।११।।

# प्रशस्तिः

( १ )

मिथ्यामोहतमिस्रकल्मषहरं सज्ज्ञान - तेजस्करं ,
मोक्षैश्वर्य-सुप्रीतिपूरभरितं निर्वाणमार्गे स्थितम् ।
दग्धानङ्गपतत्त्रिणं न च पुनर्विज्ञातरूपं भृशं ,
तं देवं प्रणमामि मोक्षसुखदं पार्श्वं फलोधीश्वरम् ॥१॥

( २ )

जिने धर्मे श्रद्धा शिशुसमयतो यस्य च गुरौ ,
विरक्तिराबालाद् - भवविषयहालाहलनिभा ।
जिघृक्षा दीक्षायाः समजनि मुमुक्षा प्रबलतः ,
स्तुवे सूरिं नेमिं विमलचरितं तं गुरुवरम् ॥२॥

( ३ )

यदीयं व्याख्यानं प्रशमरसधाराधरसमं ,
यदीयं माहात्म्यं सुजनजनमाङ्गल्यकरणम् ।
यदीया शास्त्रेषु प्रखरगति वैदुष्य प्रतिभा ,
स्तुवेऽहं सूरिं वै सुगुरुवरं लावण्यसुधियम् ॥३॥

( ४ )

संसारमाया - नवलिप्त-जन्मतः ,
शीलप्रभाभासित यो मुनीश्वरः ।
धुरन्धरः शास्त्रविशारदस्तथा ,
श्रीदक्षसूरिः प्रणमामि सद्गुरुः ।।४।।

( ५ )

तेषां पट्टधरो मुख्यः, अनुजो हि सहोदरः ।
सुशीलेति समाख्यातः, शास्त्रेषु व्यसनं मम ।।५।।

राजस्थाने हि प्रख्याते, मरुधरप्रदेशके ।
शुभे फलोधितीर्थे वै, तीर्थमाला महोत्सवे ।।६।।

श्रीफलवृद्धिपार्श्वेश-स्यानुभावाच्च गुरोरपि ।
साहित्याकरग्रन्थेभ्यो, विलोकनाच्च चिन्तनात् ।। ७ ।।

वेद वेद नभोनेत्रे [२०४४], मिते वैक्रमवत्सरे ।
माघे च शुक्लसप्तम्यां, तिथौ च सोमवासरे ।। ८ ।।

साहित्यरत्नमञ्जूषा, संक्षिप्ता कृतवान् मुदा ।
युता पञ्चपरिच्छेदैः, सानन्दा पूर्णतामिता ।। ९ ।।

यावत् मेरु-रवीन्दु-भू-, ग्रह-नक्षत्र-तारकाः ।
स्थीयात् तावदयं ग्रन्थः, सर्वेषां हितसाधने ।। १० ।।

इति श्रीशासनसम्राट्-सूरिचक्रचक्रवर्त्ति-तपोगच्छाधिपति-भारतीयभव्यविभूति-महाप्रभावशालि-अखण्डब्रह्मतेजोमूर्त्ति-श्रीकदम्बगिरिप्रमुखानेकप्राचीनतीर्थोद्धारक - श्रीवलभीपुर-नरेशाद्यनेकनृपतिप्रतिबोधक-चिरन्तनयुगप्रधानकल्प-वचनसिद्ध-सर्वतन्त्रस्वतन्त्र-प्रातःस्मरणीय-परमोपकारि-परमपूज्याचार्य-महाराजाधिराज **श्रीमद्विजयनेमिसूरीश्वराणां** दिव्यपट्टालंकार-साहित्यसम्राट्-व्याकरणवाचस्पति-शास्त्रविशारद- कविरत्न-साधिकसप्तलक्षश्लोकप्रमाणनूतनसंस्कृतसाहित्यसर्जक-परम-शासनप्रभावक - बालब्रह्मचारि - परमपूज्याचार्यप्रवर **श्रीमद्-विजयलावण्यसूरीश्वराणां** प्रधानपट्टधर - धर्मप्रभावक-शास्त्रविशारद-कविदिवाकर- व्याकरणरत्न- स्याद्यन्तरत्ना-कराद्यनेकग्रन्थकारक-बालब्रह्मचारि-परमपूज्याचार्यवर्य **श्रीमद्-विजयदक्षसूरिवराणां** पट्टधर-जैनधर्मदिवाकर-शास्त्रविशारद-साहित्यरत्न - कविभूषण - बालब्रह्मचारि - **श्रीमद्विजय-सुशीलसूरि** सन्दृब्धायां **साहित्यरत्नमञ्जूषायां** पञ्चमः परि-च्छेदः ॥

**तत्समाप्तौ च समाप्तेयं साहित्यरत्नमञ्जूषा**

॥ श्रीरस्तु ॥ शुभं भवतु ॥

आ. श्री सुशीलसूरिजी जैन ज्ञानमंदिर

सिरोही राज.

नमो नाणस्स

ताज प्रिण्टर्स, बोराणा हाउस, जालोरी गेट के अन्दर, जोधपुर